CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

॥ श्रीः ॥

विद्याभवन संस्कृत ग्रन्थमाला
११७

॥ श्रीः ॥

निबन्ध-प्रकाशः

रचयिता
आचार्य कृष्णकुमार अवस्थी

State Museum Library Lucknow
7626

चौखम्बा विद्याभवन, वाराणसी-१

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

॥ श्री: ॥

विद्याभवन संस्कृत ग्रन्थमाला
११७

State Museum Library Lucknow 7620

॥ श्री: ॥

निबन्ध-प्रकाश:

रचयिता

आचार्य कृष्णकुमार अवस्थी

राज्य संग्रहालय पुस्तकालय प्रो० बी० एन० पुरी

चौखम्बा विद्याभवन, वाराणसी १

प्रकाशक : चौखम्बा विद्याभवन, वाराणसी
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
मुद्रक : विद्याविलास प्रेस, वाराणसी

संस्करण : प्रथम, वि० संवत् २०२१

मूल्य : २-००

© The Chowkhamba Vidya Bhawan,
Chowk, Varanasi-1
(India)
1964

Phone : 3076

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषय-सूची

१ प्रभात-शोभा	...	१
२ संध्या-वर्णनम्	...	५
३ दीपावलिः	...	७
४ होलिकोत्सवः	...	११
५ विजयादशमी	...	१३
६ रक्षाबन्धनम्	...	१४
७ वसन्तः	...	१६
८ ग्रीष्मः	...	१९
९ वर्षा	...	२२
१० शरद्	...	२४
११ रेलयात्रा	...	२६
१२ जलयात्रा	...	२९
१३ पदयात्रा	...	३२
१४ भूतपूर्व राष्ट्रपति डा० राजेन्द्रप्रसाद	...	३४
१५ स्वतन्त्रभारतस्य प्रथमः प्रधानमन्त्री	...	३६
१६ महात्मा गान्धिः	...	३९
१७ महात्मा बुद्धः	...	४२
१८ महामना मदनमोहनमालवीयः	...	४६
१९ अध्ययनम्	...	४८
२० परोपकारः	...	५०
२१ मानवजीवनस्य लक्ष्यम्	...	५४
२२ मित्रता	...	५६
२३ सत्सङ्गतिः	...	५९
२४ उद्योगः	...	६२
२५ एकता	...	६५
२६ अहिंसा	...	६७

State Museum Library Lucknow 7620

प्रो० बी० एन० पुरी संग्रह लखनऊ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२७ धैर्यम् ... ७०
२८ स्वावलम्बनम् ... ७२
२९ सर्वे गुणाः काञ्चनमाश्रयन्ति ... ७५
३० उदारचरितानां तु वसुधैव कुटुम्बकम् ... ७८
३१ स्त्रीशिक्षा ... ८१
३२ ब्रह्मचर्य-महिमा ... ८४
३३ व्यायामः ... ८७
३४ सदाचारः ... ८९
३५ गोरक्षा ... ९१
३६ छात्र-जीवनम् ... ९३
३७ देशाटनम् ... ९५
३८ मेलापकः ... ९८
३९ तीर्थवर्णनम् ... १०१
४० विद्यालयोत्सवः ... १०४
४१ चलचित्रम् ... १०६
४२ गणतन्त्रशासनम् ... १०८
४३ संयुक्तराष्ट्र-सङ्घः ... १११
४४ समयस्य सदुपयोगः ... ११४
४५ धर्म-तत्त्वम् ... ११७
४६ जननी जन्मभूमिश्च ... ११९
४७ बुद्धिर्यस्य बलं तस्य ... १२१
४८ सत्यान्न प्रमदितव्यम् ... १२३
४९ संस्कृतभाषाया रक्षावृद्धिश्च आवश्यकी ... १२६
५० राष्ट्रभाषा संस्कृतम् ... १२७
५१ विद्या ... १३०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ श्रीः ॥

निबन्ध-प्रकाशः

प्रभात-शोभा

अहह ! अतीव मनोहरा रमणीया प्रातःकालिकी शोभा । पूर्वस्यां दिशि एष अरुणप्रकाशः सर्वत्र जीवनं संचारयति। सुखावहः प्राणप्रदोऽनिलो वाति । प्राणिनः नेत्रे उन्मील्य कार्यं कर्तुं प्रारभन्ते । सूर्योदयात्प्राक् ब्राह्ममुहूर्तं भवति । पश्य विकसन्ति सम्प्रति भगवतः मरीचिमालिनोंऽशवः निशाचरवध्वाः अपसारणे मन्त्रप्रयोजकाः इव सायं सालससुप्तपंकजवन-प्रोद्बोधवैतालिका इव । यथा वैतालिकाः सुप्तं जनं प्रबोधयन्ति, तथैव सूर्यरश्मयः अपि निमीलितं कमलवृन्दं विकासयन्ति । तथा फुल्लत्-पंकजकोशगर्भकुहरेभ्यः निर्गतभ्रमरपंक्तेः गुंजितशब्दरूपप्रणवस्योपदेशे गुरवः तिग्मरुचेः अंशवः प्रादुर्भवन्ति । अन्यदपि आगच्छन्त्याः दिवस-लक्ष्म्याः पादतलस्पर्शानुभवात् इव व्योमाऽशोकतरोः नवीनकलिकागुच्छः समुज्जृम्भते सूर्यः । एते भगवतः सूर्यस्यांशवः चक्रवाकसुलोचनानां रात्रौ पतिविरहितानां चक्रवाकीनामाश्वासनदायिनः निविडान्धकारपयोधौ निमग्नजगतीवितीर्णालम्बोत्सवाः दिङ्मृगदृशां सरोरुहवनश्रीकेलिकाराः दीप्तांशोःकराः विकसन्ति ।

यदा अस्पष्टतया सूर्यस्यारुणवर्णेन पूर्वा दिशा अरुणायते । चन्द्रस्य कान्तिः शनैः शनैः क्षीयते । एकस्योत्थानमेकस्य पतनम् अर्थात उत्थान-पतनस्यावस्था एकदैव दृश्यते । रात्र्यन्धकारं विजित्य स्वजयघोषं घोषयन् सूर्यः उदेति । चन्द्रस्तु स्वकीयां सर्वां शोभां सिद्धिं समृद्धिं च विनाश्य अस्तमेति । तद्वर्णनं कृतं महाकविना कालिदासेन अभिज्ञानशाकुन्तले अहो प्रभाता रजनी तथा हि—

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्यच्चापि महतामपि अत्यारूढिः पतनपरिणामशालिनी भवति यथा वर्णयति कविकालिदासः—

पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षपिततमसा मध्यमं धाम विष्णोः।
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै-
रत्यारूढिर्भवति महतामप्यपभ्रंशनिष्ठा ॥"

सर्वे मानवाः प्रातः पवनमनुभूय अहो प्रभाता रजनी। शीघ्रं शयनं परित्यजामि अथवा समये गते किं करिष्यामि इति विचार्य सपदि उत्तिष्ठन्ति, स्वकार्ये रताश्च भवन्ति।

अरुणवर्णयुक्ताम् आभां विहाय रश्मिना तिग्मरश्मिः सर्वान् उद्बोधयति तदा सर्वे पक्षिगणः शब्दं कुर्वन्तः पशवश्चनदन्तः निर्गच्छन्ति गृहान्। भास्करः स्वीकीयैः दीर्घकरैः संकुचितानि कमलानि प्रसन्नानि करोति। अलयः रसं पातुं पतन्ति इव। तथा वायुरपि मन्दगत्या आवहति यथा प्रभातकालिकस्य वायोः वर्णनम्।

लताकुंजं गुंजन् मदवदलिपुंजं चपलयन्
समालिंगन्नङ्गं द्रुततरमनङ्गं प्रबलयन्।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि॥

सर्वेषामृतूनां प्रभातकालिकी शोभा भिन्ना भवति। ग्रीष्मर्तौ ऊष्मायुक्तं प्रभातम्। वर्षर्तौ शीतोष्णयुक्तं प्रभातम्। परन्तु शरदृतोः प्रभातशोभा तु अतीव रमणीया। रात्रौ पतिताः तुषारबिन्दवः प्रातः काले तृणांकुरेषु मुक्ताकणसन्निभाः दृश्यन्ते। हेमन्तशिशिरयोः प्रभातम् शीतलं भवति। शीतकाले जनाः संकुचिताः भवन्ति। अस्मिन् समये द्विगुणशीतलः पश्चिमो वायुः वाति—

प्रकृत्या शीतलस्पर्शो हिमविद्धश्च साम्प्रतम्।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः॥

प्रातः काले पक्षिणश्चापि स्वनीडं न त्यजन्ति। दिवसाः अपि साम्प्रतम् शीतैः भीता इव संकुचन्ति। शिशिरे शीतत्रासाद् दीनो जनः कूर्मवत् स्वानि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अंगानि निजे शरीरे एव निह्नोतुमाकांक्षति । अस्य वर्णनमतीव चमत्कारिकं कृतं कविना—शीतकाले हि—

कम्पन्ते कपयो भृशं जडकुलं गोऽजाविकं ग्लायति,
श्वा चुल्लीकुहरोदरं क्षणमपि क्षिप्तोऽपि नैवोज्झति ।
शीतार्तिव्यसनातुरः पुनरयं दीनो जनः कूर्मवत्
स्वान्यंगानि शरीर एव हि निजे निह्नोतुमाकांक्षति ॥

वसन्तेषु अधिकं शोभते प्रभातम् । सर्वा दिशः पुष्परागरंजिता भवन्ति । क्षेत्रेषु आतपश्रीः सस्यराशिषु स्वर्णवैभवमुत्पादयति । रसालमञ्जरीचूर्णपतितैः सूर्यस्य सुवर्णसूत्रकलितैः किरणैः वसुधा पीतवसनावरणा इवाभाति । पुष्पसंछन्नशिखराः मधुकरैः व्याप्ताः पादपाः प्रगीता इव भान्ति । यथा—रामायणे निगदितम्—

पुष्पसंछन्नशिखरा मारुतोत्क्षेपचञ्चलाः ।
अमी मधुकरोत्तंसाः प्रगीता इव पादपाः ॥

सुपुष्पिताः कर्णिकारवृक्षाः पीताम्बरधारिनराः इव भान्ति—

सुपुष्पितांस्तु पश्यैतान् कर्णिकारान् समन्ततः ।
हाटकप्रतिसंछन्नान् नरान् पीताम्बरानिव ॥

सामान्यतः प्रभातशोभा हृदयाकर्षिणी कोकशोकविनाशिनी, कमलवनानां विनाशिनी तिमिरनाशिनी च भवति । नीहारतमसावृताः पुष्पशून्याः वनपंक्तयः प्रातः काले प्रसुप्ता इव शोभन्ते—

अवश्यायतमोनद्धा नीहारतमसावृताः ।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥

बाष्पसंछन्नसलिला नदी प्रातः काले सारसादिकूजितेन पक्षिणां कलरवेण भाति—

बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः ।
हिमार्द्रबालुकैस्तीरैः सरितो भान्ति साम्प्रतम् ॥

अधुना चन्द्रचन्द्रिकापक्षपातीनि कुमुदानि चकोराश्च उदासीनाः भवन्ति । दिवाभीताः कौशिकाः शृगालाश्चान्तर्हिताः भवन्ति । प्रभाते वल्कलोत्तरवाससः ऋषयः नद्याम् स्नानं कुर्वन्ति आदित्यमुपतिष्ठन्ते च—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जटाजिनधराः काले वल्कलोत्तरवाससः ।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ।।
आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः ।

मन्दिरेषु घण्टानादैः देवार्चना प्रारभ्यते ।

प्रत्यूषकालः प्रारम्भस्य सूचकोऽत एव स्वातन्त्र्य-प्रभातकालः जीवनस्य प्रभातकालः कथ्यते । प्रभातन्तु उन्नतेः प्रतीकः । सूर्योऽपि प्रातः काले हेलया दिवः परिपतति—

उदयशिखरिशृंगं प्रांगणेष्वेव रिंगन्
सकमलमुखहासं वीक्षितः पद्मिनीभिः ।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवाऽङ्के हेलया बालसूर्यः ।।

प्रत्यूषकाले आकाशस्थानि नक्षत्रगणानि बालसूर्यः गजरुधिररक्तहरिसटा इव लोहिनीभिः, प्रतप्तलाक्षिकतन्तुः इव पाटलाभिः, पद्मरागशलाकानिर्मितसम्मार्जनीभिः इव किरणैः समुत्सारयति । अरण्ये तुषारबिन्दवः वर्षन्ति, मयूराः नृत्यन्ति, सिंहाः गर्जन्ति, करिणीकदम्बकानि मदमत्तकरिवरगणान् उद्बोधयन्ति च । भ्रमराः कमलवनेषु गुञ्जारं कुर्वन्ति । सरोवरतीरेषु हंसाः पक्षिणश्च कलरवं कुर्वन्ति ।

अरुणजलदराजीमुग्धहस्ताग्रपादा
बहुलमधुपमालाकज्जलेन्दीवराक्षी ।
अनुपतति विरावैः पत्रिणां व्याहरन्ती
रजनिमचिरजाता पूर्वसंध्या सुतेव ।।

सम्प्रति केतकधूलिधूसररुचः जराजर्जराः शीतद्युतेरंशवः पश्चिमजलधेः तीरं प्राप्ताः । प्रभातकाले ताम्रचूडरटितं श्रुत्वा सर्वे निद्रां परित्यज्योत्साहिताः भवन्ति । पिकः मन्दं मन्दं मदननामानि जपति । द्रुमाः धृतनिबिडगर्भाः स्त्रियः इव प्रफुल्लाः दृश्यन्ते । यथा—

द्रुमाः पाण्डुप्राया धृतनिबिडगर्भाः स्त्रिय इव
प्रफुल्लास्ते कन्दा नृपतिकृतमाना इव जनाः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पिको मन्दं मन्दं हृदि मदननामानि जपति,
प्रभोरग्रे पूर्वापरिचितसभाकः कविरिव ॥

अतीव रमणीया सुखदायिनी हृदयहारिणीयं प्रभातवेला।

संध्यावर्णनम्

मुग्धस्य केलिविजितस्मरचापयष्टे-
रातन्वती रुचिमतीव सुधाकरस्य।
रागोद्धुरा स्फुटमुदञ्चिततारकश्रीः
सन्ध्याविरस्ति ननु कापि पतिंवरेव ॥

संध्या पतिंवरा कन्येव शनैः शनैः समायाति, महाकविकालिदासस्ये-यमुक्तिः, सन्ध्यां वर्णयति—यथा सर्वे प्राणिनः कार्यं कृत्वा सायंकाले गृहं गच्छन्ति तथैव पल्लवरागताम्रा पतंगप्रभा दिगन्तराणि संचारपूतानि कृत्वा निलयाय याति ! भगवान् भुवनभास्करः उदयास्तकाले समां शोभां धारयति यथा—"उदेति सविता ताम्रस्ताम्र एवास्तमेति च।" अस्ताचलं प्रति जिगमिषोः भास्करस्य किरणैः पश्चिमदिग्विभागेऽरुणिमा जायते। रक्तवृत्ताकारः सूर्यः शनैः शनैः पश्चिमपारावारे निमज्जितु-मवतरति एवं प्रतिभाति यदसौ भगवान् अरविन्दबन्धुः अखिलां त्रिलोकीं प्रबुद्धकमलां कृत्वा अन्तःप्रसुप्तहरिनाभिसरोजोद्बोधकौतूहलीव इदानीमम्भोनिधेः पश्चिमपयोधेः गर्भं विशति सम्प्रति कमलिनीकुलवल्लभप्रभया तरुराजिशिखा अरुणायते। कलं नदन्तः पक्षिणः नर्दन्तश्च पशवः गृहाभि-मुखा भवन्ति। अरण्यवासिनः जीवाः यथा क्वचित्पल्वलोत्तीर्णवराहयूथानि, आवासवृक्षोन्मुखबर्हिणानि गच्छन्ति। किमधिकम्—

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अस्तंगते च मरीचिमालिनि मलिनीभवति च कमलविकासः, उद्यति च रजनीनाथे विकसति कैरवनिचयः । श्यामायमानाः सर्वाः दिशः अवलोक्यन्ते । संध्यायाम् उत्कटमददिग्गजचपलकर्णपूरकपोल-स्थोच्चलद्दलिसमूहकृतानि मलिनभांसि मृगनाभिसमानभांसि दि- दिशागुहासु अतिशयेन प्रादुर्भवन्ति । तथा अभिसारिणीनां वान्धवे निबि-डान्धकारसमूहे पूर्व दिशामालम्बमाने सति तथा स्वच्छन्दगामिनि स्वै-रिणीनां वैरिणि शशिकरनिकरे च पश्चिमदिग्विभागांश्च समासादिते पूर्वपश्चिमयोरन्तरालमर्धकृष्णपाषाणार्धस्फटिकमिव मिलित्वा गङ्गायमुनयोः मिश्रितजलप्रवाहस्य सादृश्यं विदधाति ।

प्राप्ते च घनीभूतेऽन्धकारे पक्षिपशुभ्रमरसमूहाः सर्वे स्वस्वनिलयं प्राप्य मूकीभवन्ति । रात्र्यन्धकारे क्वचित्पानं क्वचिद्गानं क्वचित्क्रीडा क्वचि-द्धास्यं च भवति । धार्मिकाः मन्दिरेषु घण्टानादं कुर्वन्तः आराधनां कुर्वन्ति । संध्या सन्धिकालस्य नाम । संध्या अवसानं च संकेतयति । अतएव जीवनसन्ध्यादिशब्दानां प्रयोगः क्रियते । विधिवशाद् यदा मानवस्थितेः पतनं भवति तदा सर्वे प्रयत्नाः शिथिला भवन्ति । स्वजनाः अपि पर-जनाः भवन्ति । अतएव माघः सूर्यास्तं वर्णयन् तामेव दशां वर्णयति—

प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभू-
न्न पतिष्यतः करसहस्रमपि ।।

यथा सूर्यः विरमितुं याति तथैव सर्वे प्राणिनः विरमन्ते । अतः सन्ध्या कार्यविरामस्य सूचिका अस्ति । रात्रौ सर्वे विश्रामं कार्यविरामञ्च कुर्वन्ति । परन्तु मुनिजनाः स्वोपासनां कुर्वन्ति । अत एवोक्तं भगवता श्रीकृष्णेन—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।।

अतः कार्यकर्तॄणां कृते न समयस्य बन्धनं भवति । सन्ध्यां दृष्ट्वा कश्चि-न्मुनिः अर्धनारीश्वरस्य भगवतः शङ्करस्य स्मरणं करोति यथा—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पूर्वा तु काष्ठा तिमिरानुलिप्ता
सन्ध्यारुणा भाति च पश्चिमाशा ।
द्विधा विभक्तान्तरमन्तरिक्षं
यात्यर्धनारीश्वररूपशोभाम् ॥

अस्तमुपगते च भगवति सहस्रदीधितौ विद्रुमलता इव पाटला संध्या समदृश्यत । संध्यावेलायाम् रविरश्मयः धरणितलं विहाय कमलवनानि उन्मुच्य शकुनयः इव तरुशिखरेषु स्थिताः । किञ्चिदालग्नलोहितातपावृताः तरवः मुनिभिरालम्बितरक्तवल्कलाः इव लक्ष्यन्ते । अस्मिन् समये रविः गैरिकगण्डशैलाभः पातेन विचूर्णितः इव भाति—

उच्चैस्तरादम्बरशैलमौलेश्च्युतो रविर्गैरिकगण्डशैलः ।
तस्यैव पातेन विचूर्णितास्य संध्या रजोराजिरिवोज्जिहीते ॥

अतीव सुन्दरी कामिनीव संध्या नक्षत्रव्याजेन पुष्पाणि विकिरन्ती आगच्छति—

अस्तोदयाचलविलम्बिरवीन्दुबिम्ब-
व्याजात्क्षणं श्रवणयोर्निहितारविन्दा ।
ताराच्छलेन कुसुमानि समुत्क्षिपन्ती
संध्येयमागतवती प्रमदेव काचित् ॥

दीपावलिः

अस्माकं धर्मप्रधाने विचित्रे देशे भारतवर्षे अनेकानि पर्वाणि समायान्ति । तेषां पर्वणाम् नहि केवलम् पर्वदृष्ट्या महत्त्वमपि तु वैज्ञानिकदृष्ट्यापि अतिमहत्त्वमस्ति । अस्माकं ये पूर्वजाः तेषाम् इयम् विचित्रा सरणिः । सर्वे भारतीयाः धार्मिकाः धर्ममवलम्ब्य एव स्वजीवनम् यापयन्ति । ते स्वपन्ति धर्मदृष्ट्या, खादन्ति धर्मदृष्ट्या, पिबन्ति धर्मदृष्ट्या यत् किञ्चिदपि कुर्वन्ति तत्सर्वं धर्मदृष्ट्या एव । सत्यमिदं प्रतिभाति यत् धर्मेण ओतप्रोताः ये भारतीयास्तेषां जीवनम् । धर्मं परित्यज्य ते जीवनम् नेच्छन्ति । धर्मं विरहितं जीवनं पशुतुल्यं यथा आह—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आहार-निद्रा-भय-मैथुनं च
सामान्यमेतत्पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो
धर्मेण हीनाः पशुभिः समानाः ॥

दण्डभयेन भारतीयाः न किञ्चिदपि कर्तुमिच्छन्ति परन्तु धर्मभयेन प्राणानपि उत्सृजन्ति। अतएव यानि अस्माकं पर्वाणि तानि सर्वाणि धर्मपूर्वकाणि भवन्ति। विचारयन्तु भवन्तः यत् कियन्तः आदेशाः शासकैः प्रसारिताः तेषामवमानेन प्राणिनः दण्डयाः भवन्ति परन्तु सर्वे सहन्ते तान् आदेशान्। परं च ये आदेशाः धर्मपूर्वकाः तेषां गृहे गृहे सम्मानम् भवति। यथा ये प्राणिनः स्वकीयानि गृहाणि स्वच्छं न करिष्यन्ति तेषां गृहे लक्ष्म्याः आगमनमपि न भविष्यति। अनेन रूपेण यः आदेशः सः सर्वैरपि पाल्यते। पूर्वस्मिन् समये धर्मभयेन एव शासनकार्यमपि प्रचलति स्म नहि तत्समये कठोरशासकाः नियमाश्चासन्। परञ्च तान् नियमान् राजानः प्रजाश्च सम्यग्रीत्या धर्मभयेन परस्परहिताय कुर्वन्ति स्म। अत एवोक्तम्—

"न वै राज्यम् न राजासीत् न च दण्डो न दाण्डिकः।
धर्मेण शासिताः सर्वे रक्षन्ति स्म परस्परम् ॥"

प्रायः इदं कथ्यते यद् यस्मिन् दिने भगवान् रामचन्द्रः रावणं विजित्य अयोध्यां नाम्नीं स्वीयां राजधानीं कैकेय्या प्राप्तं चतुर्दशवर्षपर्यन्तं वनवाससमयं व्यतीत्य आगतः। अस्मादेव कारणात आनन्दोल्लासपूर्वकं पौरैः भगवतः रामचन्द्रस्य स्वागताय यत्र तत्र वीथिषु प्रासादोपरि तथा समस्ते नगरे घृतपूर्णाः दीपकाः प्रज्वालिताः। सा एव सरणिरद्युनापि भारतीयैः पाल्यते। अन्ये कल्पादिकालोयमिति कृत्वा दीपावलिर्भवतीति वदन्ति।

'तमसो मा ज्योतिर्गमय" अयं वैदिककालिकधर्मधुरीणवेदरक्षाव्रति शुद्धमनःपूतऋषीणामुद्घोषः प्रतिवर्षे मामुद्बोधयति दीपमालिकावसरे। अस्मिन्नेव दिवसे सर्वे प्राणिनः प्रसन्नतामनुभूय स्वकीये गेहे दीपं प्रज्वाल्य महोत्सवं कुर्वन्ति। ये केचन धनिकाः पुरुषास्ते सर्वे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

ऐश्वर्येण दीपमालिकायाः महोत्सवं कुर्वन्ति। परं ये निर्धनाः पुरुषाः तेऽपि अस्मिन् दिने धनिका इव परिलक्ष्यन्ते। नास्ति कश्चन धनिकाधनिकयोः भेदः अस्मिन् दिने।

अस्माकं चतुर्षु मुख्येषु महोत्सवेषु दीपमालिकोत्सवोऽत्यन्तमनोहरः। अस्मिन्नवसरे कार्त्तिकमासस्य सिते पक्षेऽमावस्यायां तिथौ रात्रौ षोडशोपचारैः पञ्चोपचारैर्वा सहालक्ष्मीगणेशौ सम्पूज्य यथाशक्ति सर्वत्र प्रतिगृहं प्रतिग्रामं प्रतिपर्णशालमट्टहाटघट्टेषु तथा भवनेषु च परितः सर्वस्मिन् विभागे द्वारदेशे पथि जलप्रणालीषु गवाक्षेषु तैलवर्तिसंयुक्ताः प्रदीपाः स्थाप्यन्ते। ग्राम्यवासिनः कृषकास्तु स्वस्वक्षेत्रेष्वपि दीपान् प्रज्वालयन्ति। अयं महोत्सवः व्यवसायस्य सम्पन्नतायाश्च सूचको। अत एव प्रसिद्धं दीपावलिः वैश्यानां व्यवसायिनां च पर्व। किन्तु भारतीयसंस्कृतिः व्यापकरूपेण भेदभावं विस्मृत्य सर्वाननुगृह्णाति। अस्मिन्नुत्सवे ब्राह्मणाः स्वविद्यां क्षत्रियाः शक्तिमैश्वर्यं च वैश्याः स्वव्यापारस्यायव्ययं लेखां पत्रपञ्जिकादिकं च नवीकुर्वन्ति।

अस्मिन् पर्वणि अमासाद् गृहाणां परिमार्जनं प्रलेपनं च भवति। तेन सर्वत्र स्वच्छता भवति। सर्वे मानवाः प्रसन्ना भवन्ति। क्वचित् क्वचित् द्यूतक्रीडाऽपि भवति। परन्तु इयं सर्वथा त्याज्या। अधुना बालानां कृते मृण्मयानि क्रीडनकानि गणेशलक्ष्म्योश्च प्रतिमाः बहुशः आपणेषु विक्रीयन्ते। रात्रौ दीपमालानां विचित्रा शोभा दृश्यते। तस्मिन् समये एवं प्रतिभाति यत् सर्वाणि नक्षत्राणि दीपमिषेण भगवतीसमाराधनतत्पराणि भूमण्डलमागतानि। यद्यपि अमायाः सूचीभेद्यं तमः अन्यासु अमास्वपि वर्तते, परन्तु अस्यां भगवत्याः लक्ष्म्याः प्रभाव एवं महिमापि ईदृशः यत् रात्रिः दिनमिवाभाति।

भौतिकसमृद्धिप्रदर्शनेन सहास्मिन्नुत्सवे धार्मिक-सांस्कृतिकमाध्यमेनाध्यात्मिकतायाः महान् समन्वयोऽस्ति। इदं भारतीयऋषीणां विदुषां च वैशिष्ट्यं यत् सर्वेषु पर्वसु सर्वेषां जनानां कृते सम्मिलितं कर्म निर्दिष्टम्। अतएव सर्वे उत्सवाः सम्मिलितरूपेण ब्राह्मणक्षत्रियवैश्यशूद्रैः मन्यन्ते। एषु पर्वसु नहि कश्चिद् भेदलवोऽपि वर्तते। स्नेहेन सौहार्देन सह सर्वे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
परस्परं स्नेहं प्रकटयन्तः पर्वसाफल्यं विदधति अन्योन्यं साहाय्यं च कुर्वन्ति।

व्रतकथासु पुराणगाथासु च दीपावल्याः कृतेऽनेके प्रवादाः सन्ति। तेषु लक्ष्म्याः। आवाहनं दरिद्रनिस्सारणं च प्रसिद्धमस्ति। वस्तुतस्तु लक्ष्मीपूजनं तस्याः दीपावल्याः महोत्सवस्य प्रधानमन्त्रः। सामवेदेऽपि लक्ष्मीपूजनं प्रसिद्धम्। भूमण्डले धनधान्यसमृद्धिदिशा पुरा कालादेव प्रसिद्धे भारतवर्षे लक्ष्मीपूजनं युक्तमेव। अत्र देशस्य समृद्ध्यर्थं शुभकामनया लक्ष्म्याः समादरः क्रियते। येन भारतीया जनता सम्पन्ना समृद्धा सुसंयुता च स्यात्। इदमेव तपोनिष्ठानामृषीणां संविधानम्। अनेन दीपावलिः खलु काञ्चनशोभां दर्शयन्ती राष्ट्रसम्पत्तिं सूचयन्ती 'तमसो मा ज्योतिर्गमय' इत्याध्यात्मिकं व्रतमपि स्मारयति।

अनया रीत्या यान्यस्माकं पर्वाणि तानि सर्वाणि महत्त्वपूर्णानि। वैज्ञानिकरीत्या अपि एषां महन्महत्त्वं वर्तते। यथा सर्वे जानन्ति यत् तैलेन सर्वे रोगाः नश्यन्ति। तथैवास्य धूमेनापि सर्वे रोगजनकाः कीटपतंगाः नश्यन्ति। ग्रामेषु सर्वे जनाः गृहं स्वच्छीकृत्य गोमयेन परिष्कुर्वन्ति। गोमयपरिष्कारेण गृहाणां शोभा अतिरमणीया भवति। गोमयस्यापि अतिमहत्त्वमस्ति अस्मद्-हिन्दूशास्त्रे। यथा अशुचौ जनाः पञ्चगव्येनात्मानं पवित्रयन्ति। नैरुज्याय गोमूत्रं पिबन्ति। गोमूत्रपानेन रोगाः नश्यन्ति। अतएव शुभपर्वसमये जनाः गोमयेनैव गृहमलंकुर्वन्ति।

अनेनैव प्रकारेणास्माकं यानि पर्वाणि तेषां पृष्ठभागेऽनेकाः तथ्यपूर्णाः किंवदन्त्यः संवलिताः। पूर्वजानामियं सरणिः विचित्रा एव। यत ये समये पर्वणां समन्वयमकुर्वन्। एभिः पर्वभिः अस्मासु सौहार्दं वर्धते। होलिकावसरे सर्वे मिलित्वा परस्परं प्रेम्णा कण्ठमाश्लिष्य स्नेहं तथा आशीर्वादं प्राप्नुवन्ति। इत्थं सर्वे पुरुषाः एकत्रीभूय महोत्सवं कुर्वन्ति। तेन जनानां परस्परं साहाय्यं दृश्यते। परन्तु अधुना न समीचीना दशा अवलोक्यते। आधुनिकाः स्वार्थवशीभूताः पूर्वजोक्तप्रकारेण महोत्सवं न कुर्वन्ति। अतएव सर्वत्र अशोभनीया दशा दृश्यते। अस्माकमिदमेव कर्त्तव्यं यत् स्वकीयैः पूर्वजैरुक्तमार्गोऽनुसर्तव्यः। अनया दिशया एवास्माकं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लाभो भविष्यति। मामेव दृष्ट्वा अस्माकं सन्ततिः स्वकार्यं करिष्यति। उक्तमिदम् भगवता श्रीकृष्णेन गीतायाम्—

'यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः"

अतएवेदमस्माकं परमं कर्त्तव्यं यत स्वपूर्वजानामादर्शं स्मृत्वा दीपावलिम् महता समारोहेण सम्पादयामहे। येन अयमुत्सवः वरदानरूपः भवेत्।

होलिकोत्सवः

अस्माकं पुण्यतमे पवित्रे भारतवर्षे अवसरेऽवसरे प्रायोऽनेकानि पर्वाणि भवन्ति तेषु होलिका, रक्षाबन्धनं, विजयादशमी, दीपमालिका च प्रधानास्ति। एभिरुत्सवैः सर्वे देशवासीयाः परस्परं संयुक्ता भवन्ति। अयमुत्सवः फाल्गुनमासस्य पूर्णिमायाः प्रारभ्य चैत्रकृष्णप्रतिपत् पर्यन्तं भवति। अयं तु माघशुक्लपञ्चमीतः प्रारभ्यते अतो वसन्तोत्सवः एवास्य प्रारम्भकालः। तदनन्तरं पूर्णिमायाः रात्रौ एकत्रीकृतं तृणसमूहं प्रज्वाल्य सर्वे ग्रामवासिनः नगरवासिनश्च अङ्गानि तापयन्ति। द्वितीयदिवसे तत्रैव गत्वा सर्वे नागरिकाः बालयुववृद्धाश्च एकत्रीभूय होलिकाभस्मधारणं कुर्वन्ति। गायन्तः वादयन्तः सर्वे जनाः प्रेम्णा अबीरगुलालकुंकुमैः रंगैश्च परस्परं क्रीडन्ति। कुत्रचित् बालाः जनानामुपरि रागान् प्रक्षिपन्ति। अस्मिन्नवसरे न कोऽपि उपेक्ष्यते। कुत्रचिदबीरं कुत्रचित् कज्जलं पंकमपि हास्येन मनोरंजनेन वा मुखेषु लेपयन्ति। वृद्धो वा स्यात् युवा वा स्यात् युवतिः जरठा वा स्यात् मंत्री-राजा रंको धनिको वा स्यात्। सर्वे होलिकोत्सवमधिकृत्य विभिन्नानि मनोरंजनात्मकानि क्रीडनानि सर्वे एव सहन्ते। न केऽपि कोपं भजन्ते। मध्याह्ने स्नात्वा शुभ्रं वाससमवधार्य परस्परं मिलन्ति। अस्मिन्काले नवपलाशपलाशवनरमणीये रसालकाननभिरामे ऋतुराजे वसन्ते होलिकोत्सवः महतोत्साहेन विशालेन सम्भारेण महीयसा मोदेन प्रतिगृहं प्रतिग्रामं सर्वत्रैव समुल्लसतितराम्। प्रायेण सर्वत्र नवान्नं क्षेत्रेषु जायते। नवान्नभोजनस्योपलक्ष्ये अयमुत्सवः भवति। एका अपरा पौराणिकी कथाऽपि प्रचलिता। यत् अस्ति कश्चिद्धिरण्यकशिपुनाम्नः विष्णुविरोधिदैत्यस्य प्रह्लादनामको विष्णु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
भक्तः पुत्रः। तस्यातीव भक्तिं दृष्ट्वा तम् मारयितुं होलिकानाम्नीं मायाविनीं भगिनीमाहूय हिरण्यकशिपुस्तं तस्या अङ्के आरोप्याग्नौ प्रक्षेपयामास। परन्तु प्राप्तवरा सा वराकी राक्षसी भस्मीभूता। भगवतः प्रसादात् स वह्निज्वालावलीढोऽपि नितरां सुरक्षितो बभूव। ततः प्रभृत्येव जनाः इदम् होलिकादहनमधिकृत्य महान्तमेकं समुत्सवं सम्पादयन्ति।

अस्मिन्नुत्सवे महानानन्दो भवति। सर्वेषां प्रमोदः सम्मेलनं च भवति। होलिकोत्सवः फाल्गुणी इति नाम्नाऽपि कथ्यते। 'फलं गुणतीति फाल्गुणी' अर्थात् यः उत्सवः फलस्याभिवृद्धिं करोति। अयं नामाधिकः सार्थकः प्रतीयते। अस्मिन् समये क्षेत्रेषु पक्वयवगोधूमाः शोभायमानः भवन्ति। यान् दृष्ट्वा कृषकस्य मनः अतीवानन्देन परिपूर्णं भवति।

केचन जनाः विचारयन्ते यत् होलिकोत्सवः शूद्रस्योत्सवः अस्ति, किन्तु इदमुचितं नास्ति। इदम् भारतस्य महत् राष्ट्रियं पर्व अस्ति। सर्वे जनाः स्वपूर्वं वैरं विस्मृत्य परस्परं कण्ठालिंगनं कुर्वन्ति। अनेन प्रकारेणेदं पर्वं राष्ट्रियैएकतायाः मुख्यतमं साधनमस्ति। अस्मात् अनेकाः कुरीतयः अपि भवन्ति। केचन जनाः इष्टिकाः प्रस्तरानपि अन्यस्योपरि क्षिपन्ति। स्वच्छन्दरूपेणामोदप्रमोदं कुर्वन्ति काचिद्दुर्भावनाऽपि जनानां हृदयेषु न आयाति। ते मादकद्रव्याणि सेवनं कृत्वा परस्परं विरोधं कुर्वन्ति। इयम् रीतिः अतीवनिन्दनीया। व्रजमण्डले होलिकोत्सवः महता समारोहेण सम्पाद्यते। अधुनास्माकमिदं कर्त्तव्यं यत् अयं होलिकोत्सवः राष्ट्रियरूपेण सम्पाद्येत। होलिकोत्सवः वर्षस्य प्रधानोत्सवः। अतएव अयं जनानां हृदयेषु नवोत्साहोल्लासञ्च वर्धयति। अस्मिन् समये मानवहृदयस्थाः मलिनाः भावनाः दूरीभवन्ति। ते महता हर्षोल्लासेन नवागतस्य वर्षस्य स्वागतं कुर्वन्ति।

अयमुत्सवः मनोवैज्ञानिकरूपेणाधिकः महत्त्वपूर्णः अस्ति। अयमन्येषां जनानां मध्ये पारस्परिकस्नेहमुत्पादयति। सर्वे मानवाः एकत्रीभूय नवजीवनं प्रति मंगलकामनां कुर्वन्ति। अनेनोत्सवेन मानवस्य पारिवारिकः, सामाजिकश्च विकासयोग्यः भवति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विजयादशमी

अस्माकं चतुर्षु पर्वसु विजयोत्सवः विजयादशमी वा जनैः संकीर्त्यते। उत्सवोऽयं भारतीयराष्ट्रियोत्सवेषु मुख्यतमः। अयन्तु अश्विनमासस्य शुक्लपक्षे दशम्यां तिथौ भवति। अयमुत्सवः क्षत्रियाणामिति कथ्यते। यतो हि— पुरा किल भगवान् मर्यादापुरुषोत्तमः दशरथनन्दनः श्रीरामचन्द्रः प्रवर्षणपर्वतात्सेनां संचाल्य अस्यामेव तिथौ राक्षसराजस्य रावणस्योपरि विजयाय प्रस्थानमकारि। सत्यमिदं स्यान्नवा यतो हि आसीदेकः महाव्रतेतिनामकः आर्याणां महोत्सवो यः पुरा वैदिककालेऽपि प्रचलित आसीदिति केषां च न विदुषां मतम्। परन्तु इदं निस्सन्देहास्पदं यदयं महोत्सवोऽद्यापि निजं पुरातनं गौरवमक्षुण्णं रक्षन्नास्ते। अधुनाऽपि उत्तरभारतेऽन्यत्रापि क्षत्रियाः परम्परानुसारमस्य समारोहं कुर्वन्ति। नृपाः क्षत्रियाश्चास्मिन्दिने शस्त्रपूजनं सीमोल्लंघनं च कुर्वन्ति। महता समारोहेण सैन्यसृजनं कृत्वा प्रदर्शनाय शोभायात्रां कुर्वन्ति। परन्तु अधुना धर्मविरहिते धर्मनिरपेक्षराज्ये शस्त्रपूजनं सीमोल्लंघनं च न भवति। अयं महान् प्रभावोऽस्य समयस्य।

अस्मिन् पक्षे प्रतिपदमारभ्य शारदीयनवरात्रं भवति। दुर्गापूजनपूर्वकं नवदिनं यावत् दुर्गासप्तशत्याः पारायणं भवति। नवमीं यावत् महाशक्तेः भगवत्याः दुर्गायाः विशेषपूजनं सम्पाद्यते। मुख्यतः महाकाली-महालक्ष्मी महासरस्वतीति-त्रिविधरूपायाः भगवत्याः शक्तेस्तामस-राजस-सात्त्विकेतिगुणत्रयस्य प्रतिष्ठापिकायाः आदिशक्तेः भगवत्याः दुर्गायाः अस्मिन् पक्षे शक्तिसमाराधनं क्रियते। वंगदेशीयाः दुर्गापूजनं महता समारोहेण सम्पादयन्ति। सर्वे जनाः एकत्रीभूयास्मिन्दिने महाशक्तेः दुर्गायाः प्रतिमां संस्थाप्य तस्याः आराधनां कुर्वन्ति। तदनन्तरं महाजनसमारोहेण सह तस्याः प्रतिमायाः विसर्जनं कुर्वन्ति। इदं तु प्रायः शाक्त-वैष्णव-स्मार्तानामपि समूहे भवति।

अस्मिन्नेव पक्षे उत्तरभारतेऽन्यत्रापि च रामकथामवलम्ब्य रामलीला क्रियते। दिवसेषु रात्रिषु वा अभिनयरूपेण भगवतः रामस्य कथाः क्रियन्ते। ताम् रामलीलां द्रष्टुं महान् जनसंमर्दः एकत्रीभवति। दशम्यां तिथौ रावणवधः भवति। अस्मिन् दिने काष्ठतृणनिर्मितां रावणप्रतिमां प्रज्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लयन्ति। तस्याः रावणस्य प्रतिमायाः ज्वलनमसंख्यजनाः द्रष्टुमायान्ति। अनेन महती शिक्षापि उपलभ्यते यत् ये पुरुषाः स्वधर्मान् परित्यज्याधर्मस्याचरणं कुर्वन्ति स्वमर्यादाञ्चोल्लङ्घयन्ति तेषामियमेव दशा भवति। अतो-मर्यादोल्लंघनं न कर्त्तव्यं कदाचिदपि। अयमुत्सवः प्रायः ग्रामे ग्रामे भवति। नगरेष्वपि च महता जनसंमर्देन भवति। विविधवस्तुविक्रेतारः समागत्य स्वस्ववस्तूनि विक्रीणन्ति।

अयं विजयादशमी नामकः-उत्सवः रामकथामाश्रित्य दुर्गासप्तशतीकथामाश्रित्य वा भवतु। परन्तु द्वावेव अन्यायस्योपरि न्यायस्य विजयं सूचयतः। केचिद् वदन्ति यदनार्याणामुपरि आर्याणां विजयस्य प्रतीकमेतत्। दुर्गायाः असुरदैत्यानामुपरि विजयः भौतिकीं सांसारिकीं तामसीं प्रकृतिं विजित्य सात्त्विकी माध्यात्मिकीं शक्तिं स्थापयति। अत्र सर्वस्मिन् प्रतीके असतः पराजयः सतः विजयो वर्त्तते। सर्वमेतत् "असतो मा सद्गमय, तमसो मा ज्योतिर्गमय" इति शिक्षां ददाति। अस्माकमिदं परमकर्त्तव्यं यदस्मिन् सांस्कृतिकोत्सवावसरे न केवलं मनोरजनं कृत्वा तिष्ठेम अपितु तत्सन्देशं मनसि निधाय चिन्तयेम वा। मनसा तस्य संदेशस्य चिन्तनं कृत्वा तत्पश्चात् वाण्या कर्मणा वा कार्यं कर्तव्यम्। परम्पराप्रसिद्धां कथामपि समाश्रित्य तद्रहस्यचिन्तनेन तदनुसरणेन च कल्याणं जायते। विजयं स्मृत्वा जीवनसंग्रामे विजयं लभेय इति कल्पनीयम्। अयमेव विजयादशम्याः पर्वण आदर्शः।

रक्षाबन्धनम्

अस्माकं पवित्रे यज्ञभूमौ आर्यावर्ते भारतवर्षे चत्वार एव प्रधानाः महोत्सवाः समये समये वर्षस्य मध्येऽतीव समारोहेणाहिमालयात् कन्यान्तरीपं यावत् अंग-वंग-कलिंग-सौराष्ट्र-मगधेषु तत्तद्देशेषु सर्वत्रैव समानरूपेण सम्पाद्यन्ते। तथा हि रक्षाबन्धनं, विजयादशमी, दीपावलिः होलिका च। भारतीयमासगणनाया मध्येऽस्ति श्रावणो मासोऽस्यैव पूर्णिमायां प्रतिवर्षं महता समारोहेण प्रायः वैदिकधर्मधुरीणाः आर्याः ब्राह्मणक्षत्रियवैश्यशूद्राः सर्वे उत्साहपूर्वकं कुर्वन्ति इदं कृत्यम्। भारतीयशास्त्रकारैरनेकसंस्कृतधार्मिक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्यानि निर्मितानि तैः बहवो लाभाः सन्ति। प्रायः एतेषु कृत्येषु सामूहिक-कर्मकाण्डविधानं वर्तते। सर्वस्मिन्नपि कृत्ये भस्मधारणं रक्षाबन्धनं च भवति। रक्षाबन्धनं तु एकतायाः प्रतीकमस्ति।

अस्मिन्दिने प्राचीने भारतवर्षे गुरु-शिष्याः कस्याश्चिन्नद्याः विशेषतः देवनद्याः भागीरथ्याः तटमुपगम्य अथवा जलाशयस्यैव तटं प्राप्य सामूहिक-रूपेण विविधौषधिभिः विलेपनं कृत्वा वैदिकमन्त्रैरभिषिच्य महास्नानं कृत्वा विधिवत् ऋषिदेवगुरून् सम्पूज्य वर्षपर्यन्तस्य कृतस्य ज्ञाताज्ञातदुष्कर्मणः प्रायश्चित्तं कुर्वन्ति। तदनन्तरं यथाशक्ति दानदक्षिणां दत्त्वौषधिमिश्रितयज्ञ-भस्म रोगविनाशाय अंगे धार्यन्ते। रक्षासूत्रमग्नौ प्रताप्य दक्षिणहस्ते धारयन्ति। सम्प्रति तु ब्राह्मणाः एव कल्याणकामनया द्रव्याभिलाषेण च यत्र-तत्र गत्वा सूत्रं च बध्नन्ति। इदं तु श्रावणमासस्य पूर्णिमायां वर्षतौ भवति स्म।

आषाढानन्तरं रक्षाबन्धनं भवति। इयं प्रणाली ऋषिकुले प्राचीन-समये आसीत्। अधुना तु केवलां पद्धतिमनुसरामः। इदं पर्व तु केवलं ब्राह्मणानामथवा भ्रातृभगिन्योर्मध्ये अस्ति। प्रायः भगिन्यः अस्मिन् पर्वणि स्वभ्रातॄणां हस्ते रक्षासूत्रं बध्नन्ति तथा भ्रातरः द्रव्यादिदानैः भगिनीं परितोषयन्ति। इत्थमेवाधुना प्रायः रक्षाबन्धनं सम्पाद्यते। धर्मकृत्यस्वरूपं रक्षाबन्धनं त्विदानीं श्रोत्रियब्राह्मणेषु अथवा कतिपयधर्मात्मसु सीमा-बद्धमभवत्। परन्तु यद्यहं विचारयामि तदस्य सूत्रस्य महन्महत्त्वं वर्तते। अनेन सूत्रेण सर्वे देशवासिनः प्राणिनः एकसूत्रीभूय परस्परं साहाय्यं सहानुभूतिं चानुभवन्ति। अनेन सम्पूर्णं राष्ट्रमेकमेव प्रतीयते। अयं गुणः क्षीणः लघु सन्नपि महागुणं धारयति।

यदपि प्रत्येकदशायां श्रावणीयज्ञसूत्रं रक्षाबन्धनसूत्रं वा भवतु किन्तु एतत् परस्परमेकतायाः प्रेम्णः सहयोगस्य पवित्रतायाश्च सूचकमस्ति। अनया परम्परया देशस्य। समाज शक्तिः वर्धते। अस्योत्सवस्य प्रवर्तकाः अस्माकं दूरदर्शिनः पूर्वजाः धन्यवादार्हाः यैः अस्माकमेकसूत्रीकरणाय इदं पर्व प्रचालितम्। सम्प्रति अस्माकमिदं कर्त्तव्यमस्ति यद्रक्षाबन्धन-स्यान्तरिकं तत्त्वं संकेतञ्च ज्ञात्वा एकतायाः सूत्रे सम्बद्धाः भवेम।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वसन्तः

महदिदं नः सौभाग्यं यदस्माकं देशे समये समये जनां मोदाय नवचेतनां दातुं प्रकृतिः नववधूरिव ऋतुरूपेण समायाति यथा कश्चन नटः प्रेक्षकान् मोदयितुं रङ्गमञ्चे आयाति। तथैव इमे ऋतवोऽपि। एषः वसन्तर्तुः अतीव मनोहरः अतो वसन्तः ऋतूनाम् राजा इति कथ्यते। अस्यागमस्य वर्णनं कृतं महाकविना कालिदासेन ऋतुसंहारे—

प्रफुल्लचूताङ्कुरतीक्ष्णसायकः द्विरेफमालाविलसद्धानुर्गुणः।
मनांसि वेद्धुं सुरतप्रसंगिनां वसन्तयोद्धा समुपागतः प्रिये॥

यथा कश्चन वीरः धनुर्गुणस्योपरि शरं निधाय हृदयानि वेद्धुं समायाति तथैवायं वसन्तः। बाणसदृशात् प्रफुल्लितानाम्राङ्कुरान् भ्रमरमालाभिः युक्तं धनुर्गुणं सन्धाय समागतः। आगते सति वसन्ते सर्वे वनस्तपयः नवपल्लवैः नवाङ्कुरैश्च शोभिताः भवन्ति। प्रायः सर्वेषां वृक्षाणां पुष्पसमृद्धिः इदानीमेव भवति। अयं गन्धवान् सुरभिमासः प्रचुरमन्मथः मनोहारी च भवति

सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः।
गन्धवान् सुरभिर्मासो जातपुष्पफलद्रुमः॥

आम्रवृक्षेषु मञ्जर्यः शोभन्ते। सुगन्धितवायुप्रवाहेण सर्वाः दिशः सुगन्धिताः भवन्ति। इदं सर्वं सौन्दर्यरूपं विलोक्यैव महाकविना माघेनोक्तम्—

नवपलशपलाशवनं पुरः स्फुटपरागपरागतपंकजम्।
मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोहरैः॥

कुसुमोत्कटाः विविधाः काननद्रुमाः वायुवेगप्रचलिताः वसुधां पुष्पैराच्छादयन्ति। मारुतः समन्ततः पतितैः पतमानैः पादपस्थैः पुष्पैः सह क्रीडां करोति। पवनविक्षिप्ताः पादपाः गुञ्जद्भिः षट्पदैः प्रगीताः इव भान्ति। चन्दनशीतलः श्रमापनयनोऽनिलः गन्धमभ्यवहरन् वाति।

अस्मिन्नृतौ नहि केवलं वृक्षेषु एव नवजीवनसंचारो भवति अपितु प्राणिनां शरीरेष्वपि नवरक्तसंचारो भवति। सर्वेषां मनसि नवचेतना,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नवीना भावना, नूतनमादकता चोत्पद्यते । अस्मिन् समये मदलोलुपाः भ्रमराः रसान्वेषणाय रसपानाय च स्वकीयाभिः भ्रमरीभिः सह पुष्पपुष्पेषु गुञ्जन्त्यः भ्रमन्ति । अतो माघेनोक्तम्—

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

इदानीं वन-वाटिका-क्षेत्रेषु सर्वत्र हरीतिमा कुंजलतागुल्माम्रोद्यानेषु मुहुर्मुहुः कोकिलानां विरावः श्रूयते । सर्वत्र क्षेत्रेषु सर्षपातसीचणकयव-गोधूमानामन्येषां धान्यपादपानां च पुष्पराशयो विलसन्ति । कनकप्रभां गोधूममञ्जर्यः किञ्चिदालम्बिताः शोभन्ते—

सुपुष्पिताः कर्णिकारवृक्षाः पीताम्बरधारिनराः इव सर्वतः भान्ति । कृषकाः सम्प्रति प्रफुल्लितानि नवान्नयुक्तानि स्वक्षेत्राणि दर्शं दर्शं हर्षिताः भवन्ति । अस्मिन समये विविधसुगन्धियुक्तद्रुमाणामाकम्पितपुष्पगन्धिः पवनः सर्वेषां चित्तमुन्मादयति ।

वनस्थली वारस्त्रीव नवनवां शोभां धारयति । इन्दुकलास्पर्धि केसरं किंशुककलिकान्तर्गतं भाति । वनस्थलीवसन्तयोः विवाहावसरे पिकद्विजः मुहुर्मुहुः मंगलमन्त्रमुच्चारयति । पल्लविते आम्रे स्थित्वा कोकिलः मधुर-स्वरं कूजन् कामिनीनां चित्तमाकर्षति । लतावध्वः तरूणां विनम्रशाखा-भुजबन्धनानि प्राप्ताः । सर्वत्र तडागस्य जले विकसितकमलानि शोभितानि । तेषामुपरि भ्रमराः गुञ्जारवं कुर्वन्ति । यथोक्तम्—

न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहार यन्मनः ॥

आम्राङ्कुरास्वादकषायकण्ठः पुंस्कोकिलः मधुरं शब्दं कूजति । पुष्प-भाराक्रान्तोऽशोकवृक्षाः वियोगिनीनां हृदयेषु शोकं संजनयन्ति । वसन्तः ऋतुः मधुकराञ्जननेत्रा काचिन्नायिकेव मुखे मधुश्रीतिलकं प्रकाश्य स्वप्रवालोष्ठम् बालारुणकोमलेन रागेण रञ्जयित्वा शोभितो भवति । मन्मथः स्वक्रूरैः निशितशरैः पान्थान् पीडयति । सुरम्यां वनस्थलीं दृष्ट्वा पथिकः किंशुक-कुसुमाङ्कुशेन भृतः मदोन्मत्तः द्विपः इवोन्मादं वहति । विलासवनस्थलीमव-लोक्य पथिकः तत्र विश्रम्य स्वखेदमपवारयन्ति । वने पथि पथि लतालोला-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
क्षीभिः मधुसीकरं स्रवन्तं कुसुमनिकरं वर्षन्तीभिः वसन्तसमीरणः मन्दं मन्दं प्रवहन् पथिकानां भ्रमवशान्निःसृतं स्वेदकणं मार्जयन्ति । तस्य मकरन्दः सर्वासु दिक्षु प्रसरति—

लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन्किरति मकरन्दं दिशि दिशि ॥

अस्मिन्नृतौ वसन्तपञ्चमी नाम्ना उत्सवः भवति । अयम् 'श्रीपञ्चमी' इति नाम्नापि कथ्यते । अस्मिन् समये पीतवस्त्राणि धृत्वा भ्रमन्तः जनाः वसन्तगीतञ्च गायन्तः मोदमानाः यत्र तत्र विचरन्ति । वसन्ते सर्वा दिशः प्रसन्नाः भवन्ति । शीतल-मन्द-सुगन्धिर्वायुर्वाति । वसन्तकाले शीतग्रीष्मयोः सम्बन्धो भवति । वसन्त एवार्याणां प्रायेण सर्वाणि संस्कारयोग्यानि कार्याणि भवितुं प्रारभन्ते । साहित्ये सर्वेषामृतूनामपेक्षया वसन्तस्य वर्णनमधिकं दृश्यते । प्रायः सर्वैः कविभिः ऋतुवर्णनं कृतं परन्तु माघेन कालिदासेन च कृतं वसन्तवर्णनमतीव मनोहारि ।

अयं समयः सौन्दर्यदृष्ट्या, अन्नस्योत्पत्तिदृष्ट्या जनानां जीवानां च स्वास्थ्यदृष्ट्या जलवायुदिशा कार्यसौकर्यदृष्ट्या सर्वोत्तमः । एतत्सर्वं समालोच्यैव महर्षिभिः अयं राज्ञः पदेऽभिषिक्तः । अयं ऋतुः संवत्सरस्यालंकार इव भाति । महाकविः कालिदासः कथयति यत् अयं वसन्तः वः मुदं वितरेत यथा—

आम्रो मंजुलमंजरीवरशरः सत्किंशुकं यद्धनु-
र्ज्या यस्यालिकुलं कलंकरहितं छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृतो यद्बन्दिनो लोकजित्
सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ग्रीष्मः

अस्मिन्नसारे खल्वपारे परिवर्तिनि नश्वरसंसारे सर्वं क्षणिकं नास्ति कस्यापि चिरस्थायिता। सर्वे अत्रायान्ति यान्ति च। अयं क्रमः नहि केवलमस्मादृशानां प्राणिनां कृतेऽपि तु स्थावराणां कृतेऽपि इति मत्वा यदा वसन्तस्याल्पसुखदायिनी अचिरांशुविलासचंचला शोभा अस्मन्नयनानि मधुश्रीभिः पिधाय याति। तदैव वृषराशिस्थितः सहस्ररश्मिः स्वकीयैः सहस्ररश्मिभिः विकरालज्वालजालानि वर्षयन् आकाशमण्डले तीव्रवेगेन वर्षेण छिन्नान् मन्दारवृक्षान् विकासयन् समायाति। अयमेव ग्रीष्मस्य समयः। स्मारं स्मारं ग्रीष्मशोभां कश्चित् प्रियः स्वकीयां प्रियां संबोध्य मधुराक्षरैः शब्दायते—

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षम-वारिसंचयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालोऽयमुपागतः प्रिये॥

आगतोऽयं ग्रीष्मर्तुः। अस्मिन् ऋतौ प्रचण्डा रवेर्भा भवति। ऊष्मणाऽभिसंतप्ताः जनाः सर्वदा शीतांशुशालिनममृतवर्षिणं चन्द्रमभिलषन्ति। भास्करकिरणैः पृथिव्याः सम्पूर्णं जलं शुष्कं जातम्। इदं ग्रीष्मस्य वर्णनं कृतं केनचित् कविना—

अत्युष्णा ज्वरितेव भास्करकरैरापीतसारा मही
यक्ष्मार्ता इव पादपाः प्रमुषितच्छाया दवाग्न्याश्रयात्।
विक्रोशन्त्यवशाद्विवोच्छ्रितगुहा व्यात्तानना: पर्वता—
लोकोऽयं रविपाकनष्टहृदयः संयाति मूर्च्छामिव॥

ग्रीष्मस्य प्रचण्डातपेन सम्पूर्णः लोकः मूर्च्छामिव प्राप्तः। सम्प्रति समुद्गतस्वेदचितांगसन्धयः जनाः गुरूणि वस्त्राणि विमुच्य तन्वंशुकं निवेशयन्ति। अधुना मही प्रचण्डसूर्यातपतापिता तथा असह्यवातोद्धतरेणुमण्डलयुक्ता भवति। तापिता पृथ्वी ज्वरिता तथाऽङ्गारचिता इव भाति। वायुः अभितः तिग्मांशोः करैः ज्वालाकरालं कुकूलानलमिव विकिरति सरिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मम्भांसि स्वतापेन नखं तापयन्ति। सर्वाः दिशः ज्वलन्त्यः प्रतिभान्ति। सम्पूर्णं जगत् वनवह्निदीपितमिव भवति। रूक्षपवनाः सिकताग्निचूर्णैः जगत् अवकिरन्ति। पर्वताः परुषैः पलाशपुष्पैः संस्वेदयन्ति। इदं वर्णितं महाकविना भासेन स्वाविमारके नाटके—

लिम्पन्ति रूक्षपवनाः सिकताग्निचूर्णैः
संस्वेदयन्ति च नगाः परुषैः पलाशैः।
दावैर्द्रवीकृततनुः स्रवतीव भास्वा-
नादित्यपाकचलितः फलतीव लोकः॥

ग्रीष्मे सर्वे तडागाः शुष्काः जाताः। अतः सर्वे मृगाः पक्षिणश्च इतस्ततः जलमन्वेषयन्तः प्रधावन्ति। ते प्रायः अशेषां वसुधां चरित्वा तरूणाम् छायासु विश्रम्य स्वश्रान्तिं व्यपनयन्ति। सर्वे राजानः ग्रीष्मस्य चण्डेनातपेन संतप्ताः स्वधारागृहेषु शरणमवाप्नुवन्ति, निदाघे अनलवर्षि गगनं कोपाकुलस्य नृपस्य मुखमिव दुःप्रेक्ष्यम्—

दुःप्रेक्ष्यमुच्चैर्गगनं निदाघे
कोपाकुलस्येव मुखं नृपस्य।
हरेः शयानस्य मृणालबुद्ध्या
कर्षन्ति पुच्छं करिणः करेण॥

दिवसेश्वरस्य किरणैः संतापिताः प्राणिनः अनातपं देशं मृगयन्ति किन्तु वृक्षाणां छाया वियोगिवनितेव कृशत्वं गता। सूर्यः दुर्वचनैरिव करैः सर्वान् दहति। राजहंसाः चण्डमार्तण्डातपात् तापिताः सितजलजतलस्थाः राजन्ते। मध्याह्ने कोऽपि सूर्यमण्डलं प्रत्यवलोकयितुं न समर्थः। मध्याह्ने गगनमण्डलस्य मध्यस्थिते दिवसनाथे छायापि छायामिव वाञ्छन्ती तरुतलानि गता।

अस्मिन्नृतौ समस्तं जगत् तपोवनमिव दृश्यते। सर्वे जन्तवः स्वकीयं पारस्परिकं जन्मजातं वैरभावं विस्मृत्य एकशः सामर्थ्यरहिताः कस्यचित् तरोरधः शीतलायां सुखदायिन्यां छायायामेकत्रीभूय कष्टेन क्षणं क्षपयन्ति। सर्वे जनाः सूर्यातपेन दुःखमनुभूय सततं शीतलां छायामन्वेषयन्ति। यदा कदा वायुरपि न वाति तदा तु इत्थं प्रतिभाति यत् वायुरपि प्रचण्ड-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूर्यस्य किरणैः सन्तापितो भूत्वा कुत्रचित् शीतस्थाने छायामन्वेष्य स्थित्वा शीतलतां सेवते। वने रवेर्मयूखैरभितापितः पथि तप्तपांसुभिः भृशं दह्यमानः सर्पः छायामिच्छन् मुहुः श्वसन् मयूरस्य तले निषीदति।

यदा ग्रीष्मेणाभितप्ताः जनाः स्वकीये शीततापनियन्त्रिते जलयन्त्र-युक्तमंदिरे सुखं स्वपन्ति तदा कृषकाः सेवकाः भृत्याश्च स्वोदरपूर्तये तप्त-मार्गेषु नग्नपादा भारान् वहन्ति। तेषां कृते कुतो ग्रीष्मः कुतो शीतः। ते उद्योगिनः पुरुषाः सुखदुःखमविगणय्य स्वकार्यमहर्निशं कुर्वन्ति।

संध्यासमये ग्रीष्मस्य प्रचण्डता मन्दायते। जलावगाहनं सुखकरं प्रतीतं भवति। सर्वेऽभितप्ताः पक्षिणः जलावगाहनाय तडागे प्रविशन्ति। अस्मिन् समये पाटलसंसर्गसुरभिवनवाताः मन्दं मन्दं वान्ति। अतएव चण्डातपेन मूर्च्छितेषु प्राणिषु चेतना आयाति। ते सर्वे स्वालस्यं परित्यज्य कार्येषु मग्नाः रताश्च भवन्ति।

यस्मिन् शिरीषरजसां कान्तयः सूर्यतुरङ्गतनूरुहतुल्यतां दधति। असौ शुचिः ग्रीष्मः नवमल्लिकाः चिरसौरभसम्पदः विदधत् उपाययौ। यथोक्तं कविना माघेन—

दलितकोमलपाटलकुड्मले निजवधूश्वसितानुविधायिनि।
मरुति वाति विलासिभिरुन्मदभ्रमदलौ मदलौल्यमुपाददे॥

ग्रीष्मर्तौ सहस्ररश्मेरंशवः अधिकं भासन्ते। अल्पायासेनैव शरीरे मुक्ता-कणसन्निभाः स्वेदकणाः निर्गत्य शोभां वर्धयन्ति। क्षीयतेऽम्बुवेगः नदीनाम्, विशालाः अनुल्लंघनीयाः नद्यः सुतराः अल्पकायाकल्पिताः भवन्ति। आम्रजम्बूमधूकानां शोभा अस्मिन् ऋतौ अधिका भवति। ग्रीष्मस्य प्रारम्भे मधूकवृक्षाः द्राक्षासमैः स्वकीयैः मधुरफलैः दीनान् परिपालयन्ति। व्यतीते च काले आम्रजम्बू-तानि भुक्त्वा जनाः हृष्टाः पुष्टाश्च भवन्ति। व्यतीते च काले आम्रजम्बू-फलानि अधिकानि भवन्ति। अतएव अन्ते ग्रीष्मस्य यशः अनेनैव कथितम्—

स्फीतं शीतं गतं क्व क्व शिशिरकणः क्वास्ति हेमन्तमासः,
क्वास्ते पानीयपूर्णो मलिनजलधरः क्वाद्य विद्युत्प्रमोदः।
इत्युच्चैर्जल्पमानैरिव मुखरमुखैर्झिल्लिदूतैरुपेतो,
व्रातौघश्चागतोऽसौ प्रकटितविजयस्तम्भचिह्नैर्निदाघः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वर्षा:

एककण्ठीभूय सर्वैः जनैः वसन्तः 'ऋतुराजः' इति कथ्यते। परन्तु सचिव इव विना राजा किमपि कार्यं कर्तुं न शक्नोति। अतएव वर्षर्तुः ऋतुराजस्य मंत्री। यतो हि सर्वेषां ऋतूनां समृद्धिः वृद्धिश्च वर्षाधीना एव। वर्षा नहि केवलम् प्राणिनामुपकारकर्त्री अपितु स्थावराणां तरूणां वननदीतडागानां क्षेत्राणाञ्च जीवनाधायिनी। वर्षा विना कस्यापि समृद्धिः भवितुं नार्हति। वर्षाभावे सर्वं शून्यं भविष्यति। यदा सूर्योष्मणा सर्वे जनाः अभिसंतप्ताः दुःखिताः व्याकुलाः भवन्ति तदा अयं मन्त्रिमहोदयः सर्वान् जनान् दुःखितान् दृष्ट्वा दुःखनिवारणाय राजा इव समायाति यथा—

सशीकराम्भोधरमत्तकुंजरस्तडित्पताकोऽशनिशब्दमार्दलः।
समागतो राजवदुद्धतद्युतिर्घनागमः कामिजनप्रियः प्रिये॥

ग्रीष्मचण्डातपात् घर्मपरिक्लिष्टा पृथ्वी वर्षाभ्यो नववारिपरिप्लुता हर्षमनुभूय वाष्पं विमुञ्चति। नभः गिरिसन्निभान् मेघान् दधत् जलागमस्य समयम् शसति। भास्करस्य किरणैः समुद्राणां रसं पीत्वा नवमासधृतं गर्भरूपं तद्रसायनं प्रसूतम्। सायंकाले संध्या चन्दनरञ्जितम् सन्दमारुतनिःश्वासं प्रकटयन आपाण्डुजलदमम्बरं कामातुरनरः इव भाति। संध्यारागोत्थितं पाण्डुभिः जलदैः शोभायमानमम्बरं बद्धव्रणमिव भाति। यथा—

संध्यारागोत्थितैस्ताम्रै रन्तेष्वपि च पाण्डुभिः।
स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवाम्बरम्॥

मेघैरावृतः वर्षाजलधाराभिः युक्तः पर्वतः कृष्णाजिनधरः यज्ञोपवीती ब्रह्मचारी इव भाति। नीलमेघाश्रिता स्फुरन्ती विद्युत् क्वचित् क्वचित् प्रकाशं करोति। प्रकीर्णाम्बुधरं नभः क्वचित् प्रकाशयुक्तं क्वचिदप्रकाशयुक्तं भवति—

क्वचित् प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति।
क्वचित् क्वचित्पर्वतसन्निरुद्धं रूपं यथा शान्तमहार्णवस्य॥

शैलेन्द्रकूटाकृतिसन्निकाशाः मेघाः समुदीर्णनादाः संयुगस्थाः मत्ताः गजेन्द्राः इव गर्जन्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्षाकाले शुष्का वनश्रीः हरितपरिधानं धारयति। भूमिः नवशाद्वलेन पूर्णा भवति। वर्षोदकाप्यायितशाद्वलानि अधिकं विभान्ति। वर्षप्रवेगाः वाताः समुदीर्णवेगाः वान्ति। प्रणष्टकूलाः नद्यः विप्रतिपन्नमार्गाः भूत्वा शीघ्रतरं वहन्ति। वने क्वचिद् भ्रमराः गुञ्जन्ति, क्वचित् मयूराः नृत्यन्ति, क्वचित् मत्ताः गजेन्द्राः पशवश्च विचरन्ति। पत्रपुटेषु लग्नं सुनिर्मलं सलिलं मुक्तासममिव भाति। घनानां शब्दं श्रुत्वा भेकाः चिरसन्निरुद्धां निद्रां विहाय-प्रबुद्धाः जाताः।

अस्मिन्नृतौ नद्यः वहन्ति, घनाः वर्षन्ति, मत्तगजाः नदन्ति, वनान्ता भान्ति, प्रियाविहीनाः ध्यायन्ति, शिखिनः नृत्यन्ति, प्लवङ्गमाः समाश्वसन्ति च। साम्प्रतं वर्षाधाराभिः सर्वाणि तडागसरोवराणि पूरितानि भवन्ति। मेघाः गर्जन्ति वर्षान्ते च। तेषां जलकणैः मालतीपुष्पोपविष्टानां भ्रमराणां नीलवर्णस्य शोभा श्वेतवर्णे परिवर्तिता। यथा—

नवपयःकणकोमलमालतीकुसुमसंततिसंततसङ्गिभिः।
प्रचलितोडुनिभैः परिपाण्डिमा शुभरजोभरजोऽलिभिराददे॥

मेघः स्वध्वनिभिः मयूरान् नर्तयति। प्रावृषि गगनमण्डले सुरेन्द्रचापं विभाव्यते। मकरध्वजः यूनां चित्तमुत्कण्ठयति। अस्मिन समये सर्वे प्रवासिनः नराः स्वदेशान् यान्ति। कश्चित् विरहिणं प्रति स्वाभाविकीयमुक्तिः यत् यदि सः वर्षाकाले गृहं न यास्यति तदा तस्य प्रिया जीवितुं समर्था न भवति—

शिखिनि कूजति गर्जति तोयदे स्फुटति जातिलताकुसुमाकरे।
अहह पान्थ न जीवति ते प्रिया नभसि मासि न यासि गृहं यदि॥

मनोजः कामिनीनां हृदयेषु प्रविश्य शोकाग्निं कामाग्निञ्च ज्वालयति। रसमयं जलधरसमयं पश्यन्त्यः पथिकाङ्गनाः विरहाग्निना दह्यमानाः मूर्च्छिताः इव भवन्ति।

अस्मिन् समये सर्वे प्राणिनः प्रसन्नाः जाताः। गजेन्द्राः मत्ताः, गवेन्द्राः मुदिताः भवन्ति। वने विक्रान्ततराः गजेन्द्राः विहरन्ति। सुरेन्द्रः वारिधरैः सह प्रक्रीडति। पर्वतस्य शोभा रमणीयतरा जाता। मेघोदरविनिर्मुक्ताभिः कर्पूरदलशीतलाभिः धाराभिः पर्वतस्याभिषेको भवति। धाराविधौतानि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
अचलेन्द्रस्य कूटान्यधिकं विभान्ति। तस्योपरि पतन्तः प्रपाताः लम्बमानाः मुक्ताकलापा इव शोभन्ते। यथोक्तम्—

महान्ति कूटानि महीधराणां धाराविधौतान्यधिकं विभान्ति।
महाप्रमाणैर्विपुलैः प्रपातैर्मुक्ताकलापैरिव लम्बमानैः॥

शैलोत्तमानां स्खलन्तः विपुलाः प्रपाताः गुहासु विच्छिन्नस्रज इव विकीर्यन्ते पतन्ति च।

यत्र तत्र इन्दीवरलोचनाः वनिताः दोलाकेलिं कुर्वन्ति। तासाम् वर्णनं कर्तुं कोऽपि समर्थः न भवति यथोक्तं केनचित् कविना।

सौन्दर्यमिन्दीवरलोचनानां लीलासु दोलासु यदुल्ललास।
यदि प्रसादाल्लभते कवित्वं जानाति तद्वर्णयितुं मनोभूः॥

ताः स्वपादौ प्रसार्य दोलामुन्नम्य परस्परं मधुरस्वरेण गायन्ति।

शरद्

'समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्।
शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम्॥

अहो विलक्षणो भगवान् करालः कालः। अयमेव मरुप्रदेशान् जलमयान् करोति, निर्धनान् धनिकान् करोति, अपारकूपारपारावारान् मरूकरोति। अस्यैवायं प्रभावः यत् मयूरस्य रमणीयो ध्वनिः योऽतीव मनोमुग्धकारी आसीत् स एव परुषायते। सत्यमुक्तं महाकविना भारविणा यत बलवद्विरोधिता दुरन्ता एव भवति यो भगवान् मरीचिमाली अल्पैश्वर्ययुक्तमदमत्तेन मेघेनावृतः आसीत स एव स्वतीव्रकरान् मांसलमेघानामुपरि आक्षिप्य नृसिंह इव तेषां हृदयं विदीर्य प्रस्फुटितः विश्वस्मिन् नैशं तमः दूरीकृत्य जलजराजीनां निद्रामदिद्रवत्। यदुक्तम्—

"जगति नैशमशीतकरः करैर्वियति वारिदवृन्दमयं तमः।
जलजराजिषु नैद्रमदिद्रवन्न महता महता क्व च नारयः॥"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्षानन्तरं मनोमुग्धकारि सर्वसुखदायि शरदागमनं विलोक्य कविरुत्प्रेक्षते यद् नायं शरद् ऋतुरपि तु काचिन्नवीना लक्षणसम्पन्ना अवगुण्ठनवती नववधूः समायाति यथा—

काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरवनूपुरनादरम्या ।
आपक्वशालिरुचिरा तनुगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रूपरम्या ॥

शरच्चन्द्रज्योत्स्नया परिपूरिताः सर्वा दिशः अर्जुनच्छविमादधतीव प्रतिभान्ति। सर्वत्र कूलद्रुकूलेषु तडागसरोवरेषु काशकुशेषु वनेषु उपवनेषु श्वेतिमा दृश्यते। सर्वं नवीनमिवालोक्यते दिशि दिशि।

अस्मिन्नृतौ शरत्कालीना शोभा सप्तच्छदवृक्षाणां शाखासु तारार्कनिशाकराणां प्रभासु, श्रेष्ठवारणानां क्रीडासु अतीव विराजते। शरत्कालगुणोपपन्ना विचित्रलक्ष्मीः पद्माकरेष्वधिकं विभाति। विकसितकमलवनानि स्मितविकसितदलैः स्वचारुहासं प्रकटयन्ति। महानदीनां पुलिनेषु पद्मरजोऽवकीर्णाः विशालवक्षाः स्मरप्रियाः हंसाः चक्रवाकैः सह केलिक्रीडां कुर्वन्ति। मदप्रगल्भाः वारणाः मददर्पिताः गावः प्रसन्नाः जाताः। ते सर्वे इतस्ततः विचरन्तः प्रफुल्लिताः आनन्दमग्नाश्च भवन्ति। सर्वाणि वनान्तराणि मनोज्ञगन्धैः पुष्पैः शोभितानि। सर्वेषां वृक्षाणां शाखाः पुष्पातिभारादवनताः जाताः। अतएव सर्वत्र पुष्पगन्धपरिमलमुद्वहन् वायुः मन्दं मन्दं वाति। सर्वत्र विकसितकाशपुष्पाणि दृष्ट्वा इत्थं प्रतिभाति यत् वर्षाऋतुः वृद्धो जातः। पथां पंकं जलं च शुष्कं जातम्। कृशप्रवाहासु व्यपेतपङ्कासु सबालुकासु नदीषु हंसाः आगत्य केलिं कुर्वन्ति। समाप्ते च वर्षर्तौ क्षुधार्दिताः घोरविषाः अनेकवर्णाः सर्पाः स्वबिलेभ्यः निर्गत्य यत्र तत्र विप्रसरन्ति। सर्वत्र प्रसृतचन्द्रज्योत्स्नायुक्ता रात्रिः शुक्लांशुकसंवृताङ्गी नारीव विभाति। कुमुदैरुपेतं सरोवरस्य जलं निशि तारागणाकीर्णमन्तरिक्षमिव भाति—

सुप्तैकहंसं कुमुदैरुपेतं महाह्रदस्थं सलिलं विभाति।
घनैर्विमुक्तं निशि पूर्णचन्द्रं तारागणाकीर्णमिवान्तरिक्षम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हंसकुलप्रकीर्णा प्रफुल्लपद्मोत्पलवती वापी मेखलामालाधारिणी भूषिता वराङ्गनेव भाति। वनेषु कर्णप्रियः क्रौञ्चशब्दः श्रूयते। सर्वत्र विपक्वं शालिवनं शोभते। गिरिसन्निभमेघशून्यं नभः विधौतवर्णं शस्त्रमिव भाति। गगनमण्डले विमलचन्द्रः उदेति। तस्य ज्योत्स्नया सर्वाः दिशः प्रकाशिताः जाताः।

आगतां शरदं दर्शं दर्शं सस्यक्षेत्रे साकाररूपं स्वकीयं परिश्रमं दृष्ट्वा कृषकाणां मनांसि आनन्देन पूर्यन्ते। इत्थं प्रतिभाति यत् ते इममानन्दमेव दर्शयितुं दीपावल्युत्सवं कुर्वन्ति। अस्मिन्नेव समये सर्वे गौरवमनुभवन्ति। सस्यं परिणामरम्यतामुपैति। वर्षाप्रपीडिताः सर्वे जनाः वर्षव्यपनीतकालं प्राप्यानन्दमनुभवन्ति। प्रत्यूषकाले संवृत्तः अनिलः मानवानां श्रमं हरति।

शरत्कालीनं दृश्यमतीव रमणीयम्। अतएव प्रायः सर्वे राजानः विशेषतः चन्द्रगुप्तप्रभृतयः प्रतिवर्षं कौमुदीमहोत्सवं कुर्वन्तिस्म। तस्य शरद्वर्णनं चन्द्रेण कृतं मुद्राराक्षसनामके नाटकेऽतिश्रेष्ठम्। शरत्काले दिशः सरिदिव, सरितश्च दिशः इव प्रतिभान्ति तथा दशदिशः नभस्तः सरित इव प्रादुर्भवन्ति एवं प्रतीयते यथा—

शनैः श्यानीभूताः सितजलधरच्छेदपुलिनाः
समन्तादाकीर्णाः कलविरुतिभिः सारसकुलैः।
चिताश्चित्राकारैर्निशि विकचनक्षत्रकुमुदै-
र्नभस्तः स्यन्दन्ते सरित इव दीर्घा दशदिशः॥

रेलयात्रा

वैज्ञानिकोऽयं समयः। यत्र तत्र सर्वत्र विज्ञानस्यैव महिमा दरीदृश्यते। अस्मिन् युगे सर्वाणि कार्याणि विज्ञानमयानि जातानि। यावच्च गानं यानं पानमित्यादयः विज्ञानेनैव भवन्ति। सर्वस्मिन् विश्वस्मिन् विज्ञानस्य प्रचारः परिलक्ष्यते। भिन्नानां विभिन्नदूरवर्तिप्रदेशानामल्पीकृतं दूरीभवनं विज्ञानेन। सम्प्रति सर्वत्र गमनं विज्ञानस्योपकारेण भवति। वायुयान-धूमयान-बाष्प-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यानानि च सन्ति। यैः सर्वे जनाः अल्पक्षणेनैव बहुदूरदेशं यन्ति। सम्प्रति बहुसुलभं 'रेल' इति ख्यातं बाष्पयानम्। 'रेल' इति आंग्लशब्दः लौहनिर्मित-लम्बमानपट्टिकायामुपरि बाष्पयानं धावति। सैव 'रेले'तिनाम्ना कथ्यते। 'रेल' इत्यस्य प्रथमतः आविष्कारः जेम्सवाटनामकेन पाश्चात्त्येन वैज्ञानिकेन कृतः। एकदा तस्य माता भोजनं पाचयतिस्म। कार्यवशाद् सान्यत्र गतवती, तत्र स्थितेन जेम्सेन दृष्टम् यत् स्थाल्या उपरिस्थितं पात्रं बाष्पप्रभावेणोच्छलति। तद् दृष्ट्वा अस्य मनसि बाष्पशक्तेर्ज्ञानं जातम्। इदं सुपरिष्कृतं ज्ञानं मनसा संशोध्य विचार्य चाविष्कृतं बाष्पयानम्। अधुना बाष्पशकटस्य परिवर्धितं परिष्कृतं च रूपं दृश्यते। स्थलयानेषु शीघ्रगामि वाहनमिदम्।

अनेन यात्रातिसुखकरी अभूत्। ग्रीष्मावकाशे एकदा वयं रेलनामकेन यानेन कतिपयैः सतीर्थ्यैः साकं नैनीतालाभिधानं पर्वतीयप्रदेशं गताः। तदा बाष्पयानयात्रायाः अनुभवमकुर्म। बाष्पयाने बहूनि कोष्ठकानि संलग्नानि-सन्ति। तत्र स्थिताः जनाः निश्चिन्तं स्वपन्तः यात्रां कुर्वन्ति। तस्मिन् 'डिब्बे'तिप्रसिद्धे कोष्ठके शौचालयस्य, जलस्य, शयनस्य स्थानं भवति। बाष्पयानस्येञ्जनेतिप्रसिद्धयन्त्रमग्रे भवति। तत्र वाहकः सहयोगिभिः सह तिष्ठति। यानस्यान्तिमे पृष्ठे तस्य 'गार्डे'तिप्रसिद्धस्य रक्षकस्य कोष्ठम् भवति। अयं रक्षकः यदा हरितवर्णां पताकां दर्शयति तदा यानस्य चालकः यानं चालयति। उभयतः यातायातस्वीकृतिसूचकं 'सिग्नले'तिप्रसिद्धं नीलरक्तवर्ण-युक्तं स्तम्भयन्त्रं भवति। तस्य हस्ताकारः नीलवर्णचिह्नितः पट्टः यदि नीचै-र्भवति तदा यानस्य गमनसूचना प्राप्यते, किन्तु यदि रक्तवर्णचिह्नितः पट्टः उद्यतः भवति तदा यानं तत्रैव स्थाने तिष्ठति। उद्यतः पट्टः कांचिद् आशंकां सूचयति। एवम् स्थाने स्थाने प्रबन्धः अस्ति। अनेन कुत्रापि दुर्घटनायाः सम्भावना न भवति।

एवमेकस्थानादपरस्थानंगच्छन्त्या 'रेल'गन्त्र्या वयं 'काठगोदामे'तिप्रसिद्धं स्टेशनं सम्प्राप्यावतीर्य च मोटरयानेन नयनाभिरामं मनोहारिणं नैनीतालेति प्रसिद्धं पर्वतं प्रति प्रस्थिताः। मार्गे मनोहारि दृश्यं पश्यन्तः आत्मानमपि विस्मृतवन्तः। प्रथममेव तत्रोल्लसत्कल्लोला नैनीतिप्रसिद्धा पुष्करिणी दृष्टा, मुहुर्मुहुस्तत्रैवं दर्शं दर्शं तदीयां सुषमामानन्दमग्ना जाताः। अस्याः सायं-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तनं दृश्यमद्यापि मनसि नवीनमिवाभाति । सुन्दराः युवानः युवत्यश्च क्रीडन्तो बालाः दण्डधारिणः वृद्धपुरुषाश्च तत्र रमणीयायां विहारभूमौ विचरन्तः आलपन्तः अवलोक्यन्ते स्म । अस्यां कुत्रचिन्नौकाविहाराय नावः प्लवन्ते, कुत्रचित् तितीर्षवः सन्तरन्ते स्म, कुत्रचित् केचित् स्नानं कुर्वते, केचन प्रक्षालनं कुर्वते इत्यादीनि दृश्यानि दृष्टिपथपथिकायन्ते स्म । अस्माभिरस्तत्रैव स्थितः देवतात्मा हिमालयो नाम नगाधिराजः दृष्टः । नगाधिराजस्य हिमाच्छादितं शिखरमतिदूराद् दृश्यमानं बहुभिर्जनैः अधिगतम् । अन्येद्युस्तत्रस्थितान् बहुविधान् रमणीयप्रदेशान् दृष्ट्वा प्रत्यावर्तिताः ।

प्रत्यावर्तनसमये वाष्पयानेनैव वयमागताः । वाष्पशकटः यदा तीव्रवेगेन धावति तदा मध्यस्थितानां कृते वाह्यदृश्यानि चलितानीव प्रतीयन्ते स्म । पार्श्वस्थिताः वृक्षाः, भवनानि, मनुष्याः, वनस्पतयः, स्तम्भादयश्च पृष्ठतः धावमानाः इव प्रतीयन्ते स्म । दूरस्थितानि वस्तूनि क्षणे पार्श्वं समायान्ति । तथैव वेगेन पार्श्वस्थितानि दूरं प्रयान्ति। अतिदूरस्थं दृश्यं क्षितिजकूले स्थितमिव दृश्यते। यदा लौहपथगामिनी वाष्पशकटी नगरस्थिते स्थितिस्थाने स्टेशने सन्निहिता भवति तदा 'आगतवती आगतवती' इति वदन्तः सर्वे भारवाहकाः पथिकाश्च आरोढुं तत्परा भवन्ति । तत्र विक्रेतारः स्वस्ववस्तूनि नीत्वा शब्दं कुर्वन्तः शकटस्य निकटे आयान्ति । फलं ताम्बूलं चायं शष्कुलीत्यादीनि वस्तूनि विक्रीणन्ते । अनेन प्रकारेण स्टेशनस्योपरि महान् जनसंमर्दः भवति ।

नवीनाः आगन्तारः टिकटं नीत्वा धावन्तः कक्षे कक्षे स्थानमन्वेषयन्ति । भारवाहकाः भारं नीत्वाकोष्ठानामभ्यन्तरे प्रेरयन्ति । अतः महत् कोलाहलमयं च दृश्यं भवति। सर्वे रेलकर्मचारिणः कृष्णश्वेतपरिधानसमायुक्ताः इतस्ततः भ्रमन्ति । भारवाहकाः नीलरक्तवर्णान् कञ्चुकान् परिधाय अंकचिह्नितां रक्तपट्टिकां स्कन्धे निधाय भारस्यान्वेषणे तत्पराः पर्यटन्ति । प्लेटफार्मस्योपरि कोऽपि जलान्वेषणाय धावति, कोऽपि भोजनस्य व्यवस्थायाम् व्यस्तः । सहसैव यानाध्यक्षेण हरितवर्णा पताका दर्शिता । तां दृष्ट्वा गन्त्री गमनोत्सुका भवति । यात्रिणश्च रभसा आरोहन्ति धावन्ति च । प्रत्येकस्टेशनस्योपरि स्वेप्सितागतं स्थानमवगत्य अनेके यात्रिणः अवरोहन्ति आरोहन्ति च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्थं रेलयात्रा विचित्रा विस्मयकरी मनोरंजिका च भवति। अस्याः यात्रायाः अनेके लाभाः सन्ति। रेलयात्रया समयः लघुरेव प्रतीयते। अल्पकाले नरः दूरस्थं स्थानं गन्तुं समर्थः भवति। अस्यां सर्वेषां कृते सर्वा व्यवस्था वर्तते। ये धनिकाः पुरुषाः ते तु अधिकं व्ययं कृत्वा प्रथमश्रेण्याः प्रकोष्ठे आनन्देन गच्छन्ति। तथा मध्यमश्रेणिगताः पुरुषाः द्वितीयश्रेण्याः प्रकोष्ठे गच्छन्ति। सामान्यानां जनानां कृते तृतीयश्रेणी तु भवत्येव। प्रथमश्रेण्यां सर्वाणि आवश्यकानि वस्तूनि प्रायः उपलभ्यन्ते। सत्यामपि एतादृश्यां सर्वस्यां व्यवस्थायां सामान्यानां कृते नास्ति काचिदुचिता व्यवस्था, ते तु कष्टपूर्वकमेव गच्छन्ति येन केन प्रकारेण। परन्तु सत्स्वपि एतेषु कष्टेषु अतिरम्या रेलयात्रा यतो हि अल्पकालेनाल्पमूल्येन एतादृशः नास्त्यन्यः कोऽप्युपायः यात्राकृते। अतः रेलनामकं यानं चास्मदर्थं सुखकरम् ॥

जलयात्रा

गमनागमनं विना किमपि कार्यं न चलति। अतः प्राचीनकालादेव गमनागमनस्य साधनानां मध्ये जलमार्गोऽपि एकं साधनमस्ति. आसीच्च पुरा जलमार्गेणैव गमनागमनम्। सम्प्रति मनुष्याः जलयात्रां कदाचिदेव कुर्वन्ति। स्थलमार्गाः वहुविधाः विकसिताः सन्ति। कचिन्नदीसन्तरणार्थं समुद्रयात्रार्थं वा केवलं जलयात्रा भवति। प्राचीनकाले यदा स्थलमार्गाणां समीचीनः प्रबन्धो नासीत् तदा नदीमार्गेण नौकया जलयात्रां कृत्वा व्यापारिणः सामान्यजनाश्च एकस्मात् स्थानादपरस्थानं गच्छन्ति स्म। इदानीमपि यत्र एकस्थानस्य मार्गः द्वितीयस्थानात् स्थलमार्गापेक्षया जलमार्गेण लघुतरः भवति तदा जलयात्रा क्रियते। प्राचीनकाले व्यापारसाधनम् जलमार्गः एवासीत्। नद्या एव व्यापारः भवति स्म। इदमेव कारणं यत् महान्ति व्यापारप्रधानानि नगराणि प्रायेण नदीनां तटेष्वेव स्थितानि सन्ति। अस्माकं भ्रमणशीलाः आर्याः भ्रमन्तः नद्यास्तटे आगत्य निवसन्ति स्म। नद्या बहवो लाभाः सन्ति। तन्निकटे पशूनां कृते जलं भोजनं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चोपलभ्यते यथेष्टमात्रायाम्। मनुष्याणां च कृतेऽपि महदुपकारीणि वस्तूनि च प्राप्नुवन्ति। अतो हि देवीरूपेण सम्पूजिता नदी अस्माकं पूज्यार्य-वर्गेण। अस्माकं देशेऽनेका नद्यः सन्ति। तेषु गंगायमुनासिन्धुप्रभृतयः नद्यः अतीव प्रसिद्धाः। आसु नदीसु स्नानं कृत्वा जनाः स्वं धन्यं मन्यन्ते।

जलयात्रा नदीमार्गेण समुद्रमार्गेण वा भवेत्। यात्रायाः अवधिपर्यन्तं पूर्णतः व्ययप्रबन्धः क्रियते। तत्र मार्गे सामग्रीणां क्रयविक्रयौ न भवतः। यतो हि स्थाने स्थाने न क्रय्यवस्तूनि प्राप्यन्ते। कदाचित् कस्याश्चिन्नद्याः जलमपेयं भवति तदा जलस्यापि प्रबन्धः आवश्यकः भवति। भोजनसाम-ग्रयाः इन्धनादेश्च प्रबन्धः पूर्णतः क्रियते। समुद्रयात्रायां तु पोतस्योपरि पोतविभागाध्यक्षेण सर्वः प्रबन्धः क्रियते। तत्र जनाः शुल्कं दत्त्वा सर्वाणि वस्तूनि प्राप्तुं शक्नुवन्ति। पोतेषु भोजनालयो जलपानगृहश्च भवति। पोतस्य भृत्याः सर्वेषां सेवां सम्पादयन्ति। यात्राशुल्केन सहभोजनादिकस्यापि शुल्कं तत्र गृह्यते। अतिरिक्तं वस्तु यथा विशिष्टं जलताम्बूलादि जनाः व्यक्ति-रूपेण पुनः क्रेतुं शक्नुवन्ति।

महत्यानन्दकरी च जलयात्रा भवति। नौकासु पोतेषु वा स्थिते सति तद् गृहमिवाभाति। सुसज्जिता नौका गृहरूपा भवति। अतः तां नौकागृहमपि वदन्ति जनाः। नदीतीरवासिनः कैवर्तकास्तस्मिन्नेव सर्वदा निवसन्ति। धीवरबालकाः अल्पकालादेव नौकासंचालने च विचक्षणाः भवन्ति। तेषामियं स्वाभाविकी प्रवृत्तिः। भारतीयस्वर्गे काश्मीरप्रदेशे नौकागृहाणि प्रायेण भवन्ति। प्रायः काश्मीरप्रदेशे नौकायामेव कृषिः भवति। अतस्तत्र क्षेत्राणां तस्करता भवति। तत्र 'डल' नाम्नि महाह्रदे नौकागृहाणि निर्मितानि। नौकामारुह्य गमने कृते सति वेगो न लक्ष्यते। इत्यपि न ज्ञायते यत् नौका चलतीति। स्थलयानानां गमनकाले यानस्थलयोः संघर्षेण महान् घर्घरध्वनिः संजायते। उद्वेगश्चानुभूयते किन्तु नौकायाम् स्थिते सति जलस्य संघर्षः न तथा भवति। यतो हि जलं द्रवपदार्थः। द्रवपदार्थे मधुरकलकलध्वनिं विरहय्य नास्ति कश्चिदन्यो ध्वनिः। यो ध्वनिर्भवति जलमार्गेण गमन-समये स तु कर्णप्रियो भवति। जलयानेन गमने कृते धूलिप्रक्षेपो न भवति। नदीतटयोः दृश्यानि प्रकृत्या रम्याणि भवन्ति। तीरेषु प्रायेण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वनानि वृक्षवाटिकादीनि च भवन्ति। तटेषु स्थिताः वृक्षाः स्वपुष्पैः नित्यनूतनैः पुष्पाञ्जलिं समर्पयन्ति। अतएव दृष्टिसुखं प्राप्यते। जलयात्रायां चौराणां लुण्ठकानां च बाधातिन्यूना भवति। कदाचिदेव ते नौकादिना सुसज्जिताः भूताः आक्रमणार्थं समुद्योगं कुर्वन्ति। अतः अतीव सुरम्या चेयं जलयात्रा।

स्थलयात्रापेक्षया इदानीं जलयात्रा व्ययसाध्या अस्ति। तस्यां किञ्चिद् भयमपि वर्तते। क्वचित् विपरीतवायुना नौकानां पोतानाञ्च गमनं दुष्करं भवति। गहनजलराशिमध्ये भीषणप्रवातप्रकोपेन नौकादीनां विनाशोऽपि भवति। एवं बहूनां धनजनानां क्षतिः जायते। समुद्रयात्रायां सामुद्रिकवायु-विशेषेण केषां चिदुपरि अस्वास्थ्यकरः प्रभावः भवति। दूरदेशीया समुद्र-यात्रा मासैः सप्ताहैश्च पूर्यते। एतावत्कालपर्यन्त न सर्वे कुशलेन पारं गच्छन्ति। वेगेन तत्र गमनं न भवति। यतः वायुस्थित्यनुसारेणैव यानं गन्तुं शक्नोति। जलयात्रायाम् यानम् सुदूरं स्वस्थितिं करोति। अतः यत्र-कस्मात् कस्यापि नवीनवस्तुनः आवश्यकता उपस्थिता भवति तदा महती विपत्तिः आयाति। परन्तु न केवला हानिः अपितु जलयात्रया अनेके लाभाश्चापि भवन्ति। सुदूरदेशानाम् वस्तूनि व्यापारमाध्यमेन अस्माकं देशे आयान्ति। अस्माकं देशस्य वस्तूनि अन्यदेशे यान्ति। अनेन व्यापारेण देशस्योन्नतिः एव भवति।

जलयात्रा अस्माकं देशे भारतेऽतिप्राचीनकालादेव भवति स्म। अस्य पुण्यदेशस्य पूर्वनिवासिनः आर्याः जलयाननिर्माणेऽपि पटवश्चासन्। मध्यकालेऽपि जलमार्गेण व्यापारः प्रसिद्धः आसीत्। जलयात्रायाः आनन्दं प्राप्तुमिदानीं जनाः नदीतीरस्थकाशी-प्रयाग-कर्णपुरप्रभृतिषु नगरेषु नौका-विहारं कुर्वन्ति। नौकाविहारस्यानन्द इव जलयात्रयापि सुखं प्राप्यते। अतएव सुखदायिनी मनोहारिणीयं जलयात्रा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदयात्रा

एकदा कतिपयैः सुहृद्भिः सह एकस्मिन् सुरम्ये रमणीयप्रदेशे पदयात्रां कर्तुं मतिं निश्चिनुमः। यत् इतः नातिदूरं गंगोपकण्ठं पुण्यतपसः आदिकवेः महर्षेः वाल्मीकेः आश्रमं द्रष्टुं गन्तव्यमस्माभिरिति निश्चितम् यतः पदयात्रा एव यात्रा अन्या तु औपचारिकी। पदयात्रायां महानानन्दः प्राप्यते। यतो हि मानवः स्वपदेन याति यानेन तु स्वयं न याति अपितु नीयते। हस्तौ पादौ स्थिरीकृत्याङ्गचालनेन विना पंगुवत् गमनं किं गमनम्। अपदो दूरगामी चेति आलम्ब्य पत्रादिरूपं यानस्थितं गमनं न युक्तम्। यानेन यात्रार्थी जनः पत्रमिव गच्छति प्राणीव न किन्तु सामग्रीव नीयते। पदयात्रायाः महत्त्वं समयलाघवस्य शक्तिलाघवस्य च दृष्ट्या न वा भवतु, किन्तु मानवस्य स्वशक्तिविकासदृष्ट्या आत्मविश्वासदृष्ट्या च भवतु। तदेव शुभम् समीचीनम्।

वयं विज्ञानसाहाय्येन यन्त्राधीना भूत्वा स्वकीयां शारीरिकीं शक्तिं क्षीणां कुर्मः। सर्वदा यानेन गमनशीलः पद्भ्यां क्रोशार्धमपि गन्तुं न शक्नोति। शारीरिकदृष्ट्या सः पराधीनः पुरुषः पंगुवत्। पुरा अस्माकं पूर्वजाः चतुर्धामयात्रां पद्भ्यां पदातिरूपेणैव कुर्वन्ति स्म। मध्यकाले यदा राजमार्गाणां विकासः आधुनिकयानानां प्रचारश्च नासीत् तदा पत्रसंदेशवाहकाः शतशः क्रोशान् नित्यं धावन्तः गच्छन्ति स्म। तस्मिन् काले ते धावकाः कथ्यन्ते स्म। ते एकस्मात् स्थानात् पत्रादिकं सुसमाचारं नीत्वा धावन्तः शीघ्रमेवापरस्थानं नयन्ति स्म। एवमन्ये धावकाः अपि कुर्वन्ति स्म। अयमेव क्रमः प्रचलति स्म। देशाटनप्रेमिणः यात्रिणः पद्भ्यामेव देशाद्देशं गच्छन्ति स्म। यथा यथा यन्त्रविकासोऽभवत् तथा तथा मानवानां कायशक्तिः क्षीणा जाता।

यदि समयः स्यात् तदा पदयात्रा सर्वश्रेष्ठा। इयं यात्रा स्थले एव भवितुं शक्यते। पदयात्रया पथप्रदेशस्य सम्यक् निरीक्षणं भवति। विदूरस्यात्रायामत्यन्तानन्दावाप्तिः भवति। प्रायः सर्वे छात्राः आसन्। ते तु प्रायेण चपला भवन्ति। सर्वे कपय इव इतस्ततः पद्भ्यां पथि चलन्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धावन्तश्च भृशं मोदं वहन्ति स्म। मार्गे कुत्रचित् खे विहगानां मधुरः कलरवः श्रुतिपथमानन्दयति स्म। क्षेत्राणां सस्यश्यामलतामुद्यानानां हरितिमानं स्वच्छाकाशस्य महिमानं दर्शं दर्शं वयमुल्लासानन्दनिर्भरा आस्म। कस्यापि नैकसमाना मतिरिति तु विदितमेव। मार्गे एकं विशालं काननं प्राप्तम्। तत्र केचन मृगा अस्माकं मण्डलं दृष्ट्वा सहसा वेगेन धावन्ति। कुत्रचित् हरिणाः नेत्राणां प्रकामविस्तारफलं प्राप्य पलायिताः। लघवः शशकाः अतितीव्रगत्या धावन्तः कूर्दन्तः अतीव मनोहरा इति व्यलोकयाम। दृष्ट्वेदं सुन्दरं दृश्यं निकटवर्तिनीं भगवतीं भागीरथीं च समुत्तीर्य मुनेरुटजं निजगन्तव्यदेशमासादितवन्तः। तत्र सुन्दरं रमणीयं दृश्यं विलोक्य वयं मन्त्रमुग्धाः चित्रलिखिता इवाभवाम।

पदयात्रया शरीरे शक्तिः आयाति। आत्मविश्वासश्च वर्धते। निर्भयता निर्विघ्नता च भवति। यन्त्रयानानां यन्त्रं यदि मध्ये विकृतं स्यात् तदा परवशतया यात्राविनाशः निश्चित एव। यदि कदाचित् विधिनियोगात् यानदुर्घटना स्यात् तदा प्राणहानिरपि सम्भवेत्। अनेन यन्त्रयानेन अनेकानि गृहाणि विनाशितानि। किन्तु पदयात्रायां नैतेषां दुःखकराणां दोषाणां सम्भावना। दूरदेशीययात्रायां यानाश्रयणं कर्त्तव्यं यद्यपि युक्तं किन्तु नित्यस्य लघुयात्रायामपि सदैव यानापेक्षा विकलाङ्गानामेव शोभावहा अस्ति। सम्प्रति शाकक्रयार्थमपि यानस्यावश्यकता प्रातः भ्रमणार्थमपि यानापेक्षा इत्यादि उपहासास्पदम्।

अस्मिन् पुण्ये परिश्रमशालिनि प्रदेशे भारते संसारे वा केचित् आदर्शस्वरूपाः पुरुषाः सन्ति ये सर्वथा पदयात्रामेव कुर्वन्ति। यतो हि 'कालो ह्ययं निरवधिर्विपुला च पृथ्वी।' सम्प्रति एव विनोबामहाभागः साधुमनीषी कदापि यानेन न गच्छति। साधारणमानवापेक्षया तीव्रतया गच्छति वृद्धोऽपि स युवकवत् धावति। युक्तमिदं मनुष्यः पदयात्रया स्वास्थ्यस्य समीचीनतां कर्तुं शक्नोति। पदयात्रा समुचितः व्यायामः। महात्मा गान्धिरपि पदयात्रां प्रायेण करोति स्म। तस्य प्रातः भ्रमणं नित्यनियमः आसीत्।

प्रत्येकमानवानां कृते नित्यं किंचिद्दूरं पदयात्रा आवश्यकी। एतेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्य शारीरिकी शक्तिः सुरक्षिता भवति। आपत्तिकाले सः सामर्थ्यानुसारं क्रोशानुक्रोशं गन्तुं समर्थः भविष्यति। स्वास्थ्यलाभदृष्ट्या नित्यं पदातिभ्रमणं परमावश्यकम्। पद्यात्रा नातिशीघ्रा नातिमन्दा अपितु मध्यगत्या कर्त्तव्या। समानक्रमेण गमनं लाभकरं भवति। सम्मिलितानां पद्यात्रा अतीव सुखकरी मनोरंजनकरी च भवति। यदि समीपस्थस्थानस्य पद्यात्रा सामूहिकरूपेण स्यात् तर्हि पद्भ्यां कर्त्तव्या। पद्यात्रया स्वास्थ्यमात्मविश्वासः शक्तिश्च साध्यते। अनया अर्थव्यये लाघवमपि भवति। अतः प्रत्येकदृष्ट्या पद्यात्रा अतीव हितकरीति।

अस्मिन् वर्तमानयुगेऽपि एतादृशाः बहवः महापुरुषाः सन्ति येऽद्यापि प्रायः पद्यात्रां कुर्वन्ति। भूतभविष्यज्ज्ञातारः हस्तामलकवत् प्रत्यक्षदर्शिनः ऋषयः पूर्वस्मिन् काले एव विचारयामासुः। यदग्रे एवंविधाः पुरुषाः भविष्यन्ति ये पदमेकमपि गन्तुमपि नोत्सहिष्यन्ते, अथवा क्रोशमेकं चलनं न वरमिति मत्वा अशक्ताः भविष्यन्ति। तेषां कृते एव तीर्थस्थाने प्रायः समये समये वर्षाभ्यन्तरे एकवारं पंचक्रोशीया चतुर्दशक्रोशीया चतुरशीतिक्रोशीया परिक्रमा निर्धारिता। प्रायः एतादृशाः पुरुषा भक्तिभावनया परिपूरिता भूत्वा एकवारमेव वर्षे पद्यात्रां कुर्वन्ति स्म। इदमेव पद्यात्रायाः महत्त्वम्॥

भूतपूर्वराष्ट्रपतिः डा० राजेन्द्रप्रसादः

धन्यौ तौ मातापितरौ याभ्यां महात्मा राजेन्द्रप्रसादः नाम सुत उत्पन्नः। डा० राजेन्द्रप्रसादः भारतभूमेरद्वितीया विभूतिः आसीत्। तस्य जन्म १८८४ ईशवीये वर्षे विहारप्रान्तस्य एकस्मिन् ग्रामेऽभवत्। सः प्रखरबुद्धियुक्तः स्वविद्यार्थिजीवने एव महात्मनः गान्धेः राजनीतिविचारैः अतीव प्रभावितोऽभवत्। अतएव विधान (कानून) स्य परीक्षां समुत्तीर्यापि तस्मिन् विषये तस्य रुचिः नाभूत्। तस्य प्रवृत्तिः बहुमुखी। सः हिन्दीभाषायाः प्रेमी आसीत्। अतएव भारते सर्वत्र हिन्दीभाषाप्रसारणे कृतभूरिपरिश्रमः सः एव महान्तम् प्रयत्नमकरोत्। विहारप्रान्तेऽपि तेन हिन्दीभाषायाः अतीवप्रचारः कृतः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजनीतिक्षेत्रेऽपि तस्य प्रतिभा सर्वतोमुखी आसीत्। सः अतीव धैर्यवान्, क्षमावान्, विनम्रशीलः, वाक्पटुः, आसीत्। महात्मनाम् समस्ता एव गुणाः देशरत्न-राजेन्द्रप्रसादमहाभागेषु प्राप्यन्ते स्म महात्मनाम् गुणाः निम्नश्लोके वर्णिताः—

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्॥

स्वबाल्यकालात् प्रभृति सः सद्गुणैः परिपूर्ण आसीत। प्रखरबुद्धिसमन्वितः जनसेवानिरतः नम्रस्वभावपूर्णः गम्भीरः सः कृषकवत् सरलहृदयः। दीनजनहिताय दयालुः स्वसर्वस्वमपि दातुमुद्यतः आसीत। डाक्टरोपाधिविभूषितः धीरः वीरः कर्मठः त्यागमूर्तिः राजेन्द्रप्रसादः भारतदेशस्य राष्ट्रपतिः आसीत। सः सर्वथा तत्स्थानायोपयुक्तः आसीत्। राष्ट्रपतिपदमङ्गीकृत्य भारतस्य राजनगर्यां नवदिल्लीनामिकायां राष्ट्रपतिभवने न्यवसत् सः सरलः साधुः। अस्य तपोमूर्त्तेः महापुरुषस्य नामश्रवणमात्रेणैव मानवाः सुखं शान्तिं च प्राप्नुवन्ति स्म। साधुसंगतिः विद्वद्भिरपि सर्वथा प्रशंसनीया—

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः।
चन्द्र-चन्दनयोर्मध्ये शीतला साधुसङ्गतिः॥

एषां साधुजनानां सम्पर्के निवासस्य स्मृतिः कदापि न विस्मर्यते। देशस्योच्चतमैः विद्वद्भिः, महर्षिभिः, महात्मभिः नागरिकैः ग्रामीणैः परिवृतो वर्त्तमानोऽपि सः कदापि विमनस्को न लक्षितोऽभूत्। यतः तस्मिन् भारतीयसभ्यता पूर्णरूपेण व्याप्तासीत्।

संसारे सर्वत्र इदमेव दृश्यते यत् यः धनिकजनानाम् नरपतीनाम् हितं करोति लोकः तस्मिन् द्वेष्यतां याति, किन्तु यः दीनदुःखिजनानां हितं करोति सः धनिकजनः पार्थिवेन्द्रैः त्यज्यते। परन्तु सः सर्वजनहितकारी आसीत्। धनिकवर्गाः तस्यादरं कुर्वन्ति स्म तथा निर्धनवर्गाः तेन सह प्रेम कुर्वन्ति स्म च, वस्तुतः सः महानुभावः एतादृश एव कार्यकर्ता आसीत। उक्तञ्च—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नरपति-हितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपति-जनपदानां दुर्लभः कार्यकर्ता ॥

सः सर्वेषां जनानाम् मानसमरालः । तस्य पवित्रसम्पर्कमेत्य सर्वे मरुतः सहायेन वह्निरिवाधिकं दीप्यमाना अभूवन् । अस्य तेजोमण्डलपरिपूर्ण-माननं सम्भाषणचातुर्यं, वाक्पटुतां, धैर्यं, चावलोक्य सर्वाः प्रजाः वशवर्तिन्यः समभवन । अस्य सौजन्यमूर्त्तेः सरलचित्तस्य सर्वेषां मानसमरालस्य सत्य-संघस्य महाभागस्य राजेन्द्रप्रसादस्य गुणगणान् गातुं कोऽपि न प्राभवत् । सः महानुभावः अद्यापि देशवासिनां परमादरभाजनं भूत्वा लोकहृदयेषु विराजते ।

स्वतन्त्रभारतस्य प्रथमः प्रधानमन्त्री

विश्ववन्द्यमहात्मगान्धिमहोदयस्यानुसारेण "महापुरुषाः स्वयमेव जायन्ते न निर्मीयन्ते" तथा महामहिमशालिनां महापुरुषाणां कृते किमपि स्थानं प्रदातुं न शक्यते केनापि । ते महाभागाः स्वयमेव स्वकीयकर्म-णस्तथा त्यागस्य प्रभावेणैव सर्वेषां हृदयेषु स्थानं प्राप्नुवन्ति । सर्वे मानवाः स्वयमेव तेषां कृते सर्वोपरि स्थानं ददति । एतादृशी भविष्यवाणी अस्माकं जनप्रियाणां श्रीपण्डितजवाहरलालनेहरूमहाभागानां कृते सत्यरूपेण परि-लक्ष्यते । पण्डितनेहरूः मानवतायाः आकाशे प्रदीप्तनिर्मलभास्वानिव-स्वकीयैः सेवाभावैः मानवानां हृदयेषु पूर्णं स्थानं प्राप्तवान् । श्रीपण्डित-नेहरूमहाभागानां शरीरं मानवतायाः सेवागुणैः निर्मितमासीत् ।

नेहरूवंशावतंसः प्रधानमन्त्री प्रयागनगरे उत्पन्नः । अस्य पिता श्रीमोतीलालनेहरूः कश्मीरदेशीयः प्रयागमागत्य निवासं कृतवान् । सः अतीव प्रसिद्धः सान्धिविग्रहिकः (बैरिस्टरः) आसीत् । स्वजीविकाबलेन सः महतीं सम्पत्तिम् एकत्रीकृतवान् । तस्य गृहे उत्पन्नः श्रीजवाहरलालः राजपुत्र इव वृद्धिमगमत् । अस्य शिक्षा प्रथमं गृहे एव अभूद् । लघुवयस्कः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एव सः आङ्ग्लदेशे पठितुं प्रेषितः । तत्र 'हैरो' महाविद्यालये तथा 'कैम्ब्रिज' विश्वविद्यालये शिक्षां प्राप्तवान् । तस्मिन्नेव देशे स विधानपरीक्षामुत्तीर्य भारतमागतः ।

भारते आगत्य न्यायव्यवसायः कानिचिद् दिनानि समचालयत् । किन्तु भारतीयपरतन्त्रतायाः उपरि विचारं कृत्वा तस्य मनसि महत् दुःखमभूत् । गौरङ्गाणां सम्पर्केण सः मनसि चिन्ताग्रस्तः अभूत् । सः बाल्यकालादेव उच्चविचारयुक्तः आसीत् । यदा प्रथममहायुद्धे ब्रिटिशशासनेन 'रोलटएक्ट' प्रस्तावं कृत्वा भारतीयानां दमनं नाशनञ्च चिन्तितं तदा महात्मगान्धिनेतृत्वे श्रीनेहरूः अपि प्रस्तावस्य विरोधार्थमायोजिते असहयोगान्दोलने सम्मिलितोऽभवन् । तस्मादेव समयात् सः जीवनं भारतभूमेः सेवायां समर्पितवान् । आजीवनं सः प्रतिक्षणं भारतराष्ट्रोन्नतेः एव प्रयत्नं करोति स्म ।

महात्मनः गान्धेः मार्गमनुसृत्य बहुकालं कारागारसेवनं कृत्वा दिवानिशं कष्टं स्वीकृत्य च भारतं स्वतन्त्रमकारयत् । स्वतन्त्रतायुद्धस्य सः सर्वाग्रणीः योद्धा । अनेकवारं सः कांग्रेसमहासभायाः सभापतिः निर्वाचितः । सर्वप्रथमं १९३० ईसवीये वत्सरे सः लवपुर (लाहौर)-सम्मेलने स्वतन्त्रतायाः घोषणं कृतवान् आसीत् । अयं गम्भीरः धीरः निर्भीकः राजनीतिकूटनीतिविधिज्ञः, प्रभावशाली, सफलवक्ता चासीत् । एतैरेव गुणैः एनं भारतीया जनता स्वतन्त्रतां प्राप्य प्रधानमन्त्रिपदे सुशोभितं कृतवती । स्वगुणेनैव सः पञ्चदशवर्षाणि व्यतीतानि कृत्वाऽपि अपरिवर्तितः दृश्यते स्म ।

अयं महानुभावः लेखकरूपेणापि प्रसिद्धः । 'विश्वस्येतिहासः' 'भारतान्वेषणम्' 'आत्मकथा' 'पुत्रीं प्रति पत्राणि' इत्यादीनि पुस्तकानि लिखितवान् । व्यक्तिगतरूपेण सः तपस्वी वर्तते स्म । अयं राष्ट्रनेता भारतोन्नतिचिन्तया रात्रावपि निद्रां न प्राप्नोति स्म किं दिवसे । एतेषामेव गुणानां कारणात् भारतातिरिक्तापि विश्वस्य जनता तं महतादरेण पश्यति स्म । अस्याकर्षकं व्यक्तित्वं सौम्यमाननम् , उदारः स्वभावः, भावुकं हृदयम् , महदुद्देश्यं सर्वस्य श्रद्धायाः विषयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदानीं वृद्धोऽपि सः युवकेभ्योऽपि अधिकं साहसं, कार्यक्षमतां च धारयति स्म । इदं तस्य संयमपूर्णजीवनस्य फलमासीत् । भारतीयानामसंख्याः आशाः तस्योपरि समाश्रिताः सन्ति स्म । इदानीमस्माकं देशे नास्ति कोऽपि यः श्रीनेहरूमहाभागैस्तुल्यमहर्निशं काठिन्यपूर्णं परिश्रमं कर्तुं शक्नोति । स्वकीयवृद्धावस्थायामपि श्रीपण्डितमहाभागैः केवलं घटिकात्रयं यावदेव रात्रौ शयनं क्रियते स्म । अन्यच्च एते अहर्निशं जनसेवायाः कार्ये दत्तचित्ताः दृश्यन्ते स्म । तैः एकस्यां सभायामुद्घोषितं यत "राष्ट्रीयकार्येषु विश्रामकरणं कातरतायाः स्वरूपं वर्तते । श्रीपण्डितनेहरूमहाभागानामनवरतपरिश्रमस्य प्रभावेण स्वल्पकालाभ्यन्तर एव भारतवर्षस्य समीचीना प्रोन्नतिः अवलोक्यते स्म । सर्वदा अस्माकं कृते कार्यस्य प्रेरणा प्रदीयते स्म श्रीनेहरूमहाभागैः ।

यद्यपि वर्तमाने नियमरहिते पूर्णभ्रान्ते समाजे विलासितायाः क्रोडे क्रीडन्तो बहवः यौवनपरिपूर्णाः जनाः स्वकीयेषु शरीरेषु वार्द्धक्यस्यानुभवं कुर्वन्ति परन्तु स्वकीयसंयमस्य एवं यमनियमयोः प्रभावेणास्माकं प्रधानमन्त्रिणा स्वकीयवार्द्धक्येऽपि यौवनस्य बर्बरतायाः शक्तिः अनुभूयते स्म । श्रीनेहरूमहाभागानां यमनियमौ समालोक्य सर्वे रोगाः दूरादेव पलायन्ते स्म । तस्य मुखमण्डलेऽपूर्वायाः कान्तेः सर्वदैव चमत्कारि चित्रं सम्यक् रूपेणावलोक्यते स्म । श्रीपण्डितनेहरूमहाभागैः प्रत्यहं योगाभ्यासोऽपि क्रियते स्म । येन तेषां शरीरे रोगाणां सान्निध्यं नहि प्रतिभाति स्म ।

वास्तविकरूपेण श्रीनेहरूमहाभागाः भारतमातुः कण्ठस्य हाराः । जनसेवायामेव ते यथार्थसुखानुभूतिं कुर्वन्ति स्म । जनसेवायाः समक्षे ते स्वकीयसुखस्य तृणमिव गणनां न कुर्वन्ति स्म । यत् किमपि तैः विचार्यते तत्सर्वं जनकल्याणाय एव । जनसेवायाः अतुलभावनायाः प्रभावेण ते सततं कार्येषु व्यापृता अपि कामपि कष्टानुभूतिं न कुर्वन्ति स्म । आर्थिकस्थितेः विकासार्थं तैः आर्थिकयोजनानां प्रचारः कृतः । सर्वे प्राणिनः अस्य महापुरुषस्य कृतेऽपि श्रद्धायाः महत्स्वरूपं धारयन्ति स्म ।

श्रीपण्डितनेहरूमहाभागानां मनसि बालकानां एवं बालिकानां कृते-विशिष्टः स्नेहः वर्तते स्म । यत्र कुत्रापि गम्यते श्रीपण्डितमहोदयैः तत्र सर्वत्र बहवः बालकाः समागत्य स्वकीयं प्रेमोपहारं समर्पयन्ति स्म । तैः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बालकाः राष्ट्रस्य प्रधानसम्पत्तिरूपेण गण्यन्ते। सर्वे बालकाः तं प्रति 'चाचा नेहरू' इति सम्बोधनान्तपदस्मरणपूर्वकं स्वकीयं स्नेहं प्रदर्शयन्ति स्म।

इदानीं विश्वस्य प्रबलानि राष्ट्राणि अमेरिका-रूस-चीन-प्रभृतीनि विनाशकारिणां शस्त्रास्त्राणां निर्माणं कृत्वा पूर्णोद्वेलितानि विद्यन्ते फलतः मानवतायाः मुखमण्डले विनाशस्य व्यवस्थामयी ऊर्मिः प्रसृता दृश्यते परन्तु भारतवर्षस्य प्रधानमन्त्रिणा शान्त्यग्रदूतेन श्रीजवाहरलालमहाभागेन यदा वसुन्धरायां पञ्चशीलस्य सिद्धान्तमादाय विश्वशान्तिस्थापनार्थं प्रयासः कृतः तदा मानवतायाः मुखमण्डलं पुनः प्रसन्नतायाः आभया पूर्णविकसितं जातम्।

श्रीपण्डितनेहरूमहोदयेन मानवतायाः संरक्षणाय महत्कार्यं कृतम्। फलतः विश्वस्य सर्वे मानवाः अस्मिन् स्नेहं कुर्वन्ति एवं स्वस्वमानसे स्मरन्ति च। स्वकीयपितुः अपारसम्पदां परिहृत्य पण्डितनेहरूमहोदयेन मानवसेवायाः महान् भारः गृहीतः। इदानीं सर्वे मानवाः विश्वशान्तेः संभावनायाः कल्पनां केवलमेव श्रीनेहरूमहोदयस्य विचारप्रवाहे अवलोकयन्ति। श्रीमहात्मनां गान्धिमहाभागानां निर्दिष्टमार्गमनुसृत्य सम्पूर्णो विश्वः शान्तिपूर्णां क्रान्तिम् कर्तुं चेष्टते श्रीपण्डितनेहरूमहोदयप्रसङ्गेन।

अयम् भारतमातुः प्रियपुत्रः, भारतीयानां प्रियनेता, राजनीतिमार्गस्य प्रणेता, शान्तेः अग्रदूतः, सर्वेषां मानसहंसः, सर्वजनसम्माननीयः पं० जवाहरलालनेहरूमहाभागः अस्मान् परित्यज्य अकस्मात् २७ तिथौ मईमासे मध्याह्ने द्विघटिकावादनवेलायाम् स्वपुत्रीं इन्दिरां, भगिनीं विजयलक्ष्मीं च विहाय स्वर्गं जगाम। सम्पूर्णो विश्वः तस्य निधनेन शोकमग्नः अभूत्।

महात्मा गान्धिः

अस्मिन् चराचरजगति स एव मनुजः श्लाघ्यः यस्य पवित्रं चरित्रं मानवानां कृते विद्यते आदर्शभूतमनुकरणीयं च। तेषां पवित्रचरित्राणां महति राशौ महात्मा गान्धिरपि एका महती विभूतिः आसीत्। भारतवर्षस्यायं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

महात्मा सर्वश्रेष्ठः नेता आसीत्। अस्यैव महात्मनः तपश्चर्यया बुद्धिबलेन समुद्योगेन पराधीनतापाशबद्धा पवित्रा भारतभूमिः स्वतन्त्रा जाता। देशस्य स्वतन्त्रतायाः कृते स महतीं तपश्चर्यां कृतवान्। सत्यस्य, अहिंसायाः, प्रेम्णश्च बलेन सः सर्वत्र विजयं कर्तुमैच्छत्। सः सम्पूर्णभारतदेशस्य भ्रमणं कृत्वा ग्रामसुधारस्य, खादीप्रचारस्यावश्यकतामनुभूय कार्यरूपेण तत्र च आन्दोलनं कृतवान्। हरिजनोद्धाराय अनेन महात्मना भगीरथ-प्रयत्नः कृतः। भारतीयसमाजेऽन्त्यजानां महतीं दुर्दशामवलोक्य, तैः सार्धं कृतं पशुवत् व्यवहारं दृष्ट्वा सः अतीव व्यथितोऽभूत्। अस्यैव समुद्योगेन सर्वे हरिजनाः समानाधिकारं प्राप्तवन्तः।

महात्मनः गान्धेः पूर्णं नाम 'मोहनदासकर्मचन्दगान्धिः' अस्ति। तस्य जन्म सौराष्ट्र (गुजरात) प्रान्ते पोरबन्दरनाम्नि नगरे १८६८ तमे ख्रिष्टाब्दे बभूव। अस्य चरित्रवान् धर्मनिष्ठः सत्यपरायणः श्रीकर्मचन्द-नाम्ना पिता राजकोट-नाम्नः राज्यस्य प्रधानमन्त्री आसीत्। तस्य माता 'पुतली बाई' अपि महती-सरला तपोनिष्ठा चासीत्। अनयोः चरित्रयोः प्रभावः गान्धेश्चरित्रेऽपि लक्ष्यते। मोहनदासः बाल्यावस्थायामेव सरलः सात्त्विकश्चासीत्। अस्य दिनचर्यापि सरलासीत्। स्वकीयां प्रारम्भिकीं शिक्षां समाप्य सः विधि (कानून)-शिक्षाग्रहणार्थम् आंग्ल-(इंगलैण्ड) देशं जगाम। ततः बैरिस्टरस्योपाधिं गृहीत्वा गान्धिः इमं देशं प्रत्याजगाम। तस्मिन्नेव काले जनहिताय संलग्नः परोपकार-निरतोऽयं महात्मा जनानामतीव प्रिय आसीत्।

अफ्रीकावासिभिः भारतीयैः आमन्त्रितः सः तत्र गत्वा भारतीयानां दुःसहदुर्दशां विलोक्य सत्याग्रहेण तेषामुद्धारं कर्तुं प्रयत्नमकरोत्। यदा सः अफ्रीकादेशे आन्दोलनतत्परः आसीत् तस्मिन्नेव काले भारतवर्षेऽपि राष्ट्रीयमहासभा स्वराज्यप्राप्तये प्रयत्नं करोति स्म। अफ्रीकादेशात् प्रत्यावर्त्य सः १९१९ ख्रिष्टाब्दे राष्ट्रीयसंस्थायाम् प्रवेशं कृत्वा १९२० ख्रिष्टाब्दे 'असहयोगं' नाम आन्दोलनं चालयामास। अनेनान्दोलनेन सः स्वतन्त्रतासंग्रामस्य सेनानीर्भूत्वा महतीं क्रान्तिं जनयामास। अस्याज्ञया शतसहस्राधिकैः जनैः स्वपदवी जीविका च परित्यक्ता। अनेकेषु अवसरेषु सः कारागारे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

निबद्धः। एतस्यैव प्रयासेन नेतृत्वे च १९३० ख्रिष्टाब्दे पूर्णस्वतन्त्रतायाः प्रस्तावः कांग्रेसेन स्वीकृतः। 'नमकसत्याग्रह-आन्दोलन' नाम्ना इदं आन्दोलनम् प्रसिद्धमभूत्। तस्मिन्समये सः समुद्रतटस्थितं 'डाढी' नामधेयं नगरं जगाम। तत्र लवणस्य संग्रहं कृत्वा तेन राजनियमः खण्डितः त्रोटितश्च। अन्ततो गत्वा 'गान्धि-इर्विन' सन्धिनियमानुसारेण समुद्रतटवासिजनानां कृते निःशुल्कं लवणं प्राप्तमभूत। १९३१ तमे ख्रिष्टाब्दे स गोलमेजसम्मेलने भागं नीतवान्। १९३२ वत्सरे तेन हरिजनानां कृते आमरणमनशनं प्रारब्धम्। एतत्परिणामस्वरूपेण 'हरिजन-पृथक्-निर्वाचन'-प्रस्तावः स्वीकृतः। तदनन्तरमस्य सततप्रयासैः 'आंग्लदेशीयाः भारतं त्यजेयुः' इति प्रस्तावप्रसारः अभूत्। यस्मात् कारणात् सः कारागारे पातितः। अन्ततः १९४७ तमे वर्षे अगस्तमासस्य पञ्चदशतारिकायां भारतस्य स्वातन्त्र्यसूर्योदयो जातः प्रापितश्चायं पवित्रतमो भारतदेशः पूर्णस्वतन्त्रताम्।

अनेन प्रकारेण सः स्वसम्पूर्णजीवने स्वतन्त्रताप्राप्तिं प्रति संलग्नः दृश्यते स्म। अतएव स एव भारतीयानां सत्यपिता, सत्यबन्धुः, सत्यसुहृच्चासीत्। यदा स्वतन्त्रताप्राप्तिसमये अयं भारतवर्षदेशः हिन्दुस्तान-पाकिस्तान-रूपेण द्विधा विभक्तः तदा 'नोआखाली' नगरे हिन्दूमुस्लिमसम्प्रदाययोर्मध्ये अतीव भयानकाः उपद्रवाः प्रारब्धाः। तत्र भारतीयानां दशा सुतरां शोचनीयाऽऽसीत्। तेषां दुःखपूर्णां दशां दृष्ट्वा सुतरां पीडितोऽयं महात्मा तस्मिन्नेवाशान्तिमयोपद्रवपूर्णसमये स्वबृहत्समुद्योगेन शान्तिं स्थापयामास। एवमेवानेकभयपूर्णस्थानेषु स एकाकी प्राणभयं परित्यज्य शान्त्यर्थं प्रयत्नं कृतवान्। अन्ते च १९४८ तमे ख्रिष्टाब्दे जनवरीमासस्य त्रिंशत्तारिकायां स्वतन्त्रतालाभस्य कतिपयमासानन्तरमेव सः महात्मा प्रार्थनासभां गच्छन् 'नाथूरामगोडसे' नाम्ना ख्यातस्य बुद्धिहीनस्य दुष्प्रयासेन प्राणांस्त्यक्तवान्।

सज्जनानां पालकः, दुर्जनानां नाशकः, विदेशीयानां शासनविनाशकः, धर्मसंस्थापकः अस्थिमात्रावशेषः, कौपीनधारी, दण्डहस्तः, घृतचर्महीनोपानत्कः, प्रसन्नवदनः अयं महात्मा युगावतारपुरुषः आसीत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अस्य सरलजीवनं विलोक्य विदेशीयाः 'अयम् अर्धनग्नः साधुः' इति कथयन्ति स्म। तस्य समादरं सकलविश्वस्य मानवाः कुर्वन्ति स्म। इयं मानवेतिहासस्य अपूर्वा घटना वर्तते यत् अहिंसात्मकसत्याग्रहेण स्वतन्त्रता लब्धा। गान्धिमहोदयेन शिक्षाप्रसाराय, हरिजनहिताय, जनकल्याणाय, ग्रामोद्योगप्रवर्तनाय पाश्चात्यशिक्षाजनितविलासितादूरीकरणाय केवलस्वदेशिवस्तुप्रचाराय, प्राच्यसंस्कृतेः स्थापनाय यानि प्रयतनानि कृतानि तानि सर्वाण्येव तत्क्षण एव जनसमक्षे आदर्शरूपेण स्थापितानि अतएव युगप्रवर्तकः अयं साधुः मनुष्यसदृशः भूत्वापि अलौकिकामानुषिकशक्तिसम्पन्नः आसीत्। एतादृश्यः महाविभूतयः यदा कदा स्वजन्मना धरां प्रकाशयन्ति।

महात्मा बुद्धः

बुद्धदेवः अद्यप्रभृति २५०० वर्षपूर्वं 'कपिलवस्तु'नगरे महाराजशुद्धोदनस्य गृहे विम्बसारस्य (मगध) राज्यकाले उत्पन्नो बभूव। तस्य मातुः नाम 'मायादेवी' आसीत्। अतिकालात् अनेकसंकल्पैः उपासनाकृत्यैः शुद्धोदनः पुत्रं प्राप्तवान्। स चास्य नाम 'सिद्धार्थ' इति चकार। वैशाखमासस्य पूर्णिमायां 'लुम्बिनी' वने तस्य जन्म अभूत्। यदा यदा जगति धर्मस्य ग्लानिर्भवति तदा तदा नष्टं विलुप्तञ्च धर्मं पुनः संस्थापयितुं जगत्संरक्षिणी महती शक्तिः आविर्भवति। इदं तु गीतायामपि कथितं भगवता श्रीकृष्णचन्द्रेण—

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे॥' इति।

सा महती शक्तिः आविर्भूय सज्जनानां परित्राणं दुष्टानां च विनाशं कुर्वती पतनगर्ते पतितस्य धर्मस्योत्थानं करोति। इयं लोकनीतिः सर्वथा प्रसिद्धा। वैभवशालिराजभवनेऽपारस्नेहेनास्य लालनं पालनं चाभूत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विलासोपकरणैश्च परिवृतोऽपि सः सम्पूर्णशास्त्रेषु क्षत्रियोचितविविध-विद्यासु चतुःषष्टिकलासु च परं नैपुण्यमवाप। किशोरावस्थायामेव सः प्रकृत्या गम्भीरः विचारशीलः विरक्त इव दृश्यते स्म। अतएव शुद्धोदनः चिन्तितः अभूत्। राजभवनाद् बहिः राजकुमारस्य निष्क्रमणं न भवेत् इत्थं स व्यवस्थां कृतवान्। शुद्धोदनः सिद्धार्थस्य मनोरञ्जनार्थं विविधं नृत्य-गीत-क्रीडादीनामायोजनं चकार। तेन च तस्य विवाहः अपि 'गोपा' नाम्न्या षोडशवर्षीयया राजकन्यया सह कृतः। बुद्धस्य लोकोत्तरा अपूर्वा वैचित्र्यशालिनी शक्तिः बाल्यावस्थायामेव प्रकटिताऽभूत्। अतएव भोग-विलासस्य सर्वाणि साधनानि दृष्ट्वाऽपि सिद्धार्थः यदा कदा भृशमुद्विग्नः भूत्वा विचारमग्नः भवति स्म।

एकस्मिन् दिवसे प्रवृत्तमधुमासस्य वैभवं दृष्ट्वा सः रथमारुह्य नगर-मध्ये निर्गतः। पथि सः सितकेशयष्टिविषक्तहस्तं भ्रूसंवृताक्षं शिथिलनताङ्गं वृद्धपुरुषं ददर्श। सः सारथिं पृष्टवान कोऽयम्? अस्य इत्थं रूपं कथमस्ति। सारथिः उवाच—

रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम्।
नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः॥
पीतं ह्यनेनापि पयः शिशुत्वे कालेन भूयः परिसृप्तमुर्व्याम्।
क्रमेण भूत्वा च युवा वपुष्मान् क्रमेण तेनैव जरामुपेतः॥

तदनन्तरं कंचन कृशाङ्गमशक्तं रोगिणं च ददर्श। यदा सः सारथिमपृच्छत् तदा सः उवाच 'अयं रोगी अस्ति। मनुष्यः यदा रोगग्रस्तः भवति, तदा तस्य इयमेव दशा भवति। इति श्रुत्वा सिद्धार्थः दुःखितोऽभूत। सारथिः रथं राजभवनं प्रति निवर्तितवान्। इत्थमेव सः विभिन्नकाले नगरभ्रमणं कुर्वन् मृतं संन्यासिनं च दृष्टवान्। मृतपुरुषं दृष्ट्वा यदा सः सारथिमपृच्छत तदा सारथिः अब्रवीत यत सर्वपुरुषाणामियमेवान्तिमावस्था भवति। लोके हीनस्य मध्यस्य महात्मनो वा सर्वस्य विनाशः नियतः। इदं श्रुत्वा क्रमशः तस्य हृदि विरक्तिः वृद्धिं गता। तस्य एकः पुत्रः उत्पन्नः बभूव। तेन चिन्तितं इत्थमहं मायाजाले पतितः कदापि न मुक्तिं प्राप्स्यामि। एकस्मिन् दिने सः गृहत्यागस्य निश्चयं कृतवान्। उदासीनं वीतस्पृहं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारमवलोक्य शुद्धोदनस्य मनसि महती चिन्ता समायाता। गृहत्यागस्य संकल्पे मनसि दृढीभूते सति कदाचित् सः अर्धरात्रिकाले स्वस्त्रीपुत्रादिकं च विहाय अश्वमारुह्य नगराद् बहिर्जगाम। सद्योजातपुत्रस्य गुणवत्या-भार्यायाः स्नेहानुरक्तस्य जनकस्य च स्नेहस्तं केनापि प्रकारेण स्वकर्त्तव्य-मार्गात् विचालयितुं समर्थो नाभवत्। राजप्रासादं त्यक्त्वा दूरं गत्वा सः अश्वं राजकीयं वेषं च त्यक्त्वा केशान् खड्गेन कर्तयित्वा भिक्षुः अभूत्। इतस्ततः सः भिक्षां चरन् देशाद् देशान्तरं भ्रमणं चकार। तस्य वज्रसारे मनसि स्वल्पमात्रोऽपि कामस्य विकारो नाजायत। संसारस्य दुःख-नाशाय उपायं चिन्तयन् चिन्ताकुलः आसीत्। तस्य पञ्च शिष्याः प्राप्ताः। सः निराहारः स्थित्वा षड्वर्षपर्यन्तं भीषणं तपश्चचार किन्तु न तस्मात् किञ्चिन्मात्रमपि लाभः अभूत्। तस्मिन् काले बुद्धस्य तपोनाशार्थं काम-देवेन भीषणाक्रमणं कृतम् परन्तु समाधिस्थः बुद्धः तस्याक्रमणस्योपरि-विजयं प्राप्य स्वतपः रक्षितवान्। तपस्याकाले बुद्धस्येयं महती प्रतिज्ञाऽसीत् यत्—

इहासने शुष्यतु मे शरीरं
त्वगस्थिमांसं विलयन्तु यातु।

इमाम् दृढां प्रतिज्ञां धारयन् स भीषणं तपस्तेपे। भीषणतपसः कंचनापि लाभं नावलोक्य सः तपः परित्यज्य ज्ञानप्राप्त्यर्थं बोधगयां गतः। तत्र बोधि-वृक्षस्य छायायां तस्य हृदि ज्ञानमागतं 'निराहाराद् न कोऽपि लाभः अस्ति, ब्रह्मचर्येण, वासनायाः त्यागेन, प्रेम्णा, सत्येन, हिंसया च कल्याणं भवितुं शक्नोति' इति। तदैव स बोधिसत्त्वः बुद्धश्च बभूव। 'सुजाता'नाम्नी नर्तकी पायसं दत्त्वा तं स्वस्थं कृतवती तदा तस्य मनसि स्वस्थता अजायत। 'स्वस्थे एव शरीरे स्वस्थं मस्तिष्कं भवति' इति सः अनुभवं चकार। तस्य शिष्याः तं विलासिनं मत्वा तत्यजुः।

सः बुद्धः सद्विद्यानां क्षेत्रभूतं, धर्मप्रस्थितानां विलासनिकेतनं, तपस्विनां विदुषां योगिनाञ्च सिद्धपीठं, भगवतः भूतभावनस्य त्रिशूलोपरि स्थितं काशीनगरं गतः। तत्र चत्वार्यार्यसत्त्वानि तेन समुपदिष्टानि। दुःखमस्तीति प्रथममार्यसत्त्वम्। विशुद्धज्ञानप्राप्त्यर्थं तेनाष्टाङ्गमार्गस्योपदेशः कृतः। समी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चीना, दृष्टिः, सम्यक् संकल्पः, समीचीना वाक्, सम्यगाचारः, सम्यगाजीवः, सम्यक् वीर्यं, समीचीना स्मृतिः, सम्यक् समाधिश्च एतेऽष्टांगयोगाः। सारनाथं समागत्य सर्वप्रथममुपदेशं दत्तवान्। पश्चात् तस्य सहस्रशः अनुयायिनः जाताः। पुनस्ते पञ्च शिष्याः शरणं समागताः। बिम्बसारः तस्य शिष्यः अभूत्। ततः भिक्षुवेषेण सः स्वजन्मभूमिमागतः। सर्वे प्रेम्णा करुणया च गद्गदाः अभूवन्। तस्य भार्या यशोधरा स्वपुत्रं राहुलं भिक्षारूपेण बुद्धाय दत्तवती। बुद्धस्य यशसा समं उपदेशः पृथिवीमण्डले तीव्रवेगेन प्रसृतः। तस्य रूपं दृष्ट्वाऽनेके दुष्टाः हिंसकाः लुण्ठकाश्च विरक्ताः संजाताः।

मूलरूपेण सत्यम् ,अहिंसा, प्रेम, दया, वासनात्याग एव तस्य सिद्धान्ताः सन्ति। बहवो राजानः तस्य शिष्याः प्रचारकाश्च बभूवुः। विभिन्नजनपदेषु राज्येषु च परिभ्रमन भगवान बुद्धः स्वधर्मं प्रसारितवान्। केचन जनाः गृहे निवसन्तः एव तस्योपासकाः अभवन्, केचन स्वगृहैश्वर्यं विहाय भिक्षवः बभूवुः। प्रतिदिनं बहुशः पुरुषाः स्त्रियोऽपि तस्य शिष्यमण्डले प्रविशन्ति स्म। महाराजः अशोकः बुद्धधर्मस्य महान् प्रचारकः आसीत्। सः अनेकस्थानेषु विहारसंघारामादि निर्मितवान्। सर्वे बुद्धं धर्मं संघं शरणं गच्छन्तः त्रिकस्यानुपालनं कुर्वन्ति स्म। अशोकस्य समये बुद्धधर्मस्य लंका-चीन-जापानप्रभृतिदेशेष्वपि प्रचारः अभूत।

प्रथमं बौद्धधर्मे केवलाः पुरुषाः एव दीक्षिताः आसन्, किन्तु बुद्धस्य प्रधानशिष्यस्य आनन्दभिक्षोः अनुरोधेन स्त्रीणामपि दीक्षा प्रारब्धा अभूत। महात्मना कथितमासीत् 'स्त्रीणां प्रवेशः धर्मस्य हानिकरः भविष्यती'ति। अन्ततः इदमेव जातम्। पश्चात् बुद्धधर्मे वासनाजन्यदोषाः च प्रविष्टाः। बुद्धः जीवनपर्यन्तं पवित्रं व्रतधारणं धर्मप्रचारं च कृत्वा निर्वाणं प्राप्तः किन्तु कतिपयकालानन्तरं शिष्येषु वैमत्यं जातं सम्प्रदायविभागश्चाभूत। सौत्रान्तिक-वैभाषिक-माध्यमिक-योगाचारेति नामभिर्मतचतुष्टयं जातम।

वस्तुतः बौद्धधर्मे बुद्धप्रतिपादिताः अहिंसादयः उपदेशाः उत्तमाः सन्ति। अतएव सर्वेषां विचारकाणामुपदेशकानां च सिद्धान्तेषु बुद्धस्य उपदेशाः निहिताः भवन्ति। चत्वारिंशद्भ्योऽधिकवर्षाणि यावत् ज्ञानमुपदिशन् वृद्धावस्थायाम् कुशीनगरनामके नगरे सः स्वप्राणान् मुमोच।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महामना मदनमोहनमालवीयः

अस्ति सकलत्रिभुवनललामभूता, अनेकेषां मूर्धाभिषिक्तानां भूपतीनां यागानुष्ठानैः अलंकृता, गंगायमुनासरस्वतीभिः उपशोभिता, बहुभिः देवमन्दिरैः अलंकृता, अक्षयवटेन युक्ता, कृतयुगानुकारिणी प्रयागाभिधाना नाम नगरी। तत्रैव प्रातःस्मरणीयस्य देवतुल्यस्य पूज्यस्य महामनसो मदनमोहनमालवीयस्य जन्म विद्वत्प्रवरस्य पण्डितव्रजनाथमालवीयस्य गृहे शुभे मुहूर्त्ते पवित्रतमे चाहनि १८६१ ईशवीयाब्दे दिसम्बरमासस्य २५ तारिकायामभूत्। भारतभूषणं महामना पं० मदनमोहनमालवीयः अस्माकं भारतवर्षस्य अन्यतमा विभूतिरासीत्। बाल्यकालादेव ब्राह्मणोचितैः सर्वसंस्कारैः संस्कृतो दीप्तिमापन्नः पितृवत्सलः बालको मालवीयः पितुः आनन्दम् समवर्धयत्। तदनन्तरमनेकभाषाणां ज्ञानं प्राप्य सर्वासु विद्यास्वपि विद्वत्तां प्रापत्। आंग्लभाषायाः ज्ञानप्राप्त्यर्थं सः विद्यालयं प्रविश्यानेकाः परीक्षाः समुत्तीर्य 'बी० ए० एल्० एल्० बी०' इत्युपाधिम् प्राप्तवान्।

महामनसां मालवीयमहोदयानां मंगलमयं जीवनं सीमितं नासीत्। तस्य जीवनं सर्वतोमुखमासीत्। धर्मस्य साकारता, सशरीरा विज्ञता, मूर्तिमती पवित्रता, दीप्तिमयी प्रतिभा, उत्कटः ज्ञानपुञ्जश्चेति सर्वाणि महामनःसु मालवीयेष्वेव एकत्रीभूतानि दृष्टानि, तेषां दर्शनमात्रेणैव जनानां मानसिकविकासो भवति स्म, द्वेषः मनोमालिन्यं च दूरादेव अपसरति स्म।

तस्य प्रशस्ते समुन्नते ललाटे चन्दनाङ्कितो वृत्तबिन्दुः, विचित्रं बद्धमुष्णीषं च, प्राचीनभारतीयसभ्यताप्रेरणाप्रदायिनी सौम्यमूर्त्तिः सुशोभनीयासीत्। गरिमोपेतं ज्ञानप्रज्वलितं तदीयम्मुखमण्डलं ज्ञानस्य प्रतीक आसीत्। निसहायाः करुणापात्राणि अनाथा विकलाश्च जनाः तस्य दयार्द्रनेत्रयुग्मं दृष्ट्वा स्वसौभाग्यजागरणमनुभवन्ति स्म। महामनाः मालवीयः स्वधर्मस्य नियमस्य समयस्य च पूर्णानुयायी आसीत्। देवतात्मा नगाधिराजः हिमालयः इव सः स्वप्रतिज्ञापालने तत्परः अचलश्चासीत्।

सः विद्वान् चरित्रवान् गुणवान् महात्मा मालवीयः राजनीतिविषयेऽपि चतुरश्चासीत्। तस्य राजनीतिदाढर्यं दृष्ट्वा राजनीतिप्रवणाः राज-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नीतिज्ञाः आश्चर्यचकिताः आसन्। तस्य सहनशीलता विनम्रशीलता च सर्वेषां मनांसि मोहयतः स्म। धर्मज्ञः धर्मपरायणः धर्मतत्परः मालवीयः धर्मावतारः आसीत्। धनेन कायेन मनसा वाचा च तेन सनातन आर्यधर्मो रक्षितः। प्रत्यहं सः श्रीमद्भागवतस्य पारायणं कुर्वन्नासीत्। गृहे बहिर्वा सभासु सम्मेलनेषु वा सः भारतीयवेषं धारयति स्म। तस्य ब्रह्मर्षेः दर्शनमपि धन्यम्। यतः साधुसमागमः अतीव सुन्दरः। तस्य दर्शनेनैव मानवाः स्वं धन्यं मन्यन्ते स्म—

साधोस्तु दर्शनं धन्यं तीर्थीभूता हि साधवः।
कालेन तीर्थं फलति सद्यः साधुसमागमः॥

लोभ-काम-क्रोध-मोहादिदुष्टैर्व्यसनैः विहीनः महामना मालवीयः माधुर्यस्य सरलतायाश्च मूर्त्तिः आसीत्।

परमेश्वरभक्तः, विषयेष्वनासक्तः, विद्याप्रसारे निरन्तरतत्परः, सः वाराणसी-हिन्दूविश्वविद्यालयस्य स्थापनामकरोत्। तस्मिन् विश्वविद्यालये असंख्याः छात्राः अद्यापि विद्याध्ययनं कुर्वन्ति। भारतीयसंस्कृतेः पुनरुत्थानाय सः हिन्दूविश्वविद्यालये संस्कृतमहाकाव्यानां वेदवेदाङ्गानाञ्च शास्त्राणामध्यापनप्रबन्धमकरोत्। सः सत्यविषयेषु स्वकीयनिन्दायाः चिन्तां न करोति स्म। सः स्वनिर्णये दृढः आसीत्, उक्तञ्च यत्— धीराः न्याय्यात् पथः स्वपदं न प्रविचालयन्ति—

'निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥' इति।

सः दयालुतायाः मूर्त्तिः महामना मालवीयः 'दयालोरसमर्थस्य जनस्य दुःखनाशायैव दयालुता' इति कथनानुसारेण सदैव दीनजनानाम् सहायतां करोति स्म। तेन विशालकरुणायुक्तेन हृदयेन अनेकदीनानाथमानवानामुद्धारः कृतः, क्षमाशीलः सः अपराधिने सदैव क्षमादानमकरोत्। परन्तु यः असत्यतत्परः, अधर्मी, देशस्य समाजस्य मानवस्य च हानिं करोति स्म, तदा सः तस्य कृते क्षमादायकं स्वं हृदयं दैन्यं च परित्यज्योग्ररूपं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धारयति स्म। लोकोत्तराणां मानवानां चेतांसि वज्रादपि कठोराणि कुसुमादपि मृदूनि च भवन्ति अतः तानि कोऽपि ज्ञातुं समर्थः न भवति उक्तं च—

'लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ।।' इति ।

तेन महात्मना यत्कृतं तद्विश्वो विजानाति। वाराणस्यां हिन्दूविश्वविद्यालयसंस्थापने सः महान्तम् प्रयत्नमकरोत्। काशीनागरीप्रचारणीसभायाः स्थापना तेनैव कृता। कांग्रेसक्षेत्रेऽपि यदा 'चौराचौरी' स्थाने सत्याग्रहः स्थापितोऽभूत् तदा भारते भयङ्करः कोलाहलः प्रसृतः। तस्मिन्नेव प्रलयङ्करे समये १४४ धारां छित्त्वा सः कांग्रेसस्य रक्षां कृतवान्।

एतादृशं त्यागिनं तपस्विनं—ब्रह्मर्षिं, सत्यमूर्त्तिं, विश्ववन्द्यं, भारतीयजनानाम् मानसहंसं, सरस्वत्याः वरदपुत्रं, मानवतायाः अग्रदूतं, न्यायपथानुसारिणं, महामनसं मदनमोहनमालवीयं को न जानाति। तस्य महामनसः प्रत्येकं कार्यं देशस्य, हिन्दुजातेश्च उत्थानाय, जागरणाय चासीत्। अयं वृद्धत्वेन जर्जरितगात्रः महामना मालवीयः ९६४६ शततमस्य ख्रिस्टाब्दस्य नवम्बरमासस्य द्वादश-तारिकायां देशवासिनः शोकाकुलीकुर्वन् पञ्चत्वं गतः।

अध्ययनम्

ध्यानपूर्वकं विचारणमभ्यसनं पठनं चाध्ययनं भवति। अध्ययनेन कर्मणि योग्यता अर्थात् कार्यसम्पादनशक्तिश्चोदेति ज्ञानञ्च वर्द्धते। एतत् द्वयमेव जीवनस्य सफलतायाः कृते अत्यन्तमावश्यकमस्ति। अतएवाध्ययनम् मानवहिताय परमावश्यकम्।

अध्ययनस्य निकटतमसम्बन्धो विद्यया भवति। बहुला एवं विविधाः च विद्याः वर्तन्ते। किन्तु शास्त्रनिबद्धा विद्या प्रायेणाध्ययनस्य विषये ज्ञायते सर्वैः। अध्ययनं मनुष्याणां जीवने सदा भवति, परन्तु नियमपूर्वकविद्यास्वीकार एवाध्ययनं प्रत्यक्षरूपेण बोध्यते। प्राचीनकालेऽध्ययनस्यातीव महत्त्वमासीत्। बालकाः उपनयनसंस्कारानन्तरं स्वगुरुगृहं गत्वा विद्याध्ययनं कुर्वन्ति स्म। विद्याभ्यासं कुर्वन्तः ब्रह्मचारिणः अस्मिन् ब्रह्मचर्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालेऽन्यान् व्यापारान् परित्यजन्ति स्म। अस्याश्रमस्य पालनानन्तरमेव विद्यार्थिनः गृहस्थाश्रमं भजन्ते स्म। अस्मिन् समयेऽपि विद्यालयेषु गृहेषु वा अध्ययनं द्वयोः अवस्थयोः माध्यमेन भवितुं शक्नोति। स्वयं अध्यापकात् गुरोः वा अध्ययनमित्यपि द्विविधा अध्ययनस्यावस्था भवति। विद्यालयेषु, शिक्षालयेषु, गुरुकुलेषु वा अध्यापकात्, शिक्षकात्, गुरोः वा पठनं, शिक्षाग्रहणं, विद्याप्राप्तिश्च वा अध्ययनं भवति। तथापि स्वतः अनुभवेन शास्त्रालोचनेन वा ज्ञानप्राप्तिः अध्ययनस्य मूलप्रकृतिः।

सामान्यतः सर्वेषु विद्यालयेषु शिक्षकेभ्यः छात्राः विद्यां प्राप्नुवन्ति प्रमाणपत्राणि च लभन्ते। किन्तु नैतदावश्यकं यत् तेन मार्गेण ज्ञानं निश्चितं भवेदेव। स्वतः यदा ज्ञानार्थं तत्परः भवति तदैव तेन ज्ञानं प्राप्यते। तत्परतायाः दशायां स्वतः वा परतः द्वाभ्यां पद्धतिभ्यां ज्ञानं भवति, तदेवाध्ययनं भवति। अतएव मननं, स्वाध्यायः, चिन्तनमित्यादीनि अध्ययनस्य पर्यायरूपाणि ज्ञातव्यानि।

वस्तुतः स्वाध्यायस्य द्वौ अर्थौ स्तः। स्वस्य—निजस्याध्ययनं तथा स्वस्मिन्—आत्मनि अध्ययनमिति। शास्त्राणां विद्यानां वा अध्ययनं कृत्वा तदनुसारं स्वस्य चिन्तनं, परीक्षणं, शुद्धिः, इत्यादि प्रथमार्थे आयाति। स्वचित्ते ध्यानेन एकाग्रमनसा वा कस्यचित् शास्त्रस्य चिन्तनं मननं वा द्वितीयेऽर्थे आयाति। प्रथमार्थस्य दृष्ट्या तु जीवनमेवाध्ययनस्य वस्तु अस्ति। अतएवाचार्यः शिष्यं पाठयित्वा गृहस्थाश्रमे प्रवेशयन्नुपदेशम् ददाति—

"स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्" अत्र स्वाध्यायस्यार्थः आत्मनः चिन्तनं शुद्धिश्च ज्ञायते। अत्र द्वितीयार्थेऽध्ययनस्याभिप्रायः गृह्यते। प्राचीनकाले चिन्तने स्वाध्याये एव महर्षयः स्वसम्पूर्णजीवनं व्यतीतं कुर्वन्ति स्म।

अध्ययनेनैव मनुष्यः ज्ञानवान् विद्वान् वा भवति। तस्य बुद्धिः परिष्कृता जायते। अनेके महापुरुषाः अस्मिन् लोके ईदृशाः अभवन् ये कदापि विद्यालयं न गताः न च कस्यांचित् कक्षायाम् पठनमकुर्वन्। किन्तु ते स्वस्वाध्यायबलेन विदुषामपि गुरवः जाताः। बहवश्च एतादृशाः अपि मनुष्याः सन्ति ये जीवनस्याधिकतममंशं पाठशालायामेव यापितवन्तः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किन्तु तान् न कोऽपि जानाति । अतः अध्ययनं सदैव मनसा कर्त्तव्यम् न तु केवलं समययापनं विधेयम् । विद्यालयेष्वपि तेषामेवाध्ययनं सफलं भवति ये ध्यानेन तत्परतया च पठन्ति । सांसारिकप्रपञ्चान् विहाय विद्याभ्यासं कुर्वन्ति । यद्यपि स्वाभाविकी प्रतिभा विशेषरूपेण ज्ञानोदये कारणं भवति तथापि विशिष्टरूपेणाध्ययनं सफलतां प्रसिद्धिं च ददाति । अध्ययनेन जगति विपुलां कीर्तिं लभते मनुष्यः । चतुर्वर्गफलप्राप्तिरपि स्वाध्यायात् संभवति । अध्ययनबलेन मानवः ब्रह्मज्ञानं प्राप्तुं समर्थः भवति । तत्पश्चात् सः ब्रह्म-वित् मानवः ब्रह्म वै भवति । अध्ययनम् मानवस्य चेतः समादधाति, बुद्धिं प्रसादयति, लाघवमपनयति, गौरवं चोपनयति । अध्ययनबलेन श्रीरवीन्द्र-नाथठक्कुरः, श्रीराधाकृष्णः, श्रीवेङ्कटरमणादयः विभूतयः संसारे महापुरुषाः आसन् वर्तन्ते । श्रीलोकमान्यतिलकः महाभागः विद्याध्ययनदशायामध्यापका-नामपि गुरुः संजातः । इदमेवाध्ययनस्य माहात्म्यम् । ऋग्वेदे उक्तम्—

"उतत्वः पश्यन् न ददर्श वाचं, उतत्वः शृण्वन् न शृणोत्येनाम् ॥"

अर्थात् कश्चित् वाणीं विद्यां वा पश्यन्नपि ध्यानाभावात् न पश्यति, एवमेव शृण्वन्नपि अनवधानतया न शृणोति । एतेन सिद्धं यत् छात्राणां सामान्य-जनानां वा कृते ध्यानपूर्वकमध्ययनमावश्यकम् ।

अध्ययनेन विना मनुष्यः स्वकर्त्तव्यं न जानाति, अन्धतुल्यः सः स्व-जीवनं यापयति । जीवने सफलतां न प्राप्नोति । आत्मनः ज्ञानमध्ययनेनैव भवति । सदाचारः, शान्तिः, सन्तोषः, मुक्तिः सर्वमध्ययनेनैव सिद्ध्यति । सम्यक् अध्ययनमेव मनुष्यं प्रबुद्धं करोति । महात्मा बुद्धः अतिकालपर्यन्त-माहारमपि विस्मृत्य ध्यानेन चिन्तनं कृत्वा ज्ञानं लब्धवान् । अतएवाति-शयध्यानयोगेन इष्टप्राप्तये निर्दिष्टोद्देश्यानुसारं सततमध्ययनं कर्त्तव्यम् ॥

परोपकारः

अस्मिन् संसारे मानवाः, दानवाः, देवाः, पशुपक्षिणः, कीटपतंगाः सर्वे स्वार्थपराः दृश्यन्ते । स्वकीयपोषणं सुखसाधनमेव सर्वेषां कृत्यं भवति । सामान्यतः प्राणिनां स्वार्थप्रधाना प्रवृत्तिरेव । किन्तु स्वार्थं परित्यज्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परकार्यसाधनेऽपि बहूनां प्रवृत्तिः दृश्यते। परकार्यसाधनं, परदुःखनाशनं, परसुखदानं चेत्यादयः परोपकारशब्देन कथ्यन्ते। परोपकारतत्पराः खलु केचन सज्जना एव भवन्ति। वस्तुतस्तु परोपकारप्रवृत्तिः सद्गुणानां मध्ये एका श्रेष्ठतमा। मनुष्याणां पुरुषार्थेषु धर्मकृत्यानां मध्ये परोपकारः अत्यन्तं समुत्कृष्टं कर्म अस्ति। सर्वेषां धर्मग्रन्थानां साररूपेण परोपकार एव विशिष्टतत्त्वं ज्ञातव्यम्। उक्तं च—

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय, पापाय परपीडनम्॥ इति।

अस्मिन् जगति परोपकारः एव सारः। परोपकारेणैव दरिद्रनिर्धननिर्बल-प्राणिनां प्राणरक्षा भवति। यदि सर्वे मानवाः परोपकारस्थाने अपकारमेव कुर्युस्तदा लोकयात्रा असम्भवा स्यात्। अयम् परोपकारः सर्वेषां धर्माणां प्रथमो धर्मः। अतएव सर्वदा सद्भिः परोपकारो विधेयः। संसारस्य स्वस्य च ये पुरुषाः कल्याणमिच्छन्ति तेषां प्रवृत्तिः परोपकारे एव भवति। "परोपकाराय सतां विभूतयः" इति प्रसिद्धवचनम्। संसारे विविधस्वभाव-युक्ताः जनाः दृश्यन्ते। केचन स्वहानिं कृत्वापि परस्य हानिं कुर्वन्ति दुष्ट-तमाः। केचन स्वार्थसिद्धिहेतोः परस्य हानिं कुर्वन्ति। केचन स्वार्थहानिं दृष्ट्वाऽपि परस्य हानिं न कर्तुं वाञ्छन्ति। केचित्तु स्वहानिं कृत्वापि परोपकारं कुर्वन्ति साधवः। ये खलु कीर्तिमन्तः सञ्जाताः ते सर्वेऽपि परोपकारेणैव। भगवान् गौतमबुद्धो यत् षड्वर्षाणि शरीरं कठिनतपश्चर्ययाऽत्यन्तं कृशम-करोत्, तत् नैव स्वार्थसाधनाय जगतामुपकाराय एव। दानवीरेण जीमूत-वाहनेन स्वजीवनप्रदानं कृत्वा गरुडभयसंत्रस्तानां कीदृशः उपकारः कृतः इति सर्वे विद्वांसः जानन्त्येव। पूर्वस्मिन् काले धर्मविजयिना सम्राजा अशोकेन स्वीये समस्ते राज्ये मनुष्यचिकित्सालयाः, पशुचिकित्सालयाश्च संस्थापिताः। जनानामुपकाराय महाराजेन हर्षवर्धनेन स्वधनं दरिद्रेभ्यो बहुवारं वितीर्णम्। एभिरेव कारणैः अशोकहर्षयोः पुण्यनामाद्यापि लोकाः सादरम् गायन्ति। एकदा भगवान् रामचन्द्रो, ब्राह्मणशिशुं मृतमालोक्य तस्य कारणभूतं शम्बूकं हत्वा तं पुनरपि जीवितं कृतवान्। अनेन परोपकारेण ब्राह्मणस्य हृदये यः आनन्दराशिः प्रादुर्भूतस्तस्य वर्णनं कर्तुं कः खलु शक्तः स्यात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वस्तुतः सद्भावपरिपूर्णाः परदुःखदुःखिताः कल्याणकामनया ये सन्तः परोपकाराय प्रवृत्ताः भवन्ति ते स्वार्थं नेच्छन्ति। प्रत्युपकारस्याशां न कुर्वन्ति। स्वकीर्तिप्रशंसां वा ते नाऽभिलषन्ति। यथा आम्रवृक्षाः लगुडैः पाषाणखण्डैर्वा ताडिता अपि सरसं मधुरं फलं प्रयच्छन्ति। भारतीयेषु परोपकारनिरताः महात्मानः सदैव आसन्, वर्त्तन्ते, जायमानाश्च भविष्यन्ति। सततम्। दधीचिशिविप्रमुखाः स्वशरीरमपि परार्थं समर्पितवन्तः।

अस्मिन् युगेऽपि महात्मगान्धिसदृशाः विश्वकल्याणकामनया सर्वस्वत्यागं कर्तुं तत्पराः दृश्यन्ते। इत्थं खलु परोपकारभावनायां न केवलं कस्यचित् एकस्य कल्याणाय चेष्टा भवति अपितु परोपकारी सज्जनः समस्तचराचरजगतः कृते समदर्शी भवति। यथा वारिधरो मेघः सर्वत्र पक्षपातरहितः जलदानं करोति। यथा च दिवाकरः सूर्यः सर्वत्र समानरूपेण प्रकाशं विस्तारयति तथैव परोपकारी सज्जनोऽपि प्राणिमात्रे स्वार्थरहितां दयां वितरति। परेषाम् प्रयोजनसिद्धिरेव तेषां फलं जायते। गावः किं मधुरममृततुल्यं दुग्धं स्वपानार्थं ददति? केवलं परेषां लाभार्थमेव। भगवती भागीरथी केन स्वकीयेन स्वार्थेन प्रवहति। सा तु केवलं जनानामुपकारार्थमेव जलानि धारयति। यदि गंगा न स्यात् तर्हि उत्तरप्रदेशस्य समतल (मैदानी) भागस्य दशा अति दयनीया संजायेत। तथा अन्नाभावात् बहवो मनुष्याः क्षुधापीडिता मृताः स्युः। केनापि कविना उक्तम्—

परोपकाराय फलन्ति वृक्षाः,
परोपकाराय वहन्ति नद्यः।
परोपकाराय दहन्ति गावः
परोपकारार्थमिदं शरीरम्॥

अस्मिन् असारे संसारे न किमपि वस्तु स्वकीयं परकीयं वा विद्यते। यतः 'वसुधैव कुटुम्बकम्' इति तेषां सिद्धान्तः। ते सज्जनाः स्वविभवेन दरिद्राणां दुःखितानां च दुःखापहरणं सम्पादयन्ति। रविश्चन्द्रो घना वृक्षाः सज्जनाश्च युगे युगे दैवेन केवलं परोपकाराय एव निर्मिताः सन्ति। उक्तञ्च केनचित् कविना—

रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जनाः।
एते परोपकाराय युगे दैवेन निर्मिताः॥ इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परेषामुपकारः सज्जनानां स्वभावः वर्तते। तेषां शरीरस्य शोभा परोपकारेण भवति न खलु चन्दनादिविलेपेन—

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः खलु सज्जनानां
परोपकारेण न चन्दनेन॥

प्रत्येकः नरः प्राणैरपि धनैरपि परोपकारः कर्त्तव्यः यतः परोपकारजं पुण्यं क्रतुशतकादपि अधिकं भवति। सज्जनानां परोपकारव्यसनविषये कोऽपि कविः कथयति—

रागिणि नलिने लक्ष्मीं
दिवसो विदधाति दिनकरप्रभवाम्।
अनपेक्षितगुणदोषः,
परोपकारः सतां व्यसनम्॥

अतः धिक् तस्य मानवस्य जीवनम् यः परोपकारं न करोति। पशवः मृत्योः परमपि स्वचर्म परार्थमुत्सृज्योपकुर्वन्ति—

परोपकारशून्यस्य धिङ् मनुष्यस्य जीवितम।
जीवन्तु पशवो येषां चर्माप्युपकरिष्यति॥

संसारस्तु स्वार्थजालबद्धः अस्त्येव। किन्तु मनुष्यः प्राणिषु श्रेष्ठः। अस्योद्देश्योऽपि श्रेष्ठतमः स्यात्। इति मानवस्य मानवता। अतएव स्वक्षुद्रस्वार्थसीमां परित्यज्योच्चाशयेन भवितव्यम्। उत्पन्ना भूत्वा सर्वे उदरपोषणं कुर्वन्ति म्रियन्ते च। किन्तु यः उत्पन्नो भूत्वा आत्मनः उत्कर्षं करोति, श्रेष्ठतमं कार्यं करोति, स्वार्थभावनायाः परित्यागं करोति, स एव मुक्तः भवति। एष एव परमः पुरुषार्थः।

धन्या नरा विहितकर्मपरोपकाराः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'मानवजीवनस्य लक्ष्यम्'

मानवः सर्वेषां प्राणिनां मध्ये यथा श्रेष्ठः अस्ति तथैव तस्य जीवनस्य लक्ष्यमपि श्रेष्ठं अस्ति। येन केन प्रकारेण जीविकाचालनं तु पशवः अपि कुर्वन्ति। उक्तं च "उदरं को न बिभर्ति केवलम्" भोजनं, शयनं, परिवार-पालनं, दुःखात् पलायनं, सुखेन सम्बन्धः, इत्यादि तु मानवानां पशूनां चापि तुल्यमस्ति। मानवस्य धर्मः (विशेषकर्म) मानवता एव विशेषतया प्रशस्यते। उक्तं यथा—

"आहारनिद्राभय-मैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥"

स्वार्थसम्पादनेन सार्द्धमेव परार्थचिन्ता मानवजीवनस्य लक्ष्यं स्यात्। एतदर्थमेव मनीषिभिः मानवस्य धर्मव्याख्यायां लोकोत्तरकर्मणां संग्रहः कृतः। परोपकारः, सत्यम्, अहिंसा, एकता, आर्जवं, शान्तिः, त्यागः, अपैशुनम्, शीलम्, सदाचारः, प्रेम, उदारता, शमः दमः, कर्मतत्परता चेत्यादीनां निर्देशः ऋषिभिः कृतोऽस्ति। एतेषां सर्वेषां कर्मणां समुच्चयो हि संक्षेपेण धर्मः, अर्थः, कामः, मोक्षः इति चतुष्टयं पुरुषार्थशब्देन अभिहितम्।

एतेषु अर्थः कामश्चेति द्वयं स्वार्थसम्बद्धं भवति। तथापि अत्र न्यायः, अहिंसा, सहयोगः इत्यादेः भावः भवति। अर्थस्य तात्पर्यं स्वजीविकार्थं धनानां वस्तूनां च संग्रहः भवति। तत्संग्रहे दुराचारः, अन्यस्य हानिः, विरोधश्च न कर्तव्यः इति न्यायस्य अहिंसायाः सहयोगस्य च मार्गः। एवमेव कामः, तेन स्वावश्यकतापूर्तिः भवति। तत्रापि पूर्वोक्तमेव न्यायादिभावनाकरणं उचितम्।

अतः परं धर्मः, मोक्षश्चेति द्वयं तु स्वार्थरहितमेव भवति। धर्मस्य मोक्षस्य च इदं तात्पर्यं नास्ति यत् निजार्थमेव एतौ क्रियेते। धर्मेण जनानां मध्ये सद्भावना, एकता, प्रेमादिकं च वर्धन्ते, यतः अहिंसा-सत्यादिक एव धर्मः अस्ति। एतेन समाजे सुविधा वर्धते। एवमेव मोक्षः तत्र सांसारिक-लोभेन मनुष्याणां या आसक्तिः, तस्याः त्यागः भवति। तेन त्यागेन इदमेव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवति यत स्वयं त्यागं कृत्वा अन्येषां कृते उपभोगस्य अवसरः दीयते। अतएव मोक्षमार्गे धर्ममार्गे च गच्छन मानवः स्वस्य कल्याणं करोति तेन सहैव अन्येषां कृते प्रभूतं उपकारमपि करोति। एते चत्वारः पुरुषार्था एव व्यापकरूपेण संसारे विविधं कार्यजातं विस्तारयन्ति। सम्मेलनेन च एतेषां मानवजीवस्य उद्देश्यं सिद्धयति।

साधारणानां मनुष्याणां कृते पुरुषार्थेषु एकस्यापि साधनं पर्याप्तं भवति। यदि स्वार्थसाधकः मनुष्यः न्यायेन, सहयोगेन, अविरोधेन अर्थ-सिद्धिरेव कुर्यात् काममेव वा उपभुञ्जीत तदापि सः युक्तं करोति। यदि केनचित् चत्वारोऽपि समापिताः तदा तु सः उद्देश्यं पूरयित्वा परमात्मतत्त्वे सम्मिलति। स एव सफलजीवनयुक्तः, स एव संसारे आगत्य आगमनस्य लक्ष्यं सिद्धं कृतवान्, स एव पुरुषः। यतः यस्य जीवने पुरुषस्य अर्थः पूरितः स एव पुरुषः भवति नान्यथा।

बहवः पुरुषाः त्रीन् द्वौ एकं वा पुरुषार्थं साधयन्ति। यस्य एकोऽपि पुरुषार्थः सिद्धयति सोऽपि लोके धन्यः भवति। तस्य प्रशंसा जगति भूरि भूरि भवति। किन्तु एतादृशाः अपि पुरुषा असंख्याः सन्ति येषां जीवने एकोऽपि न सिद्धयति। एतादृशाः व्यर्थं भारस्वरूपं जीवनं धारयन्ति। उक्तं च—

"धर्मार्थ-काम-मोक्षेषु यस्यैकोऽपि न विद्यते।
अजागलस्तनस्येव तस्य जन्म निरर्थकम्॥"

अत्र लोके पुरुषार्थसम्पन्नमुद्देश्यं तदैव सिद्धयति यदा मनुष्यस्य हृदि उत्साहः भवति। अथ च यस्य मनसि उच्च भावना भवति स एव निजोद्देश्ये सफलः भवति। मनुष्यस्य शिक्षा, सत्संगः, सामाजिकवातावरणम् इत्यादीनां प्रभावः तस्य कार्यकलापेषु आपतति। अत एव सर्वे न तथा सुचारूरूपेण कार्यं सम्पादयितुं शक्नुवन्ति यथा केचन ज्ञानिनः। अस्मादेव-कारणात् मोक्षेच्छुकाः उत्तमाचरणाः साधवः परोपकारिणो जगति विरला एव भवन्ति। न सर्वे बुद्धाः भवन्ति, न सर्वे ख्रिष्टाः भवन्ति।

कामः, क्रोधः, लोभः इति त्रयं लोकत्रये पराजयस्य हेतुः भवति। तस्मादेतत्त्रयं त्यजेत्। मानवजीवने सर्वं सुखं आवश्यकं किन्तु ये अभि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लपन्ति—इदं दृश्यम्, इदं भोज्यम्, इदं भोग्यम् इत्यादि ते जीवनं यावत् जगज्जाले निमग्ना भवन्ति। अतएव लक्ष्यसिद्धिः—वासनां परित्यज्य उच्चाशयः स्यात्।

मित्रता

अस्मिन् संसारे किमपि कार्यं साहाय्यं विना न भवति। सर्वेषां मनुष्याणां कृते सहयोग आवश्यकोऽत एव 'मानवः सामाजिकः प्राणी'ति कथ्यते। स्थिते च समाजे कार्याकार्यकलापे मित्राणि अमित्राणि च भवन्ति। मित्रामित्रयोः सुहृद्दुर्हृदोः परीक्षा कथं स्यादिति विचार्य एवोक्तं—

"आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायैव मैत्री खलसज्जनानाम्॥

अतएव सज्जनैः सह एव मित्रता कर्त्तव्या। अन्यदपि यः परोक्षे कार्यं विनाशयति, प्रत्यक्षे प्रियं वदति, एतादृशं मित्रं सदैव परिहर्तव्यम्। यतो हि मित्रे अतीव विश्वासो—

"न मातरि न दारेषु न सोदर्ये न चात्मनि।
विश्वासस्तादृशः पुंसां यादृङ् मित्रे स्वभावजे॥" इति।

अतः मित्रामित्रलक्षणं विचार्य एव कर्त्तव्या सुमित्रता। यद्यपि "व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते" इत्युक्त्यनुसारेण स्वाभाविकमित्रतायां नहि किञ्चित् बाह्यं कारणमपेक्ष्यते। तथापि विदुषां वचनं ग्राह्यं—सन्मित्रलक्षणमुक्तं विद्वद्भिः—

"पापान्निवारयति योजयते हिताय
गुह्यानि गूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥" इति।

अनेन प्रकारेण असारे खलु संसारे मित्रेण समं न कोऽपि सहायो भवति। अतएव यदा 'मित्र' शब्दं कर्णे पतति तर्हि अपूर्वमानन्देनानन्दितं भवति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानवानां चेतः। संसारे ये केचित् सम्बन्धाः तेषु सर्वेषु पवित्रतमोऽयं सम्बन्धः। नैव तस्य स्थानं केनाप्यनेन सम्बन्धेन ग्रहीतुं शक्यते। इदमेव कारणं यत् कस्यापि विचक्षणस्य मुखान्निःसृतेयममृतवाणी—

"शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम्।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्॥" इति।

'मित्रेति' शब्दस्य पाठो नपुंसकलिंगेऽस्ति। अस्मात् येन केनापि सह मैत्री भवितुं शक्यते पुरुषो वा स्यात स्त्री वा स्यात्। कश्चिदपि सजातीयः मित्रं भवितुं शक्नोति। मित्रताबलेन कियत् लोककल्याणं कियत स्वकल्याणं भवतीति वक्तुं न पार्यते। रामसुग्रीवयोः मित्रता संसारस्य भारं दूरीकृतवती। श्रीकृष्णार्जुनयोः मैत्री भारतयुद्धे धर्मसंस्थापनं चकार। मित्रतायां स्वार्थलेशो न भवति। यदि स्वार्थभावनयाभिभूता मैत्री स्यात् तर्हि हानिकरी भविष्यति। यतो हि सन्मित्रमेव यथार्थरूपेण जीवनसहचरो भवति। किंवा सुखे किं वा दुःखे सर्वदा समानभावेन न व्यवहरति। मित्रस्य सुखाय स्वकीयानि पर्वतसदृशानि दुःखानि किमपि न गणयति तथा मित्रस्य रजःकणसदृशं दुःखं पर्वतमिव मन्यते। स्वमित्रस्य कल्याणभावनायाः चिन्तनमेव सन्मित्रस्य लक्ष्यम्।

मैत्री हृदयेन भवति। अतएवात्र धनिकाधनिकयोर्विचारो नास्ति। सुष्ठु सुन्दरं हृदयं यस्य सः सुहृद्। एतादृशं मित्रं भाग्येनैव मिलति। यतो हि—

"स्वाभाविकं तु यन्मित्रं भाग्येनैवाभिजायते।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति॥'

सर्वत्र सर्वकाले मित्रतायाः प्रभावः उत्कृष्टः उत्तमश्चासीदस्ति, भविष्यति च। मित्रता केवलव्यक्तिविशेषे एव नास्ति। अपितु मनुष्यस्य मनुष्येण, समाजस्य समाजेन, राष्ट्रस्य राष्ट्रेण सह मित्रता भवति। 'वसुधैव कुटुम्बकम्' इत्यस्याः भावनायाः प्रादुर्भावः मित्रतायाः क्रोडादेवाभवत्। फलतः मानवजीवने मित्रताया महत् महत्त्वं वर्तते। आपत्तिकाले शान्तिकाले चापि द्वयोः बहूनां च राष्ट्रयोः राष्ट्राणां च मैत्री विश्वकल्याणकारिणी भवति यदि द्वयोरुद्देश्यं दुष्टं न स्यात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मित्रता मानवजीवनस्य प्रकाशदीपिका । यदि सर्वे मानवाः पारस्परिक-जीवनस्य रंगमंचे मित्रतायाः भावनामादाय कार्यं संचालयन्तु तर्हि निश्चितैव स्यात् वसुन्धरायां स्वर्गस्य साकारकल्पना । विश्ववापिकायाः मनोहरं पंकजं केवलं मित्रस्य प्रकाशेन विकासस्य मुग्धतां प्राप्तुं शक्यते । इदानीं विश्वस्य सर्वाणि राष्ट्राणि वैज्ञानिककलायाश्चमत्कारिचमत्कारेषु अनुरक्तानि भूत्वा शोषणस्य विशालभावनायाः पुष्पवाटिकायाः संरक्षकाणि इव वर्तन्ते, फलतस्तेषां कृते मधुरफलमिव मधुरतादायिमित्रताप्राप्तिरसंभवा । इदानीं मानवता दाहकारिज्वालामुखपर्वतस्य शिखरे स्थिता । कस्मिन्नपि क्षणेऽस्याः विनाशः संभाव्यते । अतः सम्प्रति विश्वस्य महामहिमशालिनः राष्ट्रोन्नायकाः सर्वे महापुरुषाश्चिन्तिता विद्यन्ते, यत् केनापि प्रकारेण मानवतायाः संरक्षणं स्यात् ।

परन्तु स्पष्टमिदं यत् मित्रतायाः भावनया स्वार्थपरता विनंक्ष्यति, तथा नष्टं गतायां स्वार्थपरतायां मानवतायाः संरक्षणं स्वतो भविष्यति । तदैव 'वसुधैव कुटुम्बकमि'ति भावना सफला भविष्यति । वास्तविकी मित्रता एव चिरस्थायिनी भवति । यो यस्य स्नेहभाजनं भवति सः तस्य महतः दोषानपि न पश्यति, पश्यति चेत् गुणरूपे । अतएव मित्रताया उत्पत्तिः स्नेहस्याधार-भूमावेव भवति । सन्मित्रस्य संगतिः सदैव सुखसमृद्धिदायिनी भवति । मैत्री जनानां कृते मानवजीवनस्यैका वरदानरूपा । यस्याः अधिकारी मान-वः । सत्यां मित्रतायां मानवजीवनस्य सर्वाः विभूतयः स्वयमेव समा-गच्छन्ति । शोकदग्धस्य नरस्य सुहृद्दर्शनमौषधतुल्यं भवति । दर्पणे स्थिता छाया इव सन्मित्रं स्वमित्रस्य सुखदुःखयोः सर्वत्र सहैव वसति ।

सन्मित्रे प्राप्ते सति तत्साहाय्येन बहूनि महान्ति कार्याणि सुकराणि भवन्ति । यदा निराशाया ज्वालावलीढा भवामस्तदा सन्मित्रमागत्य सुधा-सदृशवचनैः शान्तिं प्रददाति । तस्मिन् क्षणे वयं सर्वं विस्मरामः । परन्तु सन्ति एतादृशाः अपि पुरुषाः ये निरर्थकमेव परहितं घ्नन्ति । ते सदैव सर्षप-मात्राण्यपि परदूषणानि पश्यन्ति । ते दुष्टात्मानः पुरुषाः केनापि प्रकारेण परस्वार्थं न कुर्वन्ति । कथितं केनापि कविना—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

"पाषाणो भिद्यते टङ्कैर्वज्रं वज्रेण भिद्यते।
सर्पोऽपि भिद्यते मन्त्रैर्दुष्टात्मा नैव भिद्यते॥" इति

एवंविधस्य पुरुषस्य सर्वाङ्गे विषं वर्तते। अतएव एतादृशैः पुरुषैः सह कदापि मैत्री न कर्त्तव्या, यतो हि एतादृशी मैत्री कदापि सुस्थिरा न भवति। खलमैत्री सर्वदा अशोभनीया अकल्याणपरम्परायुक्ता भवति। यथा—

"पात्रमपात्रीकुरुते दहति गुणं स्नेहमाशु नाशयति।
अमले मलं नियच्छति दीपज्वालेव खलमैत्री॥"

दुर्जनसंसर्गादेव दोष आयाति। यथा रावणः सीतां जहार पयोधेः बन्धनमभवत्। अतएव मैत्री सदैव विचारपूर्वकं कर्त्तव्या। वस्तुतः सत्यभूता मैत्री तु नीरक्षीवत् भवति। अत एवोक्तं केनचित् कविना—

"क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः।
गन्तुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं,
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्तादृशी॥" इति।

सत्संगतिः

महानुभावसंसर्गः कस्य नोन्नतिकारकः।
रथ्याम्बु जाह्नवीसंगात् त्रिदशैरपि वन्द्यते॥

अस्मिन् जगति सर्वेषां प्राणिनां मध्ये मानवः सर्वश्रेष्ठः सर्वोत्तमः सकलगुणवरिष्ठः वर्तते। अतएव सः अमृतस्य पुत्रः कथ्यते। अस्याः सृष्टेः रचनायाः समये सकलप्राणिनां उत्पादयिता भाग्यनियन्ता विधाता सर्वश्रेष्ठं मानवमुत्पाद्य तं बुद्धिबलसंयुक्तं कृतवान्। अतः सर्वेषां मनुष्याणां इदं परमं कर्तव्यमस्ति यत् सः स्वात्मकल्याणस्य साधनं चिन्तयन् तेषां निरीक्षणं कुर्वन् तत्प्रयोगं कुर्यात्। विधिना प्रदत्तानां बहूनां साधनानां मध्ये सत्संगतिः एकमतीव सुलभं सरलं च साधनमस्ति। यतो हि सर्वे प्राणिनः उत्पन्ना भूत्वा अस्मिन् लोके अन्यस्य संसर्गं प्राप्नुवन्ति। संसर्गेण—संगत्या विना जीवनं नीरसमरक्षितं च स्यात्। इदं संसर्गपूर्वकं जीवनं सर्वयोः चेतना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चेतनयोः समानमेव । संयोगः एव उत्पत्तेः कारणम्, स एव जीवनस्यापि कारणमस्ति । मानवः सर्वेषां प्राणिनां मध्ये कुशलतमः, बुद्धिमत्तमः, सामाजिकः प्राणी अस्ति । सः सदैव समाजे एव निवसितुमिच्छति तथा अन्यैः मानवैः सः सम्पर्कमपि कांक्षति यतो हि संगतिं विना क्षणमपि स्थातुं न शक्नोति । अत्र संसारविरक्तानामाप्तपुरुषाणां संन्यासिनां गणना सामाजिकानां मध्ये न भवति । तदतिरिक्ताः सर्वे संगतिं सहभावं समाजं च वाञ्छन्ति ।

इयं संगतिः सत्संगति–कुसंगतिभेदेन द्विविधा भवति । सतां सज्जनानां संगतिः सत्संगतिरुच्यते । कुत्सितजनानां संगतिः कुसंगतिः कथ्यते । यथा यस्य संगतिः तथा तस्य प्रभावः भवति । सज्जनानां संगत्या मानवः विनीतः शिष्टश्च भवति । असज्जनानां च संगत्या मानवः दुर्जनः भवति । अत एव उक्तं—

"संसर्गजा दोषगुणा भवन्ति ।" इति ।

दुर्जनानां संगत्या मनुष्यः दुर्जनः दुर्मतिश्च भवति, सज्जनानां संगत्या च सज्जनः । यथा कज्जलसंसर्गेण हस्तः कृष्णः भवति स एव चन्दनसंसर्गेण सुगंधितो भवति । अत एव सत्यमुक्तं केनचित्कविना—

"मलयाचलगन्धेन त्विन्धनं चन्दनायते ।
तथा सज्जनसंगेन दुर्जनः सज्जनायते ॥" इति ।

तुलसीदासेनापि स्वकीये रामायणमहाकाव्ये संगतिं प्रशंसयन् उक्तं—

"पारसपरसि कुधातु सुहाई ।" इति ।

सत्संगत्या मानवस्य प्रतिष्ठा कीर्तिश्च वर्धते । अत एव उच्यते—

"सद्भिरेव सहासीत सद्भिः कुर्वीत संगतिम् ।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ॥" इति ।

सत्संगतिप्रभावेण अबोधविक्लवाः जन्तवः अपि विद्वांसः भवन्ति, पापिनः अपि पुण्यात्मानः जायन्ते, कुख्यातः सुविख्यातः भवति, अपमानितः सम्मानितो भवति, खिन्नः सम्प्रसन्नः भवति, असत्यवक्ता सत्यभाषी संपद्यते, नीचाः दुष्टाः अपि साधवः भवन्ति । यथा चन्दनवने स्थिताः निम्ब-कंकोल-कुटजादयः वृक्षाः अपि चन्दनायन्ते । उक्तं च—

"काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।" इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानवः येन प्रकारेण मानवेन सह संगतिं करोति स तथैव भवति। यदा हीनैः सह सम्पर्कं करोति तदा हीनतां याति, समैः सह समतामेति, विशिष्टैः सह विशिष्टताम्। साधुसंगतिः चन्द्रचन्दनाभ्यामपि अधिका शीतला भवति। यथा—

"चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसंगतिः"॥

शीतल-सुगन्धित-पुष्पसंगात् तुच्छः कीटोऽपि देवानां शिरः आरोहति तथा जडत्वं प्राप्ता पाषाणप्रतिमापि देवत्वं याति। यतो हि—

"कीटोऽपि सुमनःसंगादारोहति सतां शिरः।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः"॥

सत्संगत्या मानवस्य ज्ञानवृद्धिः भवति। साधुपुरुषाः जीवनस्य गम्भीरतत्त्वानि पूर्णरूपेण विचारयन्ति। तैः सह उषित्वा मानवाः जीवनस्य गम्भीरतामनायासेनैवावबुध्यन्ते। यतः सन्तः सदैव आध्यात्मिकवातावरणे विचरन्ति अतः सतां संगतिः सर्वं प्रददाति। सर्वाणि वस्तूनि कल्पितान्येव ददति। परञ्च सत्संगतिः सर्वं कल्पितमकल्पितञ्च ददाति। अत एव उक्तं— "कल्पद्रुमः कल्पितमेव सूते
सा कामधुक् कामितमेव दोग्धि।
चिन्तामणिः चिन्तितमेव दत्ते
सतां तु संगः सकलं प्रसूते॥" इति।

सत्संगत्या अनेके लाभा भवन्ति। अनया पुरुषस्य मान उन्नमति, पुण्ये रुचिरुदेति, पापाच्चोद्विजते मनः, कामक्रोधादयो मदमात्सर्यादयश्च दिशो विदिशश्च भजन्ते। मानवस्य दुर्वृत्तयः शीघ्रमेव नश्यन्ति। सत्संगत्या दुर्जनोऽपि प्रेम-सहानुभूति-दया-क्षमा-सत्य-शान्ति-त्याग-परोपकाराणां साक्षात् मूर्तिः जायते। सद्गुणानालम्ब्य मानवः उन्नतेः शिखरं प्रति गच्छति।

परन्तु यदि मानवः कुसंगतिं करोति तदा तस्य पदे पदे मानहानिर्भवति, तस्य सर्वे गुणाः नश्यन्ति। सद्वृत्तयः दुर्वृत्तिषु परिवर्तन्ते। अतः मानवः दुष्टसंसर्गात् सदा सावधानः स्यात्। यद्यपि दुर्जनः अनेकगुणसम्पन्नोऽपि भवेत् तदपि वर्जनीयः। यतो हि—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

"दुर्जनः परिहर्त्तव्यो विद्यया भूषितोऽपि सन्।
मणिनालङ्कृतः सर्पः किमसौ न भयङ्करः॥"

प्रायेण बालकानां स्वभावः कोमलः भवति। तेषामुपरि संसर्गस्य प्रभावः स्वच्छदर्पणस्य प्रतिबिम्बमिव शीघ्रं भवति। अतः दुष्टसंसर्गात् तेषां रक्षा कर्तव्या। इदं तु सर्वेषां कृते आवश्यकं यत् सर्वदा कुसंगतित्यागे सत्संगतिलाभे च प्रयत्नः करणीयः। सत्संगतिः सर्वकल्याणं कर्तुं शक्नोति। अतः विद्या-यशो-बलवृद्धये सत्संगतिः कर्तव्या। दुर्जनसंसर्गश्च हेयः। अतः साधूक्तम्—

जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम्॥

उद्योगः

अस्यां कर्मभूमौ सर्वेषां प्राणिनां कर्तव्यं कर्म कर्तुम् अवतरणं भवति। सर्वे सर्वदा कर्म कुर्वन्ति च। यथोक्तं गीतायां भगवता श्रीकृष्णेन "नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्"। अर्थात् कर्मरहितः कोऽपि कदापि न भवति। यतः चिन्तनमपि कर्म, शयनमपि कर्म। मनुष्यः यद् यत् कर्म करोति तत्तत्सर्वं कर्मरूपेण गृह्यते। परन्तु सर्वं कर्म उद्योगरूपेण न गृह्यते। उत्पादकं उन्नतिकारकं सफलं च यत् कर्म तदेव समुद्योगः। विना उद्योगेन कस्यचिदपि उन्नतिर्न भवति। किन्तु तस्य जीवनयात्रापि दुर्लभा भवति। अतः संसारे ये खलु प्राणिनः सन्ति ते सर्वे उद्योगरताः विद्यन्ते। यथेयं पृथ्वी चक्रवत्परिभ्रम्य सर्वान् वसंतादीन् ऋतून् च चालयति। भगवान् भुवनभास्करः द्वादशराशिषु परिभ्रमन् अखिलं जगत् प्रकाशयति तथा अजस्ररूपेण नदी कलकलध्वनिं कुर्वती वहति। अतः इदं ज्ञायते यत् सर्वेषां कार्याणां कृते उद्योगः परमावश्यकः, मनोरथेन किमपि कार्यं न सिद्ध्येत्। पुरुषार्थाभावेन सम्पूर्णः समाजः निष्क्रियः निरर्थकश्च भविष्यति। उद्योगेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विना सुखं, यशः, धनं, विद्या, प्रतिष्ठापि न प्राप्यते। अतएव उक्तं केनचित् कर्मशीलेन कविना--

"उद्योगेन च सिद्ध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥" इति।

अत्र दैवपुरुषार्थौ इमे द्वे वस्तुनी उपलभ्येते। अनयोर्मध्ये कः श्रेयान्, अत्र नास्त्यैकमत्यं शास्त्राणां जनानां च। बहवः मनुष्याः दैवमाश्रित्य उद्योगं न कुर्वन्ति। ते दैवमाश्रित्य 'यद्भविष्यति तद्भविष्यत्येव नास्ति अत्र कश्चन संदेहः अतः चिन्ता न कर्तव्या' इति ब्रुवन्तः इमं श्लोकम् उदाहरन्ति प्रमाणरूपेण—

यस्माच्च येन च यथा च यदा च यच्च,
यावच्च यत्र च शुभाशुभमात्मकर्म।
तस्माच्च तेन च तथा च तदा च तच्च,
तावच्च तत्र च विधातृवशादुपैति ॥

इति विचिन्त्य उद्योगं न कुर्वन्ति। किन्तु दैवमपि उद्योगेन पुरुषार्थेन च विना न सिद्ध्यति। यथा एकेन चक्रेण रथस्य गतिर्न भवति तथैव दैवमपि उद्यमहीनं सन् न साफल्यमाप्नोति यतो हि—

"न दैवमपि संचिन्त्य त्यजेदुद्योगमात्मनः।
अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ॥" इति।

अतः सर्वं परित्यज्य प्रयत्नः करणीयः। यदि यत्ने कृते न सिद्ध्यति तत् नास्ति कश्चित् दोषः। अस्मिन् कर्मप्रधाने मध्यमलोके उद्योगशीलाः एव जनाः सिद्धिं, सुखं, धनं, विजयं च प्राप्नुवन्ति। विना पेषणेन तिलेषु स्थितमपि तैलं न प्राप्नोति। सर्वं भोजनवस्त्रादिकं प्राप्तमपि हस्तचालनेन विना उपभोगे न आयाति।

"उद्योगिनः करालम्बं करोति कमलालयः।
अनुद्योगिकरालम्बं करोति कमलाग्रजा ॥"

किञ्चिदपि वस्तु अस्मिन् जगति यत् परिश्रमेण न सिद्ध्येत्। उद्योगिनः पुरुषस्य कृते सर्वं सुलभं भवति। असम्भवमपि सम्भवं भवति। सः उद्योगिपुरुषः स्वकीयेन पुरुषार्थेन दैवमपि परिवर्तितुं शक्नोति। 'नेपोलियन'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
नामा वीरः सदैव वदतिस्म 'नास्ति मम कोषे असम्भवः शब्द इति तत्तु सत्यम्। यतो हि व्यवसायिनामध्यवसायिनाञ्च कृते नास्त्यसम्भवं किञ्चित्। अत एव उक्तं—

"नात्युच्चशिखरो मेरुः नातिनीचं रसातलम्।
व्यवसायद्वितीयानां नाप्यपारो महोदधिः॥" इति।

येषां विदुषां वीराणां महापुरुषाणां च कीर्तिः जन्मजन्मान्तरं बहुकालं यावत्तिष्ठति तत्तु पुरुषार्थस्य समुद्योगस्य च माहात्म्येन। तेषां जीवनं जनानां कृते अनुकरणीयं भवति। सामान्याः जनाः तस्मात् प्रेरणां प्राप्नुवन्ति। एतादृशाः एव उद्योगशीलाः त्यागिनः अवताररूपेण पूज्यन्ते। यद्यपि भाग्यमपि प्राणिनां कृते सुखदुःखयोः कारणं भवति। किन्तु पूर्वजन्मकृतानां कर्मणां सञ्चितसमूहः एव भाग्यम् दैवं च कथ्यते। यथोक्तं— 'पूर्वजन्मकृतं कर्म तद् दैवमिति कथ्यते।" यदि कश्चित् पुरुषः वर्तमानकाले कर्मविहीनः उद्योगरहितः सन् दैवं समाश्रित्य तिष्ठेत् तर्हि स जीवनव्यापारे युद्धे च लक्ष्मीं, विजयं च प्राप्तुं न शक्नोति। यतो हि—

"दैवं पुरुषकारेण साध्यसिद्धिनिबन्धनम्।
योऽतिक्रमितुमिच्छेत्तत्र स लोके नावसीदति॥"

तथा च—"कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः॥"

इति महात्मनां सत्यं वचः।

अस्मिन् वैज्ञानिके युगे तु पदे पदे कर्मणः एव प्राधान्यं दृश्यते। कलाविज्ञानविशारदानामेव युगः। इदानीं कर्मरहिताः जनाः भोजनमपि प्राप्तुं न शक्नुवन्ति। येषां हस्तयोः पादयोश्च शक्तिः कर्तव्ययोग्यता चास्ति ते एव सफलाः भविष्यन्ति। तेषामेव सर्वे जनाः संगिनः सम्बन्धिनः बान्धवाः सहायकाश्च भवन्ति। अतः सततं सदुद्योगशीलेन जनेन भाव्यम्। यदि संसारे पुरुषार्थो न स्यात् तदा सर्वे जनाः 'भाग्यं भाग्यमि'ति जल्पन्तः आलस्यपयोधौ निमग्नाः स्युः। न कोऽपि किमपि कार्यं कर्तुं प्रभवेत्। अतः अस्माभिः सर्वदा उद्योगशीलैः भाव्यम्। श्रीमता जगन्नियामकेन भगवता प्राणिनां करे उद्योगः दत्तः, दैवं तेनैव स्वायत्तीकृतम्। सर्वे महापुरुषाः उद्योगमाश्रित्यैव कार्यं कृतवन्तः। उद्योगबलेनैव पाण्डवाः हृतमपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

राज्यं उपलब्धवन्तः। पुरुषकारेणैव निर्धनाः धनिनः, निर्बलाः सबलाः, अज्ञानिनः ज्ञानवन्तश्च भवन्ति। अतः इत्थं प्रतीयते यत् उद्योगेन सर्वं सिद्ध्यति। अनुद्योगेन किमपि कार्यं न सरति। अतः अस्माभिः सदा उद्योगः करणीयः। उद्योगं प्रशंसन्नेव कश्चित् कविः कथयति—

'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः॥' इति।

एकता

सर्वस्मिन् काले एकतायाः महन्महत्त्वमासीत। तथैव अस्मिन् कर्मयुगे संघे एव शक्तिः वर्तते। एकत्वभावनया एकमुद्देश्यं लक्ष्यीकृत्य यत्कर्म क्रियते तदेकता कथ्यते। अनया भावनया सर्वे मानवाः बलवन्तः भवन्ति। यस्मिन देशे राष्ट्रे, समाजे, कुटुम्बे, सङ्घे वा एकतास्ति स एव देशः उन्नतिपथमधिरोहति। यानि महत्त्वपूर्णानि कर्माणि सम्प्रति भवन्ति अग्रे भविष्यन्ति च तानि सर्वाणि सङ्घरूपेणैव क्रियमाणानि सामर्थ्यवन्ति जायन्ते। अधुना पञ्चवर्षीयाः योजनाः अस्माकं देशे समृद्धिशक्तिशिक्षादीनां संघटनार्थं सञ्चालिताः। अस्माकं कार्यतत्पराः राष्ट्रोन्नायकाः विचारशीलाः ये नेतारः ते संघटनशक्तिं विचार्य एव एता योजनाः विस्तारितवन्त। ते व्यचारयन् यथा एकः तन्तुः अजायाः बन्धनमपि कर्तुमसमर्थ तथैव एकाकी पुरुषः सम्प्रति किमपि कर्तुं नार्हति। तेषां मनसि इयं सूक्तिः समुपस्थिता प्रतिभाति यत—

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥

अस्मिन संसारे आदिकालादेव एकतायाः माहात्म्यं वर्तते। वेदे, पुराणे स्मृतौ, शास्त्रे सर्वत्र अनेकेषु स्थलेषु एकतायाः प्रशंसा उपलभ्यते। अनया उक्तं वेदे—

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

"सङ्गच्छध्वं संवदध्वं सं वो मनांसि जायताम्,
समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम्।
समानं मन्त्रमभिमन्त्रेये वः समानेन हविषा जुहोम।
समानमस्तु वो मनो यथा वः सुसहासति।" इति।

पञ्चतन्त्रे, हितोपदेशे च एकतायाः अनेके लाभाः साधु प्रतिपादिताः तत्र 'संहतिः कार्यसाधिका' इति पङ्क्तिमाश्रित्य एका सुभगा कथा प्रतिपादिता। सुसाधनहीनाः अल्पबलाः व्याधजालनिबद्धाः कपोताः संहतिबलेनैव स्वकीयान् प्राणान् ररक्षुः। संहतिं वर्णयन् मरणासन्नावस्थायाम् एकः कृषकः स्वकीयान् सर्वान् प्रियान् पुत्रान् आहूयोपदिशतिस्म भोः पुत्राः 'सङ्घे एव शक्तिः' यथा बहुगुणसमन्वितां रज्जुं यूयं मिलित्वापि भग्नं कर्तुमसमर्थाः परन्तु यदि सा रज्जुः स्वगणेभ्यः पृथक् स्यात् तर्हि बालकः अपि तां त्रोटयितुं शक्नोति। अतः यदि यूयं स्वकीयं जीवनं अभिमानपूर्वकं चालयितुमिच्छेत तर्हि एकचित्तीभूय एव कार्यं कुर्यात। अनेन कथानकेन एकतायाः महत्त्वं वर्णितम्। अन्यदपि यथा एकस्मात् तिलात् तैलं न प्राप्येत, यथा एकेन तण्डुलेन कस्यापि उदरपूर्तिरपि न भवति तथैव एकेन पुरुषेण किमपि महत्कार्यं न सरति। इदं विचार्य एव अस्माकं नेतारः कार्यं कुर्वन्ति।

इदानीं भारतस्य या दशास्ति-तामवलोकयताम् अस्माकं देशस्य समक्षे अनेकाः समस्याः सन्ति। धनार्जनं कथं भवेत्। तत्कृते व्यापारस्य आवश्यकता। व्यापारार्थं वस्तुनिर्माणञ्चावश्यकम्। तदर्थं कुशलाः वैज्ञानिकाः कर्मकराः अस्माकं देशे न सन्ति। अस्त्राणां समस्या अस्माकं सम्मुखे अतीव आवश्यकी। एवमन्याः एतादृश्यः अनेकाः समस्याः सन्ति। आसां समस्यानां परिपूरणार्थं शिक्षायाः क्षेत्रे, उद्योगक्षेत्रे किं बहुना सर्वेषु क्षेत्रेषु परिवर्तनस्यावश्यकता। भारतीया जनता एकतामाश्रित्य यदि प्रयत्नं कुर्यात् तदैव समस्यायाः समाधानं शक्यम्। इयं सर्वेषां प्राणिनां पशुपक्षिणां च स्वाभाविकी प्रवृत्तिः यत् ते सर्वे सङ्घरूपेण कार्यं कुर्वन्ति, ते कदापि सङ्घं विरहय्य न तिष्ठन्ति। तैरपि सङ्घरूपतामनवाप्य किमपि दृढं कर्म कर्तुं न पार्यते। तथैव मनुष्यैरपि कदापि सङ्घरूपेण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विना किमपि कार्यं कर्तुं न पार्यते। विधातुः सृष्टौ सर्वत्र सङ्घशक्तिः प्रभवति। अतएव सर्वेषु कार्येषु सङ्घशक्तिरतीव आवश्यकी। सम्यगेवोक्तं महामतिना—

"संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः॥
बहूनामप्यसाराणां समवायो हि दुर्जयः।
तृणैर्विधीयते रज्जुः बध्यन्ते तेन दन्तिनः॥" इति।

अहिंसा

अस्माकं धर्मशास्त्रे अहिंसायाः महन्महत्त्वं वर्तते। मनुना निर्दिष्टेषु दशविधधर्मलक्षणेषु अहिंसायाः प्रथमं स्थानं वर्तते। यादृशं स्थानमहिंसायाः तादृशं न कस्यचिदपि धर्मस्य। यथोक्तं मनुस्मृतौ—

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥" इति।

अत्र प्रश्नः समुदेति का हिंसा। तत्र हिंसायाः अभावः अहिंसा, हिंसा शब्दः मारणार्थे प्रयुज्यते। प्राणिनाशः तस्य अभिप्रायः। अनेन हिंस् धातुनैव वर्णानाम् विपर्ययात् सिंहशब्दः सिद्ध्यति। सिंहस्य यत्कर्म अन्येषां प्राणिनां कृते तदेव हिंसायाः तात्पर्यम्। किन्तु सामान्यतया सामाजिकवातावरणे मनुष्याणां कृते अहिंसाशब्दः व्यापकमर्थं धारयति। हिंसायाः अर्थः तत्र न केवलं वधः अपितु मनसा, वाचा, कर्मणा कस्मैचिदपि पीडनम् दुःखदानं वा हिंसा कथ्यते। तद्विपरीता च अहिंसा भवति। अहिंसायाः सर्वत्र प्रथमं स्थानमस्ति। 'मा हिंस्यात् सर्वाभूतानि' इति विशिष्टं श्रुतिवाक्यम्। मानवानां परमोत्कृष्टं धर्मसाधनमहिंसा भवति। अहिंसायाः पालनं महद् दुष्करम्। अस्मिन् संसारे अस्मिन् युगे कोऽपि मानवः एतादृशः नास्ति यस्य कार्यं हिंसया विना चलेत्। तथापि हठात् स्वार्थपरतायां कस्यचिद् हानिः पीडनम्, ताडनम्, मारणम् वर्जयेत् इत्यपि वरम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भगवता श्रीकृष्णेनापि अहिंसां प्रशंसन् सम्यगुक्तं गीतायां—

"अहिंसा सत्यमक्रोधः त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ।"

भारतीयसंस्कृतौ केवलं धार्मिकक्षेत्रे अहिंसापालनस्य महिमा गीता सामाजिकक्षेत्रे राजनैतिकक्षेत्रे न। तथा सामाजिक-राजनैतिकक्षेत्रे च हिंसायाः पालनमेव अहिंसा । यथोक्तं—

'शठे शाठ्यं समाचरेत् ।

कविना भारविणापि उक्तम्—

'व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषवः ।।' इति ।

स्मृतिकारेण भगवता मनुनापि स्पष्टमेव उक्तं यत् गुरुं बालं वृद्धं वा आततायिरूपेण आयान्तं अविचारयन्नेव हन्यात् । यथा—

"गुरुं वा बालवृद्धं वा ब्राह्मणं वा विपश्चितम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ।।" इति ।

महात्मना गान्धिमहोदयेन हिंसायाः व्यापकं भावं स्वीकृत्य अहिंसात्मकमुद्देश्यमङ्गीकृतम् । यथाशक्ति सः स्वजीवने तस्य पालनमपि कृतवान् । महात्मा बुद्धः अहिंसायाः सर्वश्रेष्ठः अवतारः आसीत् । जडभरतनामकः महात्मा ततोऽपि प्रागहिंसापथगामी आसीत् । इत्थमहिंसायाः परम्परा भारतवर्षे मूलतः एव आसीत । परन्तु समये समये हिंसाऽपि आवश्यकी भवति । इदमेव कारणं यदावश्यकतानुसारेण सर्वे शान्त्युपासकाः महापुरुषाः आर हिंसायाः उपदेशं दत्तवन्तः । भगवता श्रीकृष्णेनापि महाभारते त्यक्तगाण्डीवार्जुनाय स्वशत्रूणां विहिंसनमुपदिष्टम् । क्षत्रियाणां कृते शत्रूणां विनाशनमेव धर्मः इति मत्वा भगवता शान्तिप्रियेण रामचन्द्रेणापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
समये समये अहिंसायाः पालनं परित्यज्य हिंसाधर्मः स्वीकृतः। किमधिकमियं सृष्टिरपि हिंसाया उपरि स्थिता। महत्तराः जन्तवः क्षुद्रं नाशयन्ति। यतो—"जीवो जीवस्य जीवनम्।" अयं अहिंसा धर्मः विरक्तानां कृते एव युक्तम्। गृहमेधिनां राज्ञां च कृते न युक्तम्। अतएव युधिष्ठिरं संबोध्य द्रौपदी कथयति—

'व्रजन्ति शत्रूनवधूय निस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः॥

अतः धर्मविषये एव 'अहिंसा परमो धर्मः' इति सिद्धान्तः नान्यत्र।

परन्तु यदि संसारे अहिंसायाः प्रचारः स्यात् तदा कोऽपि मनुष्यः दुःखी न स्यात्। यदि सर्वस्मिन् देशे सर्वे मानवा अहिंसा-व्रतं पालयन्तु तदैव पूर्णरूपेण अहिंसात्मकं वातावरणं सम्भवमन्यथा यदि अल्पसंख्यकाः जनाः अहिंसाव्रतधारिणः भवन्तु तर्हि सामान्यसमाजे तेषां निर्वाहः दुष्करं स्यात्। ते असामान्याः जनाः भवन्ति ये कष्टं सोढवाऽपि व्रतं पालयन्ति। सामान्यानां कृते अस्मिन् यन्त्रयुगे कूटनीतिप्रधानसमाजे अहिंसापालनं कष्टास्पदमस्ति। यद्यपि हिंसया बहूनि भौतिककार्याणि सिद्ध्यन्ति तथा नित्यनैमित्तिकजीवने शतशः हिंसाकर्माणि प्रतिदिनं मानवैः क्रियन्ते। परन्तु हिंसात्मिका सफलता कष्टदायिनी दुष्परिणामा अल्पकालोपभोग्या च भवति। असत्साधनेन सत्कर्म सदुद्देश्यं च कदापि न सिद्ध्यति।

अस्मिन् युगेऽपि बहवो विचारकाः सन्ति ये अहिंसात्मकं विचारं प्रचारयन्ति तत्र न केवलं भारतवर्षे प्रत्युत पाश्चात्त्यदेशेष्वपि एतादृशाः मानवाः सन्ति। यत्र अहिंसायाः पालनायोपदेशं ददति। अतो अहिंसा भारतीयानां कृते लोकद्वयस्य साधनरूपेण स्वीकर्तव्या। संसारे अहिंसायाः महती उपयोगिता वर्तते उच्यते च—

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धैर्यम्

अस्मिन् विश्वस्मिन् लोकानामुपकारकाः लोकरक्षणहेतवश्च ये गुणाः मनुनोपदिष्टाः । तेषु धैर्यमपि धर्मलक्षणे परिगणितम् । यथा—

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

एषु धर्मलक्षणेषु धैर्यं जनानां कृते महदुपकारकरं कल्याणकरं, लाभप्रदं चास्ति । यदि धैर्यं न स्यात् तदा सर्वेषां जनानां जीवनमतीव दुःखमयं स्यात । धैर्येण विना सर्वे मनुष्याः आधारहीनाः भविष्यन्ति । यदि धैर्यमपि न भविष्यति तर्हि निर्धनाः रोगिणः कथं जीवनं धारयिष्यन्ति । अतएव भगवता श्रीकृष्णेनाऽपि गीतायां धैर्यस्य महत्त्वपूर्णवर्णनं गीतम्—

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥

धैर्यम् जनानां विमोक्षाय भवति । अतः ये जनाः धैर्यम् धृत्वा कार्यं कुर्वन्ति ते अवश्यमेव साफल्यं प्राप्नुवन्ति । आपत्तिकालेऽपि कदापि धैर्यं न त्याज्यम् । यथोक्तम्—

त्याज्यं न धैर्यं विधुरेऽपि काले
धैर्यात् कदाचिद् गतिमाप्नुयात सः ।
जाते समुद्रेऽपि हि पोतभङ्गे
सांयात्रिको वाञ्छति तर्तुमेव ॥

धैर्यस्य प्रशंसा धर्मशास्त्रे, इतिहासे, पुराणे सर्वत्रोपलभ्यते । कठिनसमये धैर्यमेव मुख्यतमः आश्रयः । आपत्काले धैर्यं विना क्षणमपि जीवितुं न शक्यते । विपत्पयोधौ निमज्जतः पुरुषस्य कृते धैर्यस्यावलम्बनं श्रेयस्करं भवति । यथोक्तम्—

पुत्रैर्दारैर्वियुक्तस्य वियुक्तस्य धनेन वा ।
मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी नृप ॥

विपज्जालज्वालावलीढा अनेके पुरुषाः धैर्यमवलम्ब्य स्वप्राणान् ररक्षुः । अशोकवनवाटिकायां रघुपतिविरहोत्कण्ठिता जगज्जननी जनकात्मजा सीताऽपि धैर्यमाश्रित्य स्वशरीरत्यागात् विरराम ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'चन्द्रहास मम हर परितापम्।

रघुपति विरहानल सञ्जातमि'ति वदन्त्याः सीतायाः श्रीरघुपतिवियोगात्समुत्पन्नो विरहाग्निः धैर्यजलेनैव उपशशाम। धैर्यधारिणः युधिष्ठिरस्य कथा केन न श्रुता। महाराजः युधिष्ठिरः महबलशालिनः अन्ये चत्वारः भ्रातरश्च अज्ञातवासे वसन्तो दुःखमनुभवन्तः तथा अनेकं दुःखं सहमाना अपि धैर्यं न जहुः। धैर्यबलेनैव महाभारतयुद्धपयोधिं निस्तेरुः। धैर्यं नाम स्थिरबुद्धिता।

पुरा यदा अमृतप्राप्तये सर्वे देवाः मिलित्वा सागरस्य मन्थनं कर्तुं प्रवृत्ताः। मन्थनावसरे बहुमूल्यानि रत्नानि प्राप्तवन्तः। परन्तु परितोषं न गताः। मन्थनात् हालाहलं प्राप्यापि न विरताः यावदीप्सिततमां सुधां न प्राप्तवन्तः। अयमेव धैर्यस्य प्रभावः विघ्नभयेन नीचैः कार्यं न प्रारभ्यते। मध्यमपुरुषाः कार्यं प्रारभ्य विघ्नैः प्रतिहताः मध्ये एव विरमन्ति। परन्तु एतादृशा अपि पुरुषाः सन्ति ये पुनः पुनः विघ्नैः प्रतिहन्यमानाः अपि प्रारब्धं कार्यं न परित्यजन्ति ते एव धीराः। अतएव उक्तम्—

विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः।

धैर्यम् विरहिणां प्राणिनां हृदयं नाशाद्रक्षति। प्राणेश्वराद्वियुक्ताऽपि कान्ता यत् प्राणान् धारयति तद् धैर्यस्यावलम्बनेनैव। यथा भर्तुः शापात् यक्षेण विरहिता यक्षिणी यक्षश्च धैर्यमालम्ब्यैव मासान् व्यतीतान् चकार। धैर्यमाश्रित्य एव कथयति—'शेषान् मासान् गमय चतुरो लोचने मीलयित्वा'। अत्र धैर्यस्य एव सन्देशः प्रशंसा च यतो हि—

आशाबन्धः कुसुमसदृशः प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥

किमधिकं धैर्यस्य एव प्रभावः यत् वीरवरः महाराणा प्रतापः क्लेशं सहमानः अपि वने वने विचरन्नपि स्वकीयां प्रतिज्ञां न जहौ तथा अकब्बरराजस्य किङ्करतामस्वीकृतवान्। एवं महाराजः शिवराजोऽपि धैर्यबलेन औरङ्गजेबेन सह विरोधमकरोत्। एवमितिहासपुराणानामवलोकनेन धैर्यस्य माहात्म्यं सर्वत्र प्रतीयते। धैर्यबलेन मानवः सर्वं कर्तुं प्रभवति। अतः कदापि धैर्यं न त्याज्यम्। सर्वासु अवस्थासु धैर्यमवलम्ब्य एव कार्यं करणीयम्॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वावलम्बनम्

अस्मिन् चराचर-जगति "एकाकी जायते जन्तुरेक एव विलीयते" अर्थात् मनुष्यः प्राणी वा कश्चिन् एकाकी उत्पन्नो भवति एक एव म्रियते। लोके हीनस्य मध्यस्य महात्मनो वा सर्वस्य विनाशः नियतः। यम-मन्दिरे सः एकाकी व्रजति। अतः सः वस्तुतः एकाकी एवास्ति। अस्मिन् संसारे तस्य सम्बन्धिनः सहयोगिनः मित्राणि वा स्वार्थेन जायन्ते। अन्योन्यस्वार्थसम्बन्ध एव सहभावस्य सहयोगस्य कारणं भवति। स्वार्थसंयोग एव संसारः। यदा कस्मिंश्चित् स्थाने स्वार्थस्य हानिः संभवति तदा प्राणिनः सहयोगं सहभावं वा त्यजन्ति। प्राणी तावदेवा-न्यस्याश्रयं गृह्णाति यावत् सः स्वकीयं स्वार्थं साधयितुं स्वयं सम्यक् समर्थो न भवति। यावत् शिशुः असमर्थः भवति तावत् मातरं पितरं चाश्रयति यदा गमने भाषणे कर्मणि समर्थः भवति तदा तयोः अपेक्षां न करोति। पशुपक्षिणां शावकाः यावत् धावितुमुत्पतितुं वा समर्थाः न भवन्ति तावदेव पित्रोः आश्रयं याचन्ते पश्चात् ते पितरं मातरं च न जानन्ति। मनुष्याणां मध्येऽपि एष व्यवहारः दृश्यते।

यद्यपि आधुनिककाले कोऽपि मानवः कदापि स्वकीयं स्वार्थं साधयितुं पूर्णरूपेण समर्थो न भवति। सर्वेषां परस्परं सामाजिकः सम्बन्धः परवशीकरोति। स्वकीयोपभोगस्य आवश्यकतायाः वा सर्वाणि वस्तूनि न कोऽपि एकाकी निर्मातुं समर्थोऽस्ति। यतः इदानीं मनुष्यस्यावश्यकता नास्ति परिमिता। तथापि सर्वस्याः आवश्यकतायाः कारणं पुण्यं पौरुषं योग्यता च पुरुषाधीना अस्ति। एतेषामर्जनार्थं मनुष्यः अन्यस्याश्रयं गृह्णीयात। धनस्य वैभवं संसारे सर्वत्र दृश्यते अतएव "धनमूलमिदं जगत इदं सत्यम्। यस्य विपुलं धनमस्ति सः ब्रह्मघ्नोऽपि नरः पूज्यः। अस्मिन् जगति धनवान् पुरुषः कुलीनः, पण्डितः, गुणज्ञः, सुवक्ता मन्यते। लोके धनमेव पुरुषस्य बन्धुः। मानवः अर्थस्य दासः। उक्तञ्च—

न नरस्य नरो दासो दासश्चार्थस्य भूपते।
गौरवं लाघवं वापि धनाधन–निबन्धनम्॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
धनबलेन मानवः प्रत्येकं कार्यं कर्तुं समर्थः भवति।

उद्यमेन विना अपि किमपि कार्यं न सिद्ध्यति। मानवस्य सर्वाणि कार्याणि उद्यमेनैव सिद्ध्यन्ति। उद्यमं विना जन्तवः ऐश्वर्यं सम्पदां न लभन्ते। आलस्यं हि मानवानां रिपुः उद्यमश्च बन्धुः। अत एवोक्तम्—

उद्योगिनः करालम्बं करोति कमलालया।
अनुद्योगिकरालम्बं करोति कमलाग्रजा॥

मानवोन्नत्यै योग्यताऽपि अत्यावश्यकी। योग्यतां विना मानवः समाजे सम्मानं न प्राप्नोति। विद्वान् पुरुषः राज्ञः अपि श्रेष्ठः यथा काऽपि बन्ध्या प्रसववेदनां न जानाति तथैव मूर्खः योग्यविद्वत्पुरुषस्य महत्त्वं ज्ञातुं समर्थः न भवति। यथा—

विद्वानेव विजानाति विद्वज्जनपरिश्रमम्।
नहि बन्ध्या विजानाति गुर्वीं प्रसववेदनाम्॥

विद्याविनययुक्तो नरः सर्वेषाम् चेतांसि मोहयति सः सर्वत्र पूज्यते। अत एव इदं कथ्यते—

पण्डिते हि गुणाः सर्वे मूर्खे दोषाश्च केवलाः।
तस्मान्मूर्खसहस्रेभ्यो प्राज्ञ एको विशिष्यते॥

योग्यः भूत्वा, पुरुषार्थी भूत्वा, स्वार्थपूर्तिपर्यन्तं द्रव्यार्जने समर्थः भूत्वा च मनुष्यः यदि परमुखापेक्षी न स्यात तर्हि स भवेत् स्वयं पूर्णः। योग्यतां पौरुषं चार्जयितुमपि यदा सः स्वावलम्बी स्यात तदा ततोऽपि उत्तमः स्यात्। इदं नास्ति स्वावलम्बनस्य तात्पर्यं यत स्वकीयामावश्यकतां पूर्णां कर्तुं समर्थो भूत्वा अन्यैः सह सम्बन्धं त्यजेत्। किन्तु स्वावलम्बनस्योद्देश्यं तु प्रशस्तम् अस्ति। यस्य स्वार्थ एव पराधीनः अस्ति, यः स्वभरण-पोषणमपि कर्तुं समर्थो नास्ति, सः अन्यस्य कां सहायतां करिष्यति। अतः स्वावलम्बनस्यास्ति उद्देश्यं यत् स्वार्थे समर्थो भूत्वा परोपकारं कुर्यात्। इदं हि मानवजीवनस्य रहस्यम्।

स्वावलम्बी पुरुषः सूर्य इव प्रकाशते न तु चन्द्रवत। सूर्यः स्वतेजसा स्वयं प्रकाशितः अस्ति। ब्रह्माण्डमपि स प्रकाशयति। चन्द्रमपि स्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
प्रकाशेन प्रकाशयति। चन्द्रस्तु स्वयमपि प्रकाशयितुं न समर्थः अतः अन्यान् कथं प्रकाशयेत्। यदि सूर्यस्य प्रकाशः चन्द्रं न प्रकाशयेत् तदा सः स्वयमन्धकारे विलीनः भवति यथा अमावस्यायां तिथौ सर्वत्रान्धकारस्य साम्राज्यं दृश्यते। स्वावलम्बिनः पुरुषाः स्वयमेवोन्नतिशिखरमारोहन्ति। ते कदापि पराश्रिताः भूत्वा न जीवन्ति। यस्मिन् देशे, यस्मिन् समाजे, यस्मिन् कुले उद्योगिनः पुरुषाः भवन्ति तत्र शिरोमणयः भूत्वा प्रकाशमानाः सन्तः जीवन्ति। यथा मृगराजः वनस्याधिपत्यं स्वयं स्वकीयेन पौरुषेण गृह्णाति तथा नरा अपि जनानाम् हृदस्योपरि स्वामित्वं गृह्णन्ति। युक्तमिदं कथितं केनचित् विद्वद्वरेण—

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता॥

परमुखापेक्षी कातरपुरुषः कदापि उन्नतिं न करोति। सः योग्यो भूत्वाऽपि नश्यति। स्वावलम्बनेनैव स्वयं प्रकाशेनैव पुरुषाः राष्ट्रनायकत्वं धारयन्ति। स्वातन्त्र्यं स्वाधीनत्वं वा स्वावलम्बिनः एव पुरुषस्य भवति। ते च समदृष्ट्या सुखस्य दुःखस्य वा अपेक्षां न कुर्वन्ति। ते सुखं प्राप्तुमन्यस्य पृष्ठतो न गच्छन्ति, किन्तु सर्वेषामग्रण्यः भूत्वा विघ्नानां साम्मुख्य स्वयं कुर्वन्ति। तेषां सम्मुखे 'मेरुः स्वल्पशिलायते'। सुन्दरं च इदमुक्तम्— "मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम्" तथा—

कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा॥

उत्साहसम्पन्नानां स्वावलम्बिनामग्रे विघ्नसमूहः स्थातुं न शक्नोति। आत्मविश्वासेनैव स्वावलम्बः आयाति। 'आत्मा ईश्वरः, ईश्वरश्च सर्वशक्तिमान' इति मत्वा यः कार्यक्षेत्रे संसारे प्रवृत्तो भवति सः स्वावलम्बी पुरुषः सदैव विजयं प्राप्नोति॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वे गुणाः काञ्चनमाश्रयन्ति

आधुनिके युगे वर्ततेऽर्थस्यैव महद् महत्त्वम्। अर्थस्यैव लाभे क्रियते आधुनिकैः त्रैलोक्यस्य सुखानुभूतेः साकारकल्पना। भगवता विष्णुना एवार्थस्याधिष्ठात्रीं देवीं लक्ष्मीं संप्राप्य सम्यक् निर्णीतमर्थस्य महत्त्वम्। चतुर्वर्गगणनायाः अवसरेऽर्थस्यैव प्रथमोल्लेखः दृश्यते। अर्थाभावे कोऽपि किमपि दुःसाध्यं महत्कार्यं कर्तुं नहि शक्नोति। समग्राणि कार्याणि धनेनैव सिद्ध्यन्ति। धनेन विना न कस्यापि वस्तुनः स्थितिर्विद्यते।

मनुष्यः एकः सामाजिकः प्राणी अस्ति। सामाजिके जीवनेऽर्थाभावे कोऽपि जीवनस्य विकासं कर्तुं न शक्नोति। मानवस्य सम्पूर्णजीवनं धनमयं दृश्यते। ब्रह्मचर्याश्रमे विद्याध्ययनाय धनस्यावश्यकता विद्यते। गृहस्थाश्रमे स्वकुटुम्बस्य पालनपोषणार्थं दीनदुःखितानामार्तजनानाञ्चोदरदरीभरणार्थमर्थस्य संग्रहः आवश्यकः। गृहस्य निर्माणं, पारिवारिकसदस्यानां परिपालनं, बालकानां शिक्षा, औषधादिप्रबन्धः एवमनेकानि कार्याण्यर्थद्वारेणैव भवन्ति। वैवाहिकोत्सवे, जन्मोत्सवे महती नन्वावश्यकता प्रतिभात्यर्थस्य। येषां पार्श्वे अर्थाभावः ते समाजे निरादरार्हा भवन्ति। समाजे तेषां गणना निम्नश्रेण्यां भवति। वानप्रस्थाश्रमे तीर्थाटनार्थं स्वभार्यायाः स्वस्य च सुखेन निवासार्थं जनः धनमिच्छति। किं बहुना संन्यासाश्रमेऽपि संन्यासी स्वजीवनस्यावश्यकतापूर्त्यै धनमीहते। अनेन प्रकारेणेदमेव स्पष्टं ज्ञातं यत् यावज्जीवनमर्थस्य संग्रहः सुतरामावश्यकः। धनेन विना कोऽपि मानवः स्वजीवनयात्रां सुखेन यापयितुं समर्थः न भवति।

अस्मिन् जगति स्वल्पमपि कार्यं धनेन विना भवितुं नार्हति। पाठशालायाः निर्माणं, मन्दिरस्योद्घाटनं, धर्मशालायाः निर्माणं, तीर्थाटनस्य सम्पादनं कूपवापीतडागानां जीर्णोद्धारः, अतिथीनां सत्कारः, मृतस्यान्त्येष्टिक्रियापि धनेन विना कोऽपि कर्तुं न शक्नोति। मानवस्य सर्वाः इच्छाः धनाभावात् शशकविषाणवत् अजागलस्तनवत् निष्फलाः भवन्ति।

अस्मिन् वैज्ञानिके युगे वैज्ञानिकयन्त्राणां प्रयोगं विना किमपि राष्ट्रं विश्वस्य प्रगतिशीलराष्ट्राणां श्रेण्यां कथमपि प्रचलितुं न शक्नोति। परन्तु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वैज्ञानिकाविष्काराणां समुचितः प्रयोगः अर्थाभावे न संभवः। इदानीं वैज्ञानिकाः वैज्ञानिकयन्त्राणां सहयोगेन प्रकृतेः उपरि सम्यक् विजयं प्राप्तवन्तः। परन्तु धनहीनानां मानवानां कृते तु तेषां वैज्ञानिकचमत्काराणां कोऽप्युपयोगः नास्ति। फलतः इदं स्पष्टं यत् धनाभावे कोऽपि वैज्ञानिकाविष्काराणां समुचितोपयोगं कर्तुं न शक्नोति। वैज्ञानिकशिक्षायाः लाभः विशेषेणैव धनिकानां बालकाः प्राप्नुवन्ति। अर्थं विना कोऽपि प्रतिभासम्पन्नः छात्रः वैज्ञानिकशिक्षां प्राप्तुं न शक्नोति। धनिकानां छात्राः वैज्ञानिकयोग्यताप्राप्त्यर्थममेरिकारूसादिपश्चिमीयराष्ट्रेषु गच्छन्ति परन्तु धनहीनाः बालकाः बुद्धिमन्तोऽपि वैज्ञानिकशिक्षायाः विशिष्टेन ज्ञानेन वञ्चिताः भवन्ति।

राजनैतिकक्षेत्रेऽपि यद्यपि सर्वे नागरिकाः समानाधिकारिणः वर्तन्ते। परन्तु विशिष्टपदेषु उच्चशिक्षालंकृताः धनिकानां बालकाः एव गच्छन्ति। धनाभावे धनहीनानां कृषकाणामन्येषां साधारणजनानां बालकः नैव प्राप्नुवन्ति महत्पदम्। लोकसभायाः विधानसभायाः सदस्यानां पदप्राप्त्यर्थं प्रायशः बहवः विद्वांसः धनाभावे नानाक्लेशपीडिताः दरीदृश्यन्ते। अतएवास्मिन् सांसारिकजीवने धनस्य पदे पदे आवश्यकता भवति।

अयमर्थप्रधानो युगो वर्तते। धनिकानां समीपे नानाज्ञानमण्डिताः विद्वांसः। विभिन्नकलाकुशलाः कलाकाराः, कलकण्ठसम्पन्नाः संगीतज्ञाः अनायासेनैव समागत्य स्वस्य कलायाः प्रदर्शनं कुर्वन्ति। सर्वे मनुष्याः कुलकुशलशीलविरहिते धनाढ्यमनुष्ये स्वानुरागं प्रकटयन्ति किन्तु सुकुलः कुशलः सज्जनः विद्वान् दरिद्रपुरुषः समाजे आदरं न प्राप्नोति। यथोक्तम्—

सुकुलं कुशलं सुजनं विहाय कुलकुशलशीलविकलेऽपि।
आढ्ये कल्पतराविव नित्यं रज्यन्ति जननिवहाः॥

अर्थो हि सर्वकार्यस्य प्रधानतमं साधनम्। धनं जनस्य दोषान् दुश्चरित्रमकुलीनतामविवेकतामज्ञानतां मूर्खताञ्च निगूहति। दुःशीलः दुश्चरित्रोऽपि धनवान् पुरुषः जनैः पूज्यते। सत्यमेवोक्तं केनापि कविना यत्—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

धनैर्निष्कुलीनाः कुलीना भवन्ति
धनैरापदं मानवा निस्तरन्ति ।
धनेभ्यः परो बान्धवो नास्ति लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥

धनवतां पुरुषाणां विपुलं धनमेव तेषां यशसः मूलकारणम् । यस्य समीपे धनं विद्यते सः कुलीनः, पण्डितः, श्रुतिमान् , गुणज्ञः, योग्यवक्ता तथा दर्शनीयः भवति । परन्तु वित्तहीनः शीलवान् गुणवान् विद्वान् पुरुषः शोभां न प्राप्नोति । सर्वे जनाः तं तिरस्कारदृष्ट्या पश्यन्ति । तस्य गुणानामादरं कोऽपि जनः न करोति । नास्ति केवलमस्मिन्नेव युगेऽपि तु सत्ययुग द्वापर-त्रेतादियुगेष्वपि काञ्चनस्य महान् महिमा वर्णितः विद्वद्भिः । अर्थाभावे कोऽपि दानवीरः दानशिरोमणिः भवितु न शक्नोति । येषां दानवीरपुरुषाणां नामानि अद्यापि स्मर्यन्ते तेषां यशसः मूलकारणं धनमेवासीत् ।

यदा धनसम्पदा समीपे भवति तदा स्वकीयपत्नी प्रेम्णा मिलति, नाना-भावविकारैः मनोविनोदं करोति, बालकाः 'पिता' इति सम्बोधनं कुर्वन्तः गर्व-मनुभवन्ति । अन्ये पारिवारिकसदस्याः अनायासेन प्रेमप्रदर्शनं कुर्वन्ति । परन्तु यदार्थाभावो जायते तदा स्वकीया धर्मपत्नी धर्ममार्गं परित्यज्य स्वामि-सम्बोधने दुःखमनुभवति । बालकाः अपि दृष्ट्वा दूरादेव पलायन्ते तथाऽन्ये बान्धवाः शुष्कहृदयदृष्ट्या विलोकयन्ति मित्राणि दूरादेव नमस्कारं कुर्वन्ति । बान्धवानां मध्ये मानवस्य धनहीनजीवनं युक्तं न भवति यथा स्पष्ट-मस्मिन्नेव श्लोके —

वरं वनं व्याघ्रगजेन्द्रसेवितं
वरं वनं पक्वफलाम्बुभक्षणम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥

अनेन प्रकारेण सर्वत्र इदमेव दृश्यते यत् सर्वे जनाः केवलमर्थमेवापे-क्षन्ते । सर्वे वयोवृद्धास्तपोवृद्धा ज्ञानवृद्धाश्च जनाः धनवृद्धस्य द्वारे किंकरा इव तिष्ठन्ति । अधिगतनिखिलशास्त्राः विद्वांसः तेषां पार्श्वे स्थातुमासनं प्राप्तुं च यतन्ते । तेषां सामीप्यं प्राप्य जनः आत्मानं गौरवान्वितं मन्यते, कपालिना

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मौलिधृतापि जाह्नवी दिगम्बरं शंकरं विहाय रत्नाकरं प्रति सत्वरं धावति यथोक्तम्—

गंगां च धारयति मूर्ध्नि सदा कपाली
सा तस्य चुम्बति मुखं न कदाचिदेव।
रत्नाकरं प्रति चुचुम्ब सहस्रवक्त्रै—
गंगा यतो युवतयः सधनानुकूलाः॥

अतएव सर्वत्रार्थस्य महिमा दृश्यते कष्टमर्थार्थिनः पुरुषाः किं न कुर्वन्ति धनमेव मनुष्याणां यौवनसम्पादकम्, धनवान् पुरुषः वृद्धावस्थायामपि यौवनं प्राप्नोति किन्तु निर्धनः युवा पुरुषः यौवनेऽपि वार्धक्यमाप्नोति। अतः सर्वेषां मानसि धनार्जनस्य महती पिपासा दृष्टिगोचरीभवति केनचिद् महाकविना साधूक्तं— टका धर्मः टका कर्म, टकैव परम सुखम्।

यस्य गेहे टका नास्ति हाटके टकटकायते॥

अर्थाभावे पुरुषाः पुरुषत्वहीनाः भवन्ति यतः नारीणां नरो भर्त्ता नरस्य धनसम्पदः।

उदारचरितानां तु वसुधैव कुटुम्बकम्

'आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः' विविधविचारनिपुणाः महानुभावाः यथार्थरूपेण मानवजीवनस्य महन्महत्त्वं जानन्ति। फलतः सर्वैः मानवैः सह स्वकुटुम्बवदाचरणमाचरन्ति। विवेचयन्ति ते विवेचकाः यत् सर्वे मानवाः एकस्यैव कलाकुशलस्य कलाकारस्य कस्या अपि कल्पनायाः मूर्तस्वरूपाः वर्तन्ते। अतः सर्वैः समं कुटुम्बवत् व्यवहर्तव्यम्।

उदारचरितानां महापुरुषाणां दृष्टिपथे सर्वे प्राणिनः समानरूपेण प्रेमभाजनानि भवन्ति। प्राणिनां दुःखे दुःखस्यानुभूतिः एवं सुखे सुखस्यानुभूतिः भवति सज्जनानामाचारः। स्वार्थं विहाय मानवतायाः संरक्षणमेवैकमात्रो धर्मः वर्तते मानवानां कृते। प्रेमप्रवाहे प्रवाहितानां प्राणिनां संरक्षणस्य वसुन्धरायां स्वर्गस्यानन्दमयी स्थितिः वर्तते। यदि सर्वे मानवाः पारस्परिकभेदभावस्य निकृष्टभावनां निष्कास्य एकीभूय प्राणिभिः समं कुटुम्बवदा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

चरणमाचरन्ति तर्हि निश्चितमेव संभाव्यते स्वर्गस्य कल्पना पृथिव्यामिति उदारचरितानां विचारः विभिन्नकालेषु विभिन्नदेशेषु समुत्पन्नाः महापुरुषाः 'वसुधैव कुटुम्बकमिति' भावनामादाय प्राणिनां संरक्षणाय कार्यं कृतवन्तः।

ये यथार्थरूपेण सच्चरित्राः सज्जनाः उदाराः भवन्ति ते एव सर्वप्रियतायाः पदं प्राप्नुवन्ति प्राणिनां स्नेहभाजनानि च भवन्ति। एतादृशानां मानवानां सज्जनाः विद्वांसः कवयश्च यशो गायन्ति।

सकलभावनां दूरीकरणस्य प्रेमैव एकमात्रोपायः वर्तते। आनन्द एव जीवनस्याधारः भवति। सज्जनानां कृते तदैवानन्दस्य लाभो भवति यदा सर्वे प्राणिनः सुखिनः निरामयाः भवन्ति भद्राणि पश्यन्ति च उक्तं च—

'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।'
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥ इति।

सज्जनाः धीरवीरपुरुषाः अतीवोदाराः सन्ति। प्राणिनां दुःखनिवारणमेव सज्जनानां जन्मनः एकमात्रम् लक्ष्यं लक्ष्यते। इयं लघुचेतसां पुरुषाणां प्रवृत्तिः यत् 'अयं निजः अयं परः' इति। ते सर्वे सदैव संकुचितसीम्नि निबद्धाः भवन्ति। एते पुरुषाः स्वनैतिकाध्यात्मिकविकासं कर्तुं कदापि समर्थाः न भवन्ति। यद्यपि कस्मिन्नपि विद्यालये विश्वविद्यालये वा प्रेम्णः शिक्षायाः व्यवस्था नैव दरीदृश्यते। तथापि जीवनस्य प्रथमोन्मेषात् प्रथमक्षणाद्वा मानवाः प्रेमजलसेचितस्य वातस्यावरणे जीवनलाभं लभन्ते विकासं प्राप्नुवन्ति च स्नेहमूर्त्तेः मातुः अपारममता, पितुः निस्वार्थस्नेहः, मातॄणां भगिन्याश्च स्वाभाविकवात्सल्यभावः सर्वेषु प्राणिषु पूर्वतः एव स्थायिरूपेण विद्यते, एते भावाः निरन्तरं प्रत्येकस्य प्राणिमात्रस्य हृदयप्लावनं कुर्वन्ति स्म। आभिः भावनाभिः प्रभाविताः मानवाः सर्वेषु प्राणिषु स्नेहं कुर्वन्ति। यः जनः सम्पूर्णविश्वस्य प्राणिभिः साकं कुटुम्बवदाचरणमाचरति एवं तेषां विकासाय स्वकीयप्राणसमर्पणमपि नैव गणयति, स एव समाजस्य सामान्यस्तरं परित्यज्य महात्मेति संज्ञां लभते। यः महान्तम् आत्मानं धारयति स एव महर्षिभिः सज्जनपुरुषैः 'महात्मा' इति कथ्यते। ते विपत्तिसमये धैर्यं धारयन्ति। महात्मनां प्रकृतिं दर्शयता कथितं केनापि कविना—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

विश्वस्योदारप्राणिनां गणनावसरे स्वनामधन्यमहर्षिदधीचेः नाम स्मृतिपथम् आयाति । परमात्याचारिणः वृत्रासुरस्य वधार्थं सः स्वास्थीन्यपि दत्तवान् । 'सर एन्ड्रूज' महोदयस्य स्मृतिः सर्वप्रथममायाति दृष्टिपथम् । अस्य महापुरुषस्य मनसि विश्वसेवायाः महती भावनासीत् । विभिन्नदेशेषु परिभ्रमणं कृत्वा प्राणिनां सेवायाः महान् प्रयासः कृतः अनेन महाभागेन ।

सौभाग्यवत्याः भारतवसुन्धरायाः स्नेहपात्राणि महात्मगान्धिमहोदयाः तु अहिंसाया विश्वबन्धुत्वस्य च सन्देशमादाय विश्वस्मिन् समागतवन्तः । श्रीगान्धिमहोदयानां मनसि सर्वेषां प्राणिनां कृते समानभावाः आसन् । पददलितानां जनानां विकास एव महद् व्रतमासीत् । न हि ते केवलं स्वकीयदेशे अपि तु अफ्रीकादिविभिन्नदेशेषु गत्वा पीडितानां पददलितानां सामाजिकैः उपेक्षितानां जनानामुत्थानाय महान्तं प्रयासम कुर्वन् । फलतः सेवायाः प्रभावेणैव 'महात्मा' 'राष्ट्रपिता' इत्यादि पदवीं प्राप्तवन्तः । यद्यपि इदानीं महात्मगान्धिमहोदयस्य पार्थिवशरीरं नैव विद्यते पुनरपि तस्य सेवाभावस्योदारचरितस्य प्राणिनः प्रति प्रेमभावस्य भावनाद्यापि अस्माकं चित्तमाकर्षयति । अस्य चराचरविश्वस्य सर्वे प्राणिनः तस्याभावे महतीं क्षतिमनुभवन्ति । मानवानां संकुचितभावनामुन्मूल्य तान् मानवतायाः सर्वोच्चशिखरे स्थापितवान् । अतः इदानीं सः अस्माकं प्रातः स्मरणीयः वन्दनीयश्च वर्तते ।

अस्माकं जनप्रियप्रधानमन्त्रिणा श्रीपण्डितजवाहरलालमहोदयेन पञ्चशीलस्य महान्तं संदेशमादाय विभिन्नेषु भारतेतरदेशेषु प्राणिनां कल्याणाय मानवतायाः संरक्षणाय च भगीरथप्रयत्नः कृतः । अनेन प्रकारेण 'श्री केनेडी' आइजनहावर, क्रुश्चेवप्रभृतयः विश्वस्य ये केचन महान्तः नेतारः आसन् सन्ति च ते सर्वे स्वं स्वं स्वार्थं विस्मृत्य 'वसुधैव कुटुम्बकमि'ति भावनायाः समुपासकाः आसन् सन्ति च । एते निस्वार्थसंलग्नाः महापुरुषाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
व्यक्तेः महत्त्वं जानन्ति स्म। ते कमपि विशिष्टवर्गं नानुसरन्ति स्म अपितु मानवतायाः अर्चनां कुर्वन्ति स्म। परस्य दुःखसंतप्तमानवस्य दुःखं दृष्ट्वा तेषां हृदयं विदीर्णं भवति।

केवलमेव स्वार्थपरायणाः क्षुद्रजनाः समाजेषु राष्ट्रेषु किं वा विश्वस्मिन्नपि ईर्ष्याद्वेषादीनां विकाराणां वृद्धिं विदधाति। अन्ते च निन्दिताः भवन्ति। ते समाजस्य कलंकरूपा जीवन्ति यथोक्तम्—

ते मृत्युलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति॥

यत्र तत्र सर्वत्र विचरन्तोऽपि ते किञ्चिन्मात्रमपि सम्मानं न प्राप्नुवन्ति। साधुजनविगर्हितञ्च तेषां चरितं समाजस्य पतनं करोति। इयम् स्वार्थपूर्णा भावना तेषां जीवने द्वन्द्वमुत्पादयति। परन्तु उदारा सरलेयं भावना सर्वैः आद्रियते। उदारपुरुषाः दुर्निरीक्ष्यमूर्तिसदृशं स्वार्थिजनवत् सामाजिकैः नोपालभ्यन्ते तेषां जीवनं धनं च परहिताय भवति। इत्थं दृष्ट्वा कथितं केनापि कविना—

परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम्॥

उदारभावनाप्राप्तेन पुरुषेण अस्य विश्वस्य कोऽपि प्राणी न तिरस्क्रियते। परेषां दुःखनिवारणमेव तस्य धर्मः, परसाहाय्यमेव तस्योद्देश्यम, स्वार्थक्षुद्रभावनात्यागः अपि तस्य ज्ञानं भवति। अतएव उदारचरितानां तु सम्पूर्णा वसुधैव कुटुम्बवत् भवति।

स्त्रीशिक्षा

विश्वस्मिन् चिराय उपेक्षितायाः स्त्रीजातेरुद्बोधनस्य शिक्षायाः महान् प्रश्नः समुत्पन्नः। अधुना स्त्रीणां शिक्षाविषये क्रान्तिः भवति। सर्वे स्त्रीशिक्षां समर्थयन्ते, किन्तु नायं नूतनो विषयः। भारते तु सुदूरप्राचीनकाले स्त्रियः पर्याप्तमात्रायां सुशिक्षिताः आसन्। सावित्री, गार्गी, अपाला, लोपा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
मुद्रा, अनसूया इत्यादीनां महिलानां योग्यता प्रसिद्धा अस्ति। मध्यकालेऽपि बह्व्यः महिलाः शिक्षिताः आसन्। अस्मिन् युगे विज्जिका-शीलाप्रभृतयः कवयित्र्यः अभूवन्। न केवलं शास्त्रे एव किन्तु शस्त्रे कलायां च स्त्रीणां योगदानं विशिष्टमासीत्। शकुन्तला भरताय शस्त्रशिक्षां दत्त्वा तं वीरं चकार। लक्ष्मीबाई स्वपौरुषेण शत्रून् चकितान् कृतवती। विदुला स्वशिक्षाबलेनैव पुत्रं जागृतं चकार।

इदं तु कथ्यते यत् भारतीयसंस्कृतौ स्त्रीजातेः नैव विशेषतः समादरणीयं स्थानमासीत्। 'न स्त्रीशूद्रौ वेदमधीयाताम्' इति विचार्य कोऽपि स्त्रीणां शिक्षायाः महत्त्वं न मन्यते स्म। किन्त्विदमुचितं न दृश्यते। 'सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते' 'इत्यादिप्रमाणानुरूपेण बालक-बालिकानां च शिक्षणार्थं, गार्हस्थ्यकार्याणां समुचितरूपेण संपादनार्थं च स्त्रीणां शिक्षाया आवश्यकता मन्यते। शिशूनां कृते गृह एव प्रारम्भिकी पाठशाला भवति। यदि तेषां मातरः सुशिक्षिताः स्युः तर्हि शिशवः ताभ्य एव पर्याप्तं ज्ञानं प्राप्य पाठशालायां गच्छेयुः, येन पाठशालीया शिक्षा सुव्यवस्थिता भवेत। शिक्षिताः महिला व्यवहारे उत्तमतां धारयन्ति। अतएव तासां शिशवः अपि वार्तायां व्यवहारे दैनिककार्येषु च दक्षाः भवन्ति। स्त्रीशिक्षा समुन्नतसमाजस्य कृते आवश्यकी अस्ति। शिक्षिताः स्त्रियः गृहकार्ये आय-व्ययव्यवस्थायां पतिपुत्रगुरुजनसम्बन्धिजनानां मध्ये व्यवहारकौशले च निपुणाः भवन्ति। ताभिः गृहे शान्तिः सुव्यवस्था, समृद्धिः सुखं च भवति। यस्य देशस्य मातरः शिक्षिताः भवन्ति, सः देशः समुन्नतः भवति। नैपोलियननामकः सैनिकः अकथयत यदि शिक्षितानां सुयोग्यानां मातॄणां शतं प्राप्तं भवेत तदा अहं स्वदेशं सर्वोत्कृष्टं विधातुं शक्नोमि।

स्त्रीणां महत्तां स्वीकृत्य स्वमनुस्मृत्याम् राजर्षिमनुना कथितं यत 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' अर्थात् यत्र स्त्रियः सुखिन्यः भवन्ति तत्र देवता निवासं कुर्वन्ति। तत्रैश्वर्यसमृद्धेः उन्नतिः भवति। जीवनस्य यावन्तं कालम् मानवः स्वगृहाभ्यन्तरे यापयति न हि तावन्तं बाह्यसंसारे। अतः यदि गृहं सुखशान्तिपूर्णं न भवेत् तदा मानवेन शान्तिः न लभ्येत। मातृसम्पर्केणोत्पन्नाः संस्काराः यावज्जीवनं स्थायिनो भवन्ति। इदमेव तु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्यं यत् स्त्रीणां सुव्यवस्थितयोजनासु शिशूनां प्रौढानां वृद्धानां सर्वेषां सुखमयानि जीवनानि समाश्रितानि सन्ति। भारतवर्षस्य गार्हस्थ्यजीवनेऽन्ततः स्त्री वैशिष्ट्यम् अवतिष्ठते। अतएव गृहं गृहं नास्ति अपितु गृहिणी गृहमस्ति। इदं तु कथ्यते 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते'।

भारतवर्षे पुरा विशेषतः स्त्रीशिक्षा आसीत्। इदानीं पुनः मध्यकाले या स्त्रीशिक्षा उपेक्षितासीत् सा पुनः स्वीक्रियते इति सुलक्षणं देशस्य। किन्तु शिक्षायाः व्यवस्थया सुचारूरूपयापेक्षितरीत्या च भवितव्यम्।

स्त्रीणां शिक्षा कीदृशी भवेदित्यस्मिन् विषयेऽपि विदुषां वैमत्यं संलक्ष्यते। केचन विचारकाः कथयन्ति यत् स्त्रीणां पुरुषाणां च शक्तयः समाना अतएव तेषामधिकारा अपि समाना एव। जीवनस्य प्रत्येकक्षेत्रे समुचितलाभार्थं यत्नं कुर्वताम् पुरुषाणामिव स्त्रीणामपि शिक्षाव्यवस्था करणीया। प्रकृत्यैव पुरुषाणां स्त्रीणां च भिन्नता स्वीक्रियते। अतएव स्त्रीणां गृहसम्बन्धिनीनां प्रवृत्तीनां शक्तीनां च विकास एव तासां शिक्षायाः प्रधानं लक्ष्यं भवेदिति मन्यन्तेऽपरे शिक्षाविशारदाः।

किशोरावस्थायाः पश्चात् महाविद्यालयेषु सहशिक्षा न युक्ता भवति। बालकानां बालिकानां च पृथक् पृथक् शिक्षा-व्यवस्था कर्त्तव्या। अथ च बालिकानां कृते विज्ञानं, विधानं, भैषज्यं, यन्त्रशास्त्रं न तथा आवश्यकमस्ति यथा साहित्यं, गृहशास्त्रं, शिल्पं, धर्मशास्त्रं च। विज्ञानादीनां सामान्यज्ञानमेव पर्याप्तमस्ति। तासां कृते उच्चशिक्षा अनावश्यकी। एवमेव शास्त्रशिक्षा तासां कृते नास्ति सर्वथा युक्ता।

स्त्रीणां कार्यक्षेत्रं गृहे परिवारे एव पर्याप्तं विस्तृतमस्ति। अत्रैव ताभिः सुव्यवस्था कार्या। कार्यालयेषु सेनायामन्यसामाजिकस्थलेषु तासां नियोजनेन पुरुषाणां कृते क्षेत्राभावः भवति। गार्हस्थ्यव्यवस्था विशृंखला भवति। यावन्मात्रं च महिलाः धनमर्जयन्ति तावन्मात्रं पुनः गृहव्यवस्थायामपि भृत्यादिषु व्ययीभवति। मनोवैज्ञानिकदृष्ट्या स्त्रीणां सेवा मातृरूपेण भगिनीरूपेण पत्नीरूपेण च कल्याणकरी भवति। न तु भृत्यारूपेण शासिकारूपेण च। शिक्षिकारूपेणापि सा सम्यक् सुव्यवस्थां लाभं च दातुं शक्नोति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शिक्षाद्वारैव स्त्रियः संगीतादिललितकलानां ज्ञानं प्राप्य पारिवारिकजीवने मधुरतायाः सरसतायाः संचारं कर्तुं शक्नुवन्ति। मनोविनोदस्य च पर्याप्तसामग्रीणाम् एकत्रीकरणे सफलाः भवन्ति। शिक्षादेव्याः प्रभावेणैवास्मिन् समये स्त्रीणामाभूषणं प्रियता, भीरुता, अन्धविश्वासता प्रायः लुप्तैव दृश्यते। ताः स्वकार्येषु संलग्नाः राष्ट्रकल्याणञ्च कुर्वन्ति। अधुनानार्यः पुरुषैः सार्धं एकत्रीभूय कार्यं कुर्वन्ति। राष्ट्रस्योच्चपदस्योपरि स्त्रियः प्रतिष्ठापिताः। ताः तदुच्चपदं गृहीत्वा समुचितरूपेण राष्ट्रस्योन्नतिम् कुर्वन्ति। अनेकाः सुशिक्षिताः स्त्रियः शिक्षिकारूपेण बालिकानामध्यापनं कुर्वत्यः जनतायाम् शिक्षाप्रदानेन ज्ञानस्य प्रकाशं प्रसारयन्ति। अतएव स्त्रीशिक्षा देशकल्याणार्थमतीवावश्यकी अस्ति।

ब्रह्मचर्यमहिमा

ब्रह्मचर्यस्य किमर्थम्? ब्रह्मणः चरणम्—आचरणम् इति ब्रह्मचर्यम्। ब्रह्म वेदः वेदानुकूलमाचरणम् वेदाध्ययनं वा ब्रह्मचर्यम्। अथवा ब्रह्मवेदः तं चरति आचरति पठति वा स ब्रह्मचारी तस्य भावो ब्रह्मचर्यमुच्यते। किन्तु अत्र ब्रह्मचर्येण सामान्यतः इन्द्रियसंयमस्य तात्पर्यं भवति। प्राधान्येन वीर्यरक्षा एव ब्रह्मचर्यम्। "ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।" वीर्यं किम्? वीर्यं बलमिति सामान्यार्थः। किन्तु वीर्यम् रेतः शारीरिकधातुविशेषः, इति विशिष्टोऽर्थः अत्र गृह्यते। वीर्यनिर्माणं यथा भवति तथा च उक्तम्—

"रसाद् रक्तं ततो मांसं, मांसाद् मेदः प्रजायते।
मेदसोऽस्थि ततो मज्जा, मज्ज्ञः शुक्रस्य संभवः॥"

यत् खाद्यते पीयते च, तत् प्रथमं रसरूपं भवति। रसस्य पाचनेन रक्तं, रक्तान्मांसं, मांसान्मेदः (चर्बी), मेदसः अस्थि, अस्थ्नो मज्जा, ततश्च शुक्रं वीर्यं भवति। इत्थं भोजनस्याष्टमं तत्त्वं वीर्यं भवति। प्रायः चत्वारिंशद्दिवसैः भोज्यपदार्थेन वीर्यं भवति। वीर्यं यदि न नश्येत् तदा तेन ओजः भवेत्। ओजः शक्तेः नाम। इत्थं सिद्धं यत् वीर्यरक्षणेनैव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

शक्तिः प्राप्यते नान्यथा। तस्य वीर्यस्य रक्षणार्थं ब्रह्मचर्यस्यावश्यकता भवति। ब्रह्मचर्यनाम्ना विशिष्टं नियमितजीवनं बोध्यते। यथा—

"दर्शनं स्पर्शनं चैव प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यं .... ॥"

उक्तमष्टप्रकारकं मैथुनं वर्तते। तस्य त्याग एव ब्रह्मचर्यम्। वासना-बुद्ध्या कस्याश्चित् नायिकायाः अन्यस्य वा दर्शनं, तस्य शरीरस्पर्शः, गुप्तरूपेणाग्रहपूर्वकं निरीक्षणं, गोपनीया अश्लीलवार्ता, तस्या विषये ध्यानम्, उपायः वासनाजन्यपरस्परकार्यम्, वासनातृप्तिश्च इति सर्वाणि कार्याणि मैथुनानि सन्ति। एतेषां व्यवहारेण वीर्यहानिः भवति। तया च शक्तिनाशः पतनं च भवति। आश्रमव्यवस्थायां ब्रह्मचर्याश्रमे वीर्यरक्षा विशेषेण विहिता अस्ति। तया जीवनस्य पूर्वभागेऽपारशक्तिसंचयः भवति येन जीवने सर्वदा सफलता प्राप्यते जनैः। अब्रह्मचर्यता एव असफलतायाः कारणम्। अस्मात् कारणात् अस्माकं तपोनिष्ठमहर्षिभिः मानवजीवनं चतुर्षु भागेषु विभक्तम्। ते ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासादयः सन्ति। स्वयज्ञोपवीत-संस्कारानन्तरं बटुः गुरोः समीपे विद्याध्ययनाय गच्छति। अस्मिन् काले चतुराश्रमपरायणः ब्रह्मचारी संसारस्य सर्वाणि क्रियाकलापानि विहाय स्वविद्याध्ययने रतो भूत्वा ब्रह्मचर्यस्य पालनं करोति। अस्मिन्नाश्रमे सः गुरुसेवातत्परः ब्रह्मचारी सांसारिकप्रलोभनेभ्यः दूरीभूय स्वधर्मस्य पालनं करोति स्म। समाप्ते च ब्रह्मचर्याश्रमे सः गुरोः आज्ञया स्वगृहं गत्वा गृहस्थाश्रमे प्रविशति स्म। अतएव धर्मस्य नैपुण्यं प्राप्य सः स्वकर्त्त-व्यपयोधितरणाय प्रस्तुतो भवति। अस्मिन् समये सर्वैरपि विद्यार्थिभिः स्ववीर्यस्य रक्षा, वेदानां स्वाध्यायः, गुरोः सेवा, धर्मपालनमवश्यमेव विधेयम्।

ब्रह्मचर्यस्य महिमा तारस्वरेणोद्घोषितः अस्माकं महर्षिभिः। ब्रह्मचर्यपूर्णः जनः संसारेऽस्मिन् प्रत्येकं महत्त्वपूर्णं कार्यं कर्तुं समर्थः भवति। ब्रह्मचर्यविरहितः मानवः स्ववीर्यस्यापि रक्षां कर्तुं न प्रभवति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रजस्येकस्यापि बिन्दोः पतनं तेऽनुचितमामनन्ति। कथितमपि अस्माकं महर्षिभिः—

"मरणं बिन्दुपातेन, जीवनं बिन्दुधारणात्"

जीवनपर्यन्तमपि ब्रह्मचर्यस्य पालनं भवति। हनूमान्, भीष्मः, परशुरामः इत्यादयः आजीवनं ब्रह्मचारिणः आसन्। अतएव ते महावीराः आसन्। ब्रह्मचर्येण सर्वं साध्यते। जीवनस्य चतुर्थभागेऽपि यदि ब्रह्मचर्यस्य पूर्णतः पालनं क्रियते तदा जीवनं सफलं स्यात्। यदि कोप्यस्य पालनमुचितरूपेण करोति तदा सः मृत्युमपि जेतुं समर्थः भवति। अजरा अमराः देवाः ब्रह्मचर्यस्य पालनेनैव मृत्योः उपरि विजयमप्राप्नुवन्। सत्यमेवोक्तम् श्रुत्या—

"ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत"

ब्रह्मचर्यस्य बलेनैव देवाः अमराः अभूवन्। ते कदापि जर्जरितायाः वृद्धावस्थायाः अनुभवं न कुर्वन्ति। ब्रह्मचर्यस्य प्रभावेणानेकैः महर्षिभिः अलौकिकातिक्षमं कार्यं कृतम्। पुरा पञ्चविंशतिवर्षपर्यन्तं सर्वे ब्रह्मचारिणः भवन्ति स्म। ते ब्रह्मचर्योपरि अधिकं महत्त्वं ददति स्म। ब्रह्मचारिणाम् जीवनस्य नियमाः अतीवकठिनाः आसन्। राजर्षिमनुः ब्रह्मचारिणः जीवनस्य विषये कथयति—

वर्जयेन्मधु मांसं च गन्धं माल्यं रसान् स्त्रियः।
सूक्तानि यानि सर्वाणि, प्राणिनां चैव हिंसनम्॥
अभ्यङ्गमंजनं चाक्ष्णोरुपानच्छत्रधारणम्।
कामं क्रोधं च लोभं च नर्तनं गीतवादनम्॥
द्यूतं च जनवादं च परिवादं तथानृतम्।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च॥

अस्माकं पूर्वजाः स्वकर्माणि कर्त्तुं समर्थाः आसन्। ते विद्यार्थिनः अस्मिन् कठोरनियमपूर्णं मार्गं प्रति प्रेरयन्ति स्म। किन्तु वर्तमानसमये ब्रह्मचर्यस्य महती दुर्दशा सर्वत्र दृश्यते। कोऽपि विद्यार्थी ब्रह्मचर्यं प्रति ध्यानं न ददाति। सर्वे स्वाध्यायात्पराङ्मुखो भूत्वा उच्छृंखलाः अभवन्। स्वाध्यायचर्चा तेषां समीपात् दूरं गताः। तेऽनवरतं सर्वाणि सांसारिक-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वस्तूनि भुक्त्वा ब्रह्मचर्यस्य पालनं न कुर्वन्ति अतएव इयमपि विषमा समस्या अस्माकं समक्षेऽद्य प्रस्तुता। ब्रह्मचर्यस्य रक्षायाः जटिलः प्रश्नः विद्यते सर्वेषु मनःसु। येन केन प्रकारेणाद्य छात्राणामियम् दुर्दशा साधयितव्या। यदि ब्रह्मचर्यस्य पालनं प्रति प्रयत्नाः न कृताः तर्हि छात्राणां पतनमवश्यमेव भविष्यति। यतो हि ब्रह्मचर्यपालनमेव सर्वेषां मूलाधारः।

ब्रह्मचर्येण बलं, बुद्धिः, तेजः वर्धते। आत्मविश्वासः, निर्भीकता, साहसं, स्फूर्तिः, अनालस्यं, कार्यक्षमता, सहनशीलता, प्रसन्नता चेति प्राप्नोति। ब्रह्मचर्यपालनात् शरीरेऽधिका शक्तिः आयाति। येन कारणेन मानवः असाध्यमपि कार्यं कर्तुं समर्थः भवति। ब्रह्मचर्यशून्याः जनाः संसारे भारभूताः सन्ति। ब्रह्मचारी कदापि अस्वस्थो न भवति। न स कदापि परिश्रमेण श्रान्तो भवति। सर्वेषां साधनानां साधनं ब्रह्मचर्यम्। ब्रह्मतेजः महन् बलं भवति। 'धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम्।' इति नीत्यनुसारेण सर्वे ब्रह्मबलस्य महत्त्वमामनन्ति। तस्य समक्षे सर्वाः शक्तयः क्षीयन्ते। ब्रह्मचारिणः सम्मुखे सर्वे नताः भवन्ति। सः सर्वत्र विजयं प्राप्नोति। मृत्युमपि सः जयति। असम्भवं कार्यमपि सः सम्भवं करोति। सत्यं ब्रह्मचर्यमहिमा अलौकिकः अस्ति। विद्यार्थिनां कृते तु ब्रह्मचर्यमतीवावश्यकम्।

व्यायामः

व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम्।
प्रवर्द्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत्॥

मनुष्याणां कृते स्वास्थ्यं सर्वसाधकमस्ति। सर्वसम्मतोऽयं सिद्धान्तः यदस्माकं शरीरं परिश्रमेण प्रतिपलं क्षीयते। अतः तत्पूर्तिरपि परमावश्यकी। यदि पूर्तिः सदैव अबाधगत्या भविष्यति तर्हि शरीरमपि दोषरहितं भविष्यति। अतः यथा दोषरहितं यन्त्रं सुखेन कार्यं करोति, अधिकमुत्पादनं च करोति, अधिकं लाभं च प्रयच्छति। तथैव दोषरहितं शरीरमपि सुखेन कार्यं करोति। दोषहीनता एव स्वास्थ्यलक्षणम्। युक्तं पीतं सर्वं च वस्तु उचितरूपेण समयानुसारं पचेत्, शरीरे काचित् बाधा न स्यात् तदेव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

स्वास्थ्यम्। स्वस्थे शरीरे एव स्वस्थं मस्तिष्कम्, उन्नता विचाराः च भवन्ति। यदि शरीरं स्वस्थं स्यात् तर्हि शारीरिकं मानसिकं वा सर्वं कार्यं सारल्येन साध्यते। धर्मार्थकाममोक्षाणि चेति पुरुषार्थचतुष्टयं स्वस्थशरीरेणैव साध्यते। केचिद्वदन्ति शरीरेण किं बुद्धया एव सर्वं कार्यं सिद्ध्यति। किन्तु एतद्वचनं न युक्तम्। यदि शरीरस्य कस्मिंश्चित् भागे तीव्रा वेदना स्यात् तदा किं मनः प्रसन्नं भवति। जातायां वेदनायां मानवः किमपि कार्यं कर्तुं न उत्सहते। अस्तु मनःस्वास्थ्यमपि स्वस्थशरीराधारेण तिष्ठति। अतएव उक्तम्—

"शरीरमाद्यं खलु धर्मसाधनम्।" इति।

स्वास्थ्यं हि व्यायामेन प्राप्यते। केवलेन पौष्टिकभोजनेन स्वास्थ्यलाभो न भवति। व्यायामेन पाचनशक्तिः वर्धते। तेन सर्वं खाद्यं रक्तमांसादिरूपेण यथावत् परिवर्तते। यदि पाचनशक्तिः तीव्रा न स्यात् तर्हि पुष्टिकारकं कृतं भोजनमपि उदरे विकारमुत्पाद्य स्वास्थ्यं च नाशयति। अतः व्यायामः आवश्यकः। स्वच्छजलवायुसेवनं, शरीरे वस्त्रे च स्वच्छता, नियमपूर्वकं भोजन-पान-शयन-जागरण-व्यायामकर्तव्यादीनां व्यवस्था स्वास्थ्यं वर्द्धयति। नियमतः एव क्रियमाणो व्यायामः फलप्रदो भवति। व्यायामेन शरीरे स्फूर्तिः आयाति। मनः प्रसन्नं भवति। शरीरशत्रुः आलस्यमपि शरीरं परित्यज्य अन्यत्र पलायते। अल्पप्रयासेनैव सर्वस्मिन् कार्ये साफल्यं प्राप्यते। परिश्रमात् कष्टमपि न भवति। बुद्धिः विकासशीला शरीरं च सुन्दरं भवति। शरीरस्य कान्तिः देदीप्यमाना भवति। तथा व्यायामेन देहस्य सर्वावयवेषु कर्मण्यता, तेजस्विता, सहिष्णुता च आयाति। शरीरस्य सर्वेषु भागेषु सम्यक्तया रक्तसंचारो भवति, बलं च वर्धते, रोगाश्च नश्यन्ति। इत्थं व्यायामेन अनेके लाभाः भवन्ति।

अस्मिन् संसारे यावन्तः सुप्रसिद्धाः महापुरुषाः जाताः ते सर्वे व्यायामप्रियाः आसन्। व्यायामबलेनैव इन्द्र-भीम-भीष्म-द्रोण-हनुमत्-पृथ्वीराज-महाराणाप्रताप-शिवाजीप्रभृतयः तथा अन्येऽपि देशीया विदेशीयाश्च सर्वे वीराः जीवने सफलतां प्राप्य कीर्त्तिं प्रसारितवन्तः। अधुनाऽपि श्रूयते यत् पण्डित-जवाहरलालनेहरूश्च अपि प्रतिदिनं व्यायामं कुर्वन्तिस्म। व्यायामबलेन

रोगग्रस्तः सन्नपि सः स्वकार्यं कदापि न जहौ। व्यायामेन शिशुरपि शीघ्रं विकसति। मनुष्याणामपेक्षया पशवः पक्षिणश्च अधिकं निरन्तरं व्यायामं कुर्वन्ति। अतएव ते स्वस्थाः नीरोगिणश्च भवन्ति। व्यायामः प्राणिनां कृते सञ्जीवनी विद्या अमृतं चास्ति।

केवलपरिश्रम एव नास्ति व्यायामः। अन्यथा कृषकाणां कृषिकर्म निरन्तरं भवति। भृत्याः निरन्तरं कार्यं कुर्वन्ति। अतः तेषां आर्थिकलाभाय कृतानि प्रयतनानि व्यायामक्षेत्रे नायान्ति। अतः ज्ञातव्यः कः व्यायामः? प्रसन्नेन मनसा निश्चितसमयानुसारेण निश्चितयोजनानुकूलं स्वच्छस्वस्थवातावरणे शक्त्यनुसारं कृतः शारीरिकः परिश्रमः व्यायामः। व्यायामस्य अनेके प्रकाराः सन्ति। देशभेदेनापि व्यायामभेदाः भवन्ति। भ्रमणधावनक्रीडनादिकः शारीरो व्यायामः तथा मननकल्पनादिकः मानसो व्यायामः कथ्यते। येषु भेदेषु केनापि सर्वाङ्गीणः श्रमो जायते। केनचित् अवयवविशेष एव पुष्टो भवति। येषु मानवः स्वरुचिं आवश्यकतां च विचार्य एकतममाश्रयेत्। व्यायामः कश्चिदपि भवेत् तेन श्रमः भवेत्। ये अधिकं व्यायामं कर्तुं न पारयन्ति ते केवलं भ्रमणमेव कुर्वन्ति। भ्रमणमेव सर्वोत्कृष्टो व्यायामः। इत्थं स्वास्थ्याभिलाषी उन्नतिशीलः आरोग्यकांक्षी व्यक्तिः व्यायाममवश्यं कुर्यात्। छात्राणां कृते तु व्यायामः परमावश्यकः।

सदाचारः

सतां सत्पुरुषाणामाचारः सदाचारः कथ्यते। कर्तव्यपालनमपि सदाचारः उच्यते। यः आचारः उत्तमः भवति, येन मनुष्याणां जीवनं सफलं भवति, स एव सदाचारधर्मः। वेदाः स्मृतयश्च उपदेशं ददति 'आचारः परमो धर्मः, 'आचाराल्लभते आयुः।' इति। ये पुरुषाः सदाचारिणः भवन्ति तेषामेव सर्वे जनाः आदरं कुर्वन्ति। अस्मिन् लोके सदाचार एव मनुष्याणां प्रधानं वस्तु। सदाचारी एव उन्नतिपथमधिरोहति। धनं, सौख्यं, सर्वं नश्यति परन्तु सदाचारबलेनैव मानवस्य कीर्तिः अक्षुण्णा भवति। तथा परलोकसिद्धिमपि स एव प्राप्नोति। मोक्षरूपः पुरुषार्थः सदाचारेणैव प्राप्येत न तु अन्येन साधनेन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्यपि अस्मिन् युगे धनमेव प्रधानं सर्वत्र दृश्यते। यः मनुष्यः धनवान् स एव सदाचारी ज्ञानी पण्डितश्चास्ति। आहारनिद्रादयो भावाः पशौ मानवे च समानाः भवन्ति। सदाचारः अर्थात् धर्म एव मानवं पशोः विशिनष्टि। अतएव सदाचारशालिभिः आचार्यैः कथ्यते—

'आहारनिद्राभयमैथुनं च समानमेतत्पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समाना ॥' इति।

दुराचारस्य परिणामः दुःखद एव भवति, विलासिनां दुराचारिणां सम्पत्तिबलप्रमत्तानां रावणादिसदृशानां दुष्टानामपेक्षया वनवासिनां कण्टकचारिणां न्यायपथगामिनां रामादीनां एव चरित्रं जनाः गायन्ति। अतएव 'रामादिवत् वर्तितव्यम्, न रावणादिवत्' इति शास्त्राणामुद्घोषः।

सदाचारी जनः निर्धनोऽपि कुबेर इव आश्वस्तः भवति। तस्य क्वचिद्भयमपि न जायते। दुराचारी जनः ऐश्वर्यवान् सन्नपि सर्वत्र बिभेति। सद्वृत्तेनैव अनेके साधवः धर्मप्रवर्तकाः अनेकानि कष्टानि असहन्त प्राणानपि जहुः परञ्च सत्यमार्गात् न विचेलुः। अतएवोक्तं—

'अक्षीणोऽपि ततः क्षीणः वृत्ततस्तु हतो हतः।
वृत्तं यत्नेन संरक्षेद् वित्तमायाति याति च ॥' इति।

मानवस्य जीवनं प्राणिनां मध्ये सर्वोत्तमः अस्ति, यत्र समस्तमपि कल्याणमभ्युदयं निःश्रेयसं वा साधयितुं शक्यते। मनुष्यः कर्मणि स्वतन्त्रः। अतः प्रमादेन विलासेन च तेन स्वजीवनं न विनाशितव्यम्। शरीरं च अस्थिमांसविरचितं, तत्तु जलबुद्बुद इव सद्यः नश्यति। यशःशरीरं शुद्धबुद्धसूक्ष्मदेहम् एव अविनाशि भवति। अतः धनसम्पत्तिभोगसाधनानि प्राप्यापि जीवनयात्रायां सावधानमनसा मनुष्येण सदाचारपूर्वकमाचरितव्यम्। अस्य क्षणभङ्गुरस्य शरीरस्यापि कृते मूढाः पापानि कुर्वते तन्न युक्तम्।

महाराज दिलीपः इन्द्र इव ऐश्वर्यवानासीत्। अतएव प्राणत्यागावसरे सिंहेनोक्तम्—

'महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः।' अर्थात् यथा तत्र राज्यं समृद्धं तथैव इन्द्रस्यापि। इदं सर्वं श्रुत्वापि दिलीपः कथयति—'यशःशरीरे भव मे दयालुः।' यदि मे यशः नश्यति तदा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

जीवनेन किम् । क्षत्रियाणां यशः एव सर्वस्वं भवति । सः एव सदाचारी यः स्वकर्तव्यानि सदैव पालयति । विचाररहितः जनः कदापि सदाचारी न भवति । मनुष्यः सदाचरणेनैव जनस्य परिवारस्य समाजस्य देशस्य विश्वस्य च उन्नतिं कर्तुं शक्नोति ! सदाचरणेन तस्य बुद्धिः वर्धते, शरीरं च पुष्टं भवति । अतएव मनुष्येण सदैव यशःशरीरस्य सदाचारस्य रक्षा कर्तव्या । इदमेव परमं तपः । अयमेव परमो धर्मः । अयमेव परमः पुरुषार्थः । सदाचारिणः एव सर्वत्र आदरं लभन्ते । अतः अस्माभिः सदाचारिभिः भवितव्यम् ।

गोरक्षा

भारतवर्षे गोः सम्मानं अनादिकालादेव प्रचलितम् । वेदेषु स्मृतिषु पुराणेषु गोपूजासम्बन्धे अनेके उल्लेखाः अनेकानि उपाख्यानानि च प्रसिद्धानि । पुराणैः प्रतिपादितेषु सर्वेषु कर्मसु पञ्चगव्यं विना शुद्धिर्न भवति । सर्वत्र अन्येषां दानानामपेक्षया गोदानस्य महान्महिमा अस्ति । राजानः दानप्रसङ्गे गवां शतं सहस्रमयुतं च ददति स्म । जनकः, नृगश्च गोदाने प्रसिद्धौ आस्ताम् । वैदिककाले गोरूपमेव धनं महदासीत । द्वापरयुगे गोपालनमेव मुख्यव्यवसायः आसीत्, गवां शतं सहस्रमयुतं इति संख्यानुसारेण गोपालकानां नन्दः, उपनन्दः, महानन्दः, इति नामानि आसन् । गोपालने महत्पुण्यं वर्तते । अतएव भगवान् श्रीकृष्णः गोपालः कथ्यते । सः कथयति—

'गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम् ॥'

गोजातिः मातृवत् पूज्या अतएव 'गोमाता' कथ्यते । धर्मशास्त्रे भारतीय-संस्कृतौ च गोपूजनस्य विधानमस्ति । सर्वेषु शुभकार्येषु गोः पूजा भवति । ऐहलौकिकश्रेयःसाधनीभूतस्य धर्मस्य गावः सर्वप्रधानमङ्गम् । गवामेव दुग्धदधिघृतादिभिः मानवशरीराणि परिपुष्टानि भवन्ति । आयुर्वेदशास्त्रेषु गोदुग्धस्यैव महत्ता वरीवर्तते । सर्वरोगेषु तस्य एव उपयोगः क्रियते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किमधिकं गोमयेन गोमूत्रेणापि च वैद्यानां बहूनि औषधानि सम्पद्यन्ते। गोमूत्रेणैव वैद्यानां सञ्जीवनी निष्पद्यते। यया हि भारतीयाः सञ्जीवन्ति। अतएव धर्मसंसारे प्रसिद्धमेतत्—

गोमूत्रे विद्यते गङ्गा, ये गुणाः गङ्गाजले सन्ति ते एव गुणाः गोमूत्रेऽपि सन्ति। एवं गोमये लक्ष्मीनिवासः इत्यपि प्रसिद्धम्। यथा महाभारते लक्ष्मीं प्रति गवां वाक्यं प्रसिद्धम्।

अवश्यं मानना कार्या तवास्माभिर्यशस्विनि।
शकृन्मूत्रे वस त्वं भोः पुण्यमेतद्धि नः शुभे॥

अदृष्टरूपेण तत्र लक्ष्मीरपि वसति तत्तु सत्यमेव। यथा—गोमयेन लिप्तानि गृहाणि अतीव शोभनानि दृश्यन्ते। तस्य कीटाणवः चापि नश्यन्ति। भारतदेशः कृषि-प्रधानः अस्ति। कृषिकर्मणि वृषभाणामुपयोगः भवति, गोभ्यः प्रसूताः वृषभाः कृषकाणां क्षेत्रेषु कृषिकार्यं सम्पादयन्ति येन हि सर्वस्यापि भारतवर्षस्य जीवनरक्षा भवति। अत्र 'गो' इति शब्देन गोविशिष्टा जातिः गृह्यते। यद्यपि महिषी–अजा–इत्यादीनां संततिः गोशब्देन न बोध्यते तथापि गोपालकस्य श्रीकृष्णस्य गोचारणप्रसङ्गे 'अजा गावो महिष्यश्च' इति भागवते कथितम्। तथापि गवां विशेषताधिकासीत्। कृषिकर्मणि गोपुत्राणां वृषभाणामेव अधिक उपयोगः भवति अन्येषां न।

गोदुग्धं पानातिरिक्तं पवित्रतया पूजायां गृह्यते। गोघृतेनैव च सर्वाणि मङ्गलमयानि कर्माणि सम्पाद्यन्ते। पञ्चामृते गोदुग्धमेव विहितं न त्वन्यत्। गोदुग्धे स्फूर्तिः सत्त्वगुणः चास्ति। भौतिकधार्मिकसामाजिकदृष्ट्या सर्वथा गवां प्राथमिकता सिद्धा। अतएव गोरक्षायाः समस्या भारते विचारणीया। आधुनिके वैज्ञानिकयुगे कृषिसमस्या यन्त्रेण, दुग्धसमस्या अन्येषां पशूनां दुग्धेन कृत्रिमदुग्धेन वा समाधीयते। अतः आधुनिकाः भौतिकवादिनः गोरक्षां प्रति उदासीनाः वर्तन्ते। गवां प्रयोगं अधुना मांसाहारिणः कर्तुमिच्छन्ति कुर्वन्ति च। गवां चर्म उपानहां कृते प्रयुज्यते। वैज्ञानिकरीत्या जीवितानां गवां चर्माणि तनोः पृथक् क्रियन्ते चर्ममयानि वस्तूनि निर्मीयन्ते। इयमतीव बीभत्सरूपिणी अमानवीया च पद्धतिः अस्ति, गवां संख्या भारते एव सर्वाधिका वर्तते। अतः गोमांसभक्षकाणां, गोचर्मप्रयोगकारकाणां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च दशेषु मांसचर्मणोः राशिः भारतदेशात्प्रेष्यते । तेन धनप्राप्तिर्भवति । अतएव गोरक्षा न भवति ।

किन्तु अहिंसाप्रधानदेशे गोसम्बिन्धिनी एषा उपेक्षा महती विडम्बना अस्ति । अद्यापि कृषिकार्ये अधिकांशतः वृषभाणामेव प्रयोगः भवति । गोदुग्धं पीयते, गोमयमिन्धनरूपेण प्रयुज्यते । अतः गोरक्षा कर्तव्यैव । गोरक्षा न केवलया गोप्राणरक्षया भवति अपितु गवां सम्यक् सेवया भोजनदानेन उपयुक्तवासव्यवस्थया गोचरभूमिरक्षया च सम्भविष्यति । अतएव गवां संरक्षणं परिवर्धनं च प्रत्येकभारतीयानां सर्वथा कर्तव्यम् ।

छात्रजीवनम्

वस्तुतः छात्रजीवनमतीव सुखकरं भवति, अस्मिन्नेव जीवने आगामिसुखस्य आधारभूमिः स्थिता । इदं जीवनं दर्पणवत् निर्मलं निश्छलं च भवति यथा शिशुः सर्वप्रकारेण प्रसन्नः चिन्तानिर्मुक्तः स्वात्मनिलीनः परमानन्दयुक्तः भवति तथैव छात्रोऽपि विद्याध्ययनतत्परः स्वतन्त्रः जीविकाजालनिर्मुक्तः स्वस्थश्च भवति । छात्राणां जीवनं भ्रमणं, शयनं, चर्चा, वार्ता, क्रीडा, सर्वा विनोदयुक्ता सुखकरी च भवति । तेषां चिन्ता शास्त्रे एव भवति न त्वन्येषु कार्येषु । तेषां कलहः वादविवादे एव भवति नान्यत्र । तेषां रागः विद्यायामेव भवति नान्यत्र विलासपूर्णेषु कार्येषु । शास्त्रसुधापानेन तृप्तान् छात्रान् न काचिदन्या चिन्ता बाधते । ते सदैव श्रवणं, मननं, निदिध्यासनं च कुर्वन्ति ।

छात्राणां जीवने कतिचिदावश्यकतत्त्वानि सन्ति । यदि तानि सर्वाणि तेषु सन्ति तर्हि सा छात्रावस्था परमोत्कृष्टा जायेत । अथ च भाविजीवनस्य मूलभित्तिरूपेण तच्छात्रजीवनं महदुत्तममस्ति । प्रायः विचारशीलैः मर्मज्ञैः विद्वद्भिः इदं कथ्यते यत् छात्रेषु इमानि तत्त्वानि आवश्यकानि । यथा—

'काकचेष्टा वकध्यानं श्वाननिद्रा तथैव च ।
अल्पाहारी गृहत्यागी विद्यार्थिपञ्चलक्षणम् ॥'

यदि एषां लक्षणानामनुसरणं स्वजीवने छात्रः कुर्यात् तर्हि तस्य छात्रजीवनं सफलं अन्यथा अनुपयुक्तं स्यात् । सः कदापि सफलतां नाधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
गच्छति। यतो हि छात्राणां जीवनं संयमस्य जीवनमस्ति। छात्राः तपस्विनः भवन्ति। ते यावद्विद्याध्ययनं कुर्वन्ति तावत् तपः कुर्वन्ति। अतएवोक्तम्—'छात्राणामध्ययनं तपः' इति। संयमेन विना विश्वामित्रस्य इव तस्य तपोभङ्गः भवति। विषयवासनारूपिणी मेनका असंयमिनां छात्राणां सत्वरं पतनं करोति। भोजने, शयने, श्रवणे, दर्शने, सर्वत्र संयमः कार्यः। सुस्वादु राजसं तीक्ष्णं तामसं च भोजनं तपोबाधकं भवति। ब्रह्मचर्यमिन्द्रियनिग्रहः परमावश्यकम्। असमये शयनं भोजनं विद्यार्थिनां कृते विनाशकरं भवति। यत्र तत्र स्वतन्त्ररूपेण अवांछितदृश्यानां अश्लीलनाटकादीनां च दर्शनं तेषां कृते न युक्तम्।

सरलं सौजन्ययुक्तं जीवनं, मृदुव्यवहारः छात्राणां शोभावहः अस्ति। इदं वर्तनं लाभदायकं भवति। सरलेन सौजन्ययुक्तेन व्यवहारेण गुरवः पितरः अन्ये वन्दनीयाः जनाश्च प्रसन्ना भूत्वा सद्विद्यां प्रयच्छन्ति। यया छात्रा उन्नतिशिखरमारोहन्ति। इमान् छात्रानेव संबोध्य केनचिदुक्तम्—

'अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्॥' इति।

आलस्यमपि विद्यार्थिभिः कदापि न करणीयम्। उक्तं च 'आलस्यं च मनुष्याणां शरीरस्थो महान् रिपुः, छात्राणां कृते तु सुखस्य कल्पनाऽपि हानियुक्ता। विद्या महता तपसा साध्यते। अतएव—

'सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत् सुखम्।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्॥' इति सत्यम्।

गुरुभक्तिः, श्रद्धा, अनुशासनं च छात्रेषु परमावश्यकम्। अभक्ताय श्रद्धारहिताय अनुशासनविहीनाय शिष्याय कदापि विद्या न दातव्या। छात्राणां श्रद्धया व्यवहारेण च प्रसन्ना भूत्वा गुरवः तेभ्यः अन्ते आशिषो ददति—'सर्वे वेदाश्च ते प्रतिभासन्ताम्।' इति। एतादृशा गुरुभक्ता एव छात्राः 'गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः' इति मत्वा स्वजीवनं यापयन्ति ते एव गुरोः आशिषा महत्कार्यं कुर्वन्ति। महाराजः छत्रपतिः शिववीरः गुरुसमर्थरामदासस्याशिषमवलम्ब्य स्वराष्ट्रनिर्माणं कृतवान्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुणग्राहितापि छात्रेषु आवश्यकरूपेण भवेत्। यत्र कुत्रापि ते गुणान् पश्यन्तु तान् ततः ग्रहीतुं यत्नं कुर्वन्तु। यथा मधुमक्षिकका: प्रतिपुष्पेभ्यः बिन्दुं बिन्दुं कृत्वा पुष्परसं संचिन्वन्ति तथैव छात्राः अपि विद्यां संचिनियुः। उक्तमपि—'क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्।' इति। अन्येऽपि गर्वराहित्यं मितव्ययिता पवित्रता तत्परता इत्यादयः छात्राणां गुणाः सन्ति। ऐतिहासिकं सत्यमिदं यत् उक्तगुणविशिष्टाः छात्राः सर्वदा समुन्नतिं प्राप्य विद्वांसः देशोद्धारकाश्च जाताः। वस्तुतः छात्राणां जीवनं यदि शुद्धं सुनियोजितं सफलं च भवेत् तर्हि राष्ट्रस्योन्नतिः निश्चिता एव। यतः ते एव भाविनः देशकर्णधाराः भवन्ति। अतः सत्यमेव छात्रजीवनं देशस्याधारभित्तिरस्ति।

देशाटनम्

अचिरस्थायिनीयं युवावस्था क्षणिकं च जीवनम्। येन केनापि प्रकारेण यदि जीवनं स्यात् तदपि अप्ररूढयौवनशक्ति नश्यति एव। अतो मानवजीवने देशाटनस्य महन्महत्त्वं वर्तते। अनेके भ्रमणशीलाः पुरुषाः देशाटनेनैव प्रसिद्धाः। देशाटनेन भिन्नभिन्नदेशीयभाषावेशभूषाव्यवहारस्थितीनां च ज्ञानं भवति। भ्रमणेन शीतातपवर्षावातसुखदुःखादिद्वंद्वानां सहिष्णुत्वं च वर्द्धते। स्वभावतः जिज्ञासोः प्रकृतिप्रेमिणः पुरुषस्य लालसेयं मुहुर्मुहुर्जागर्ति हृदये यत् कीदृशा देशविदेशाः कीदृशाः पर्वताः समुद्राश्च। अस्मात् कारणात् विहाय सर्वान् कामान् नगरे नगरे ग्रामे ग्रामे देशे देशे च सः भ्रमति। अस्मिन्नवसरे आगतान्यनेकानि कष्टानि तृणवत् मन्यते। विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः देशाटनप्रेमिणः पुरुषाः देशाटनं कुर्वन्ति। यतो हि—

देशाटनं पण्डितमित्रता च वाराङ्गना राजसभाप्रवेशः।
अनेकशास्त्रार्थविलोकनं च चातुर्यमूलानि भवन्ति पंच॥

इयं भ्रमणस्य प्रवृत्तिः यदा प्रबला भवति तदा मनुष्यः देशविदेशस्य भ्रमणं करोति। एवंप्रकारकं भ्रमणम् 'देशाटनम्' इति कथ्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देशाटनेन बहवो लाभाः सन्ति। अतो हि—स्वाभाविकप्रवृत्तितुष्टयर्थं शारीरिकबौद्धिकी उन्नत्यर्थं देशाटनमावश्यकम्। अस्मदीयाः पूर्वजा अपि भ्रमणशीलाः आसन्। ते यत्र यत्र गतास्तत्र तत्र स्वचिह्नानि स्थापितवन्तः। देशाटनेनैव महाकवेः बाणभट्टस्य बुद्धिः विशाला जाता। तस्यैव प्रभावेण महाकविः गद्यनिर्माता जातः। अस्मादेवोच्यते "बाणोच्छिष्टं जगत्सर्वम्"। नैषधमहाकाव्यस्य निर्माता श्रीहर्षः देशान्तरं गत्वा सर्वाः स्फुटाः विद्याः भाषाश्च प्रजग्राह। नैषधकाव्यस्य रचनां कृत्वा सः कश्मीरप्रदेशं जगाम। तत्रातिपण्डितेभ्यः स्वं काव्यं अदर्शयत्। सर्वे कवयः विद्वांसश्च देशाटनेनैव पण्डिताः जाताः। देशाटने विविधदेशीयाया भाषायाः ज्ञानमावश्यकम्। यदि तद्देशीयां भाषां सः जानाति तर्हि महतीं सुविधां लभते अन्यथा तस्य पुरुषस्यावलम्बनमावश्यकं भवति यः द्विभाषिरूपेण व्यवहारं करोतु। तेनैव सह गमनमावश्यकम् यः तस्य देशस्य भाषाविशारदः स्यात्।

देशाटनेनानेके लाभाः भवन्ति। बहूनां कृतेऽपि लाभाः सन्ति। ये देशाटनं कुर्वन्ति तेषां शारीरिकं बौद्धिकं च हितं भवति। तेषां कीर्तिश्च तत्र तत्र देशेषु स्थापिता भवति यत्र यत्र ते गच्छन्ति। यस्मिन् देशे गच्छन्ति तस्यापि प्रचारः भवति। इत्थं द्वयोः देशयोः रीतिनीतिव्यहारवेषभूषा-सभ्यतासाहित्यसंस्कृतिविचाराणां परस्परमादानप्रदानं च भवति। पुरातत्त्वसम्बन्धीनि बहूनि तत्त्वानि देशाटनकारिणां लेखैः ज्ञायन्ते। यथा भारतवर्षे नालन्दा-विश्वविद्यालयस्य तत्कालीनं रूपमुन्नतिः, व्यवस्था पद्धतिश्चेदानीं लुप्ता, चीनदेशीययात्रिणां वर्णनेनैवाद्य ज्ञायते। मगधसाम्राज्यस्य विशदं वर्णनं फाह्यानस्य दैनन्दिनी करोति। मेगस्थनीज-प्रभृतयः अनेके विद्वांसः अत्र आगताः, तैः तैः विद्वद्भिः बहुभिः कृतं वर्णनं अद्याप्युपलभ्यते, तेनैव तत्कालीनं ज्ञानं भवति।

देशाटनात् अधिकमात्रया ज्ञानवर्धनं भवति। धार्मिकजनानां कृते देशाटनम् तीर्थयात्रायाः रूपे सीमितमस्ति। इदं सीमितरूपेणापि देशाटनम् मोक्षस्य परमसाधनम् मन्यते। किन्तु व्यापकरूपेण इदं मनोरंजनस्यैकमुत्तमं साधनमस्ति। नगरस्य कोलाहलपूर्णवातावरणे निवासिनः नराः प्रकृत्याः क्रोडे स्थितान् ग्रामान्, शान्तिगाम्भीर्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्णान् पर्वतान् , मन्दमन्दप्रवाहपूर्णाः नदीः, कलकलध्वनियुक्तांश्च जलप्रपातान् दृष्ट्वा स्वसंघर्षपूर्णजीवनस्य कटुतां विस्मरन्ति । ग्रामाणां पर्वतानाञ्च शान्तिपूर्णस्थले नूतनस्थलानां दर्शनं मनुष्याणां प्रसन्नतायाः कारणं भवति । यद्यप्यस्मिन वैज्ञानिके युगे स्वगृहे विद्यमानः नरः सम्पूर्ण-विश्वस्य ज्ञानं प्राप्नोति। किन्तु अनेन प्रकारेणार्जितं तस्य ज्ञानमपूर्णं भवति । यथा दर्शनेन यां प्रत्यक्षानुभूतिं कोऽपि नरः उपार्जयति तथा सः श्रवणमात्रेण तामनुभूतिं प्राप्तुं न शक्नोति । कस्यापि देशस्य रीतिनीत्योः, सामाजिकार्थिकस्थित्योश्च ज्ञानं यथा देशाटनेन भवति तथा केनाप्यन्येन साधनेन भवितुं नार्हति । किमपि इतिहासप्रसिद्धं स्थानं दृष्ट्वा इतिहासजिज्ञासुः विद्यार्थी घटनायाः पृष्ठभूमिं ज्ञातुं समर्थः भवति ।

देशाटनेन व्यक्तेः स्वास्थ्यस्य वृद्धिः भवति। व्याधिग्रस्ताय कस्मैचिदपि मानवाय चिकित्सकः भ्रमणस्य, स्थानपरिवर्तनस्य च परामर्शं ददाति । देशा-टनेन भ्रमणं स्थानपरिवर्तनञ्चानायासेन भवति । अस्मिन् समये विविध-दृश्यानि दृष्ट्वा मनुष्यः किञ्चित्कालपर्यन्तं स्वजीवनस्य नीरसक्रमबन्धनात् मुक्तिं प्राप्नोति । सः स्वपारिवारिकचिन्ताभ्यः शून्यः भवति । नवीनस्थलानि नूतनवस्तूनि च तस्य चित्तम् प्रफुल्लितं कुर्वन्ति । अनेन प्रकारेण यादृशं स्वास्थ्यलाभं सः देशाटनात् प्राप्नोति तादृशं लाभं सः कस्याश्चिदपि औषधेः प्राप्तुं समर्थः न भवति ।

देशाटनम् मानवस्य व्यक्तित्वस्य विकासं चरित्रनिर्माणञ्च करोति । देशाटनेऽनेकानि सुन्दराणि असुन्दराणि वा वस्तूनि दृष्ट्वा सः स्वजीवनस्य विषमपरिस्थितिभिः सह योद्धुं समर्थः भवति । सः मानवजीवनस्य विविध-रूपस्य परिचयं प्राप्नोति । तस्मिन्नेतादृशी सहनशीलता आयाति यत् सः परस्य त्रुटीः क्षन्तुं समर्थः जायते । आपत्तिकालेऽपि सः धैर्यं न त्यजति । सहनशीलताधैर्यस्वावलम्बनप्रवृत्तयश्च तस्यादरस्य कारणानि भवन्ति ।

देशान्तरं गत्वा व्यक्तिः स्वविद्याधनबुद्धीनां विकासं करोति । पंचतन्त्रस्यैकस्यां कथायामिदमुक्तम् यत्—

'देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम् ।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम् ॥' इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अर्थात् अस्मिन् जगति तस्य मानवस्य जन्म निष्फलमेव येन भूतले नानाप्रकाराणां देशानां भ्रमणं पर्यटनञ्च न कृतम्। देशाटनं विना मानवाय पर्याप्तमात्रायां धनधान्यस्य प्राप्तिः न भवितुमर्हति। यथोक्तं—

'विद्या वित्तं शिल्पं तावन्नाऽऽप्नोति मानवः सम्यक्।
यावद् व्रजति न भूमौ देशाद्देशान्तरं हृष्टः॥' इति।

देशाटनं मानवस्य हृदये आत्मिकैकतायाः ज्ञानं सञ्चारयति। तस्य भेदबुद्धिः नष्टा भवति। अनेन विश्वबन्धुत्वस्य पन्थाः प्रशस्तो जायते। अस्मिन् युगे देशाटनस्यानेकाः सुविधाः प्रस्तुताः। केचन बाष्पयानेन, केचन जलयानेन यथेष्टं देशाटनं कुर्वन्ति। आसाम् सुविधानां वृद्धेः अन्ताराष्ट्रीयतायाः भावना मानवानां हृदयेषु उत्पन्ना। अद्य शनैः शनैः सः स्वसम्प्रदायजातिधर्माणां संकुचितविचारं त्यक्त्वा स्वं विश्वपरिवारस्य सदस्यम् मन्यते। अनेन प्रकारेण देशाटनात् 'वसुधैव कुटुम्बकम्' इति भावना प्रसारिता भवति।

मेलापकः

अस्माकं विचारशालिभिः पुरुषैः प्राणिनां देशवासिनाञ्च संघटनाय समये समये, स्थाने स्थाने, तीर्थे तीर्थे मेलापकानां स्थापना कृता। यदा मानवः कार्यकलापात् श्रान्तः भवति तदा सः कंचिद्विश्राममिच्छति। अतएव मनोरञ्जनसाधनस्यावश्यकता भवति। अनेकेषु मनोरञ्जन-साधनेषु मेलापकः अतीवमहत्त्वपूर्णः। प्रायः सर्वस्मिन् देशे मेलापकानां व्यवस्था दरीदृश्यते। एषां मेलापकानामायोजनं धार्मिकसांस्कृतिक-भावमुपलक्ष्य कदाचित् क्वचित् राजनैतिकसम्बन्धेनापि भवति। क्वचित् धार्मिकोत्सवमधिकृत्य यथा संक्रान्तिकाले प्रयागमेलापकः, ग्रहणे वाराणसीस्थ नमेलापकः। एवमयोध्या-मथुरादिप्रदेशेऽपि समये समये मेलापकाः भवन्ति। क्वचिचन् सांस्कृतिकसामाजिकसमारोहं चाधिकृत्य विजयादशमीप्रभृतयः मेलापकाः नागपञ्चम्यां वा समायोजितः मेलापकः भवति। कस्मिंश्चिद्देवस्थले सामाजिकोत्साहेन कृतः मेलापकः प्रायः सर्वत्र भवति। कस्यचित् राजनैतिकक्षेत्रस्य नेतुः स्मरणे तस्य स्मारको

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेलापकः आयोज्यते। यथा अस्मद्देशे हिन्दूनां तथैव विदेशे यवनपारसी-क्रिश्चियनानामपि जातीनामपि देशेषु क्षेत्रेषु बहवो मेलापकाः भवन्ति। तेषामपि एते एव हेतवः। स्वाभाविकः मेलाप्रियः मानवः।

प्रायः विस्तृते समतलप्रदेशे तीर्थे, नद्यास्तटे मेलापकाः आयोज्यन्ते। तत्र बाल-युवक-वृद्ध-स्त्रीपुरुषाणाञ्च महान् सम्मर्दो भवति। एषु मेलापकेषु वृषभ-हस्ति-रथ-शिविका-शकटानां च समूहः इतस्ततः दृश्यते। विभिन्नानि शकटयानानि तथा अन्यद् यानमारुह्य महता समारोहेणोल्लासेन च समागच्छन्ति मानवाः मेलापके, आगत्यावश्यकसामग्रीः च क्रीणन्ति। बालकाः नार्यः पुरुषाश्च मेलापके विविधवर्णानि चित्रविचित्राणि च वस्त्राणि धारयित्वा स्वयं धृत्वा च आगच्छन्ति। प्रायः तीर्थमेलापकेषु ग्राम्यमेलापकेषु च स्त्रियः गायन्त्यः समागच्छन्ति। शिशवः पदातयः क्रीडन्तः प्रफुल्लाश्च मोदन्ते। तेभ्यः बहूनि वस्तूनि तत्र नव्यानि सन्ति।

मेलापके स्थाने स्थाने क्रयविक्रयवस्तूनि प्रसारितानि भवन्ति। क्वचिन् मिष्टान्नानि, क्वचित्क्रीडनकानि, क्वचिद्वस्त्राणि, क्वचिन्मृन्मयपात्राणि क्वचिद् बालकानां वाद्ययन्त्राणि, क्वचित्ताम्बूलानि, क्वचिद् धातुभाण्डानि, क्वचिद् धातुशस्त्राणि, क्वचित्फलानि, क्वचिल्लेह्यपदार्थाः, क्वचित्पेयपदार्थाः, क्वचित् शाकानि, क्वचिल्लास्यं, क्वचिन्नाट्यं, क्वचित् वाद्यं च भवन्ति। केचित् गायन्ति हसन्ति काकूक्तिपूर्वकं परिहासं च कुर्वन्ति। मेलापके सर्वे स्वसामर्थ्यानुसारं धनव्ययं कुर्वन्ति खादन्ति च। सम्बन्धिनां स्वागतं विधाय वस्तूनि ददति। किं बहुना मनुष्याणां पशूनां च पादप्रचारणैः मेलापके धूलिधूसरितं च वातावरणं भवति। यथा प्रयागायोध्ययोः मेलापकाः भवन्ति। तथैव प्रायः प्रसन्नतायायाः देवनद्याः भागीरथ्यास्तीरे प्रतिवर्षं प्रत्युत प्रतिमासं चानेके मेलापकाः भवन्ति। यत्र दूरदेशादसंख्यजनाः चागत्य गंगास्नानं कुर्वन्ति, एषु मेलापकेषु यन्मनोहारि दृश्यं दरीदृश्यते तत्तु रमणीयतमम्।

प्रयागे प्रतिवर्षं माघमासे महान् जनसम्मर्दो भवति। तत्र गंगा-यमुनासरस्वतीनां पवित्रतमानां देवनदीनां संगमे स्थितोऽयं प्रयागराजः। अयं 'तीर्थराजः' इति नाम्ना प्रसिद्धः अस्ति। प्रयागराजस्य सर्वत्रैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुराण-रामायणमहाकाव्येषु यशोगानं गीयते। अत्र पुरुषोत्तमचरणकमल-पावितस्य महामुनेः भरद्वाजस्याश्रमपदमस्ति। प्रतिवर्षं दूरदेशादपि तत्रस्थितस्य वटवृक्षस्य दर्शनार्थमसंख्या नरनार्यश्चागच्छन्ति। कथयन्त्येवं पुराणादयो यत् प्रलयकाले भगवान् योगेश्वरः श्रीकृष्णः अस्यैव वटवृक्षस्य पत्रपुटे विराजते। अतएव गीयते—

'वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं शिरसा नमामि' इति। एवमत्र प्रतिवर्षं महान् जनसम्मर्दो भवति परन्तु प्रतिकुम्भमसंख्यकाः जनाः सुदूरदेशादागत्य संगमे स्नात्वा आत्मानं पुनन्ति। अस्य प्रयागराजस्यातीव मनोहारि वर्णनं कृतं महाकविना कालिदासेन—

क्वचिच्च कृष्णोरगभूषणेव भस्मांगरागा तनुरीश्वरस्य ।
पश्यानवद्यांगि विभाति गंगा भिन्नप्रवाहा यमुनातरंगैः ॥

Museum Library Lucknow 7620

एवं तुलसीदासेनापि बहुविधं वर्णनं कृतं स्वकीयरामायणे। अस्मिन् प्रयागमेलापके भारतवर्षस्य प्रत्येकप्रान्तात् यात्रिणः समागच्छन्ति। अस्मिन् समये यात्रिणः वृषभाष्ट्र्याः क्रयं विक्रयं च कर्तुं नागच्छन्ति अपितु ते तीर्थराजस्य दर्शनार्थमागच्छन्ति। सम्पूर्णमेलापके जलप्रकाशयोः व्यवस्था भवति।

मेलापकाद् बहवो लाभाः। जनतायाः सम्मेलनं यदा कदा भवति सदैव संगमः असम्भवः अतो हि वर्षे वर्षे काले काले सर्वे जनाः नीतिविशारदाः विचक्षणाः महात्मानः व्यापारिणः सम्बन्धिनश्चागत्य स्वकीयेन विचारविमर्शेन जनानभिबोधयन्ति। विचारस्यादानप्रदानं मेलापके एव सम्भवति। प्रायः ये केचन मेलापकाः भवन्ति ते सर्वे कस्याश्चित् नद्यास्तटे एव भवन्ति। अस्य महन्महत्त्वं—नद्याः स्नानेन बहवो रोगाः नश्यन्ति। यतो हि पर्वतादागच्छन्त्यो नद्यः स्वकीये शीतले स्वच्छे मधुरे जले वहन्तीः रोगनाशिका ओषधीः आनयन्ति। ताभ्यः बहवो लाभाः भवन्ति। तस्मिन् जले स्नात्वा, जलपानं च कृत्वा मनुष्याणां सर्वे रोगाः नष्टाः भवन्ति। तत्र समुपस्थिताः चत्वारो वर्णाः पारस्परिकं भेदभावं विहाय एकेनानन्देन महता समुल्लासेन स्नान्ति देवदर्शनं च कुर्वन्ति। अस्मिन् समये न कोऽपि ब्राह्मणः क्षत्रियः वैश्यः अपितु सर्वे हिन्दवः एव सन्ति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एतादृशे मेलापके धनिकाधनिकयोः राजप्रजयोः नास्ति भेदः। सर्वे समायान्ति स्नान्ति गच्छन्ति च। श्रूयतेऽस्मिन्नेव प्रयागे मेलापके महाराजः हर्षवर्धनः प्रतिवर्षमागच्छति स्म। ब्राह्मणभिक्षुक्षपणकांगविकलवर्गेभ्यः धनं वस्त्राणि च ददाति स्म। आगत्य प्रजावर्गप्रबोधनाय सम्भाषणं कथाख्यायिकादिकं च कारयति स्म। तेन समुद्बोधिता प्रजा कर्म करोति। शासनस्य नवीनोद्घोषस्तत्रैव भवति। एवं वयं पश्यामः यत् मेलापके बहवो युक्तिपूर्णाः लाभाः सन्ति।

तीर्थवर्णनम्

यस्य भारतवर्षस्य यशोगानं देवाः अपि कुर्वन्ति तथा—

"गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥"

एवंभूतायां ललामभारतभूमौ सर्वत्रैव तीर्थस्थानानि। यत्र पदे पदे देवर्षिपण्डिताचार्याणां पदपंक्तिः अद्यापि विराजते। वसुधायां सर्वत्र विभिन्नधार्मिकसम्प्रदायानां पवित्रतीर्थानां सद्भावादस्माकमार्यधर्मानुसारिणः ऋषयः कालान्तरे पौराणिकस्य धर्मस्योपासनासरण्याश्चाक्षुण्णं रक्षणं विधातुकामाः धर्मसंस्थापकाः विभिन्नानां देवतायतनभूमीनां तीर्थस्थानानि इति कृत्वा लोके तेषां कीर्तिं कीर्तयन्तः पुराणेषु प्रसिद्धिं प्रख्यापयन्तस्तीर्थानां संस्थापनं कृतवन्तः इति। भारते विभिन्नधर्मानुयायिनां कृते विभिन्नानि तीर्थस्थानानि सन्ति। तत्र परःसहस्राः भारतीयाः महता हर्षेण विश्वासेन च सह प्रतिवर्षमनेकानि कष्टानि सहमाना अपि गच्छन्ति। तत्र जनानां समारोहेण विशालः सम्मर्दः भवति। तत्र निश्चितसमये विभिन्नाः जनाः गच्छन्ति।

भारते अयोध्या, काशी, द्वारका, मथुरा, वृन्दावनमित्यादीनि बहूनि तीर्थस्थानानि सन्ति। एषां तीर्थानां मध्ये केन न श्रुता भवेदयोध्या नाम नगरी। इयं महापुण्यतमा श्रेष्ठा नगरी भगवत्याः सरय्वाः दक्षिणे सुरम्ये पुलिने स्थिता। अधुनाऽपि मन्दिराणां डिण्डिमघोषमिषेण स्वप्राचीनगौरवं गम्भीररवेणोद्घोषयति। सहस्रैः उद्धूयमानैः ध्वजैः स्वसर्वोत्कृष्टां स्थितिं स्थापयति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्तरप्रदेशस्य ललामभूतायामस्यामेव नगर्यां भगवतः मर्यादापुरुषोत्तमस्य रामचन्द्रस्य जन्माऽभवत्। अत्र सुदूरदेशात् जनाः आगत्य काले काले पुण्यसलिलायां सरय्वां स्नानं विधाय भगवतः रामचन्द्रस्य जन्मभूमेः हनुमतः पवनपुत्रस्य च दर्शनं कृत्वा कृतकृत्याः भवन्ति।

एषां तीर्थानां महन्महत्त्वं वर्तते। एषु तीर्थेषु प्रायः सर्वे गच्छन्ति। परन्तु यत्र येषामधिको विश्वासः तत्रैव ते पौनःपुन्येन यान्ति। भारते चतुर्धाम-यात्रातीव प्रसिद्धा। प्राचीनाः जनाः आधुनिकाः अपि मुक्तिप्राप्त्यर्थं श्रद्धया विश्वासेन च चतुर्धामयात्रां कुर्वन्ति। प्रतिवर्षं कोटिसंख्याकाः जनाः एषु तीर्थेषु यात्रापथेन गच्छन्ति। तीर्थानि संस्कृतेः पोषकाणि भवन्ति। धर्मसम्प्रदायव्याजेन जनाः एकत्रीभूय परम्परां पालयन्ति। एतेन भवति चिरस्थायिनी संस्कृतिः मर्यादा च। विविधदेशीयाः जनाः आगत्य सम्मेलनं कुर्वन्ति। तेन एकतायाः संस्कारस्य भावनायाश्च शुद्धिर्वृद्धिश्च भवति। एवं तीर्थयात्रायाः बहवो लाभाः विद्यन्ते।

तीर्थेषु एव प्राचीनकाले तपःस्वाध्यायनिरतैः शान्तैः दान्तैः महर्षिभिः मनीषिभिश्च सेविताः आश्रमाः विद्यन्ते स्म। तत्र विभिन्नदेशादागत्य छात्राः अध्ययनं कुर्वन्ति स्म। तत्र गतवतां यात्रिणां मनस्सु विद्यायाः ज्ञानस्य धर्मस्य वा कृते सात्त्विकी भावना प्रेरणा चोत्पद्यते स्म। किन्तु आधुनिकानां तीर्थानां नैतादृशी सुव्यवस्था। पुनरपि मर्यादायाः पालनं तु भवत्येव। अद्यापि भिन्नभिन्नतीर्थेषु धर्मशाला-पाठशाला-अतिथिशाला-यज्ञशालाश्च विद्यन्ते। तत्र जनानामादरो भवति। पण्डितानां महात्मनां च विविधेषु विषयेषु भाषणानि भवन्ति। तेन भाषणेन च मनःशुद्धिः पवित्रा भावना चावश्यमेवोत्पद्यते।

एकदाहं नभसि मासे भगवतः श्रीरामचन्द्रस्य जन्मभूमिमयोध्यां गतवान्। तत्र महान् जनसंमर्दः आसीत्। श्रावणमासस्य सिते पक्षे आपंचमीतः मन्दिरे मन्दिरे गानं वा नृत्यं च भवति। प्रायः दश दिनानि यावत् महता समारोहेण 'झूला' नामकः महोत्सवः सम्पाद्यते। अस्यां पुण्यस्वरूपायां नगर्यामेक एव महान् राजमार्गः तथा अन्ये क्षुद्रकाययुक्ताः लघुपथाः सन्ति। यद्यपि पूर्ववत् मन्दिरे मन्दिरे घण्टानादः भगवद्दर्शनं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कीर्तनञ्च सम्यक्तया भवति। अत्रैव नगरस्य दक्षिण-पश्चिम-दिग्विभागे मर्यादापुरुषोत्तमस्य भगवतो रामचन्द्रस्य यवनाक्रमणैर्विनष्टा भग्नावशेषा जन्मभूमिः तस्य कीर्तिं स्मारयति।

महतो राजमार्गस्योपकण्ठे पश्चिमे दिग्विभागे अस्त्येकं बहुभिः सुदृढ-विशालसोपानैः परिलसितं बह्वीभिरुद्धूयमानाभिः पताकाभिरुपशोभितम्, भस्मच्छुरितैः धृतकौपीनैः कमण्डलुधारिभिरनेकैः महात्मभिः मण्डितम्, सुदृढया परिखया संवृतम्, भगवतः अयोध्यापुरीपालकस्य पवनपुत्रस्य हनुमतः विशालं मन्दिरम्। तत्र गत्वा जनाः प्रायः पञ्चाशताधिकं सोपानमारुह्य भगवतः स्वर्णच्छत्रधारिणः वायुनन्दनस्य दर्शनं कृत्वा आत्मानं कृतकृत्यं च कुर्वन्ति। तत्र मण्डपेषु कुशास्तरणेषु उपविष्टानाम्, रामनामजपतत्पराणां विरचितरामानन्दसम्प्रदायानुसारिललिततिलकालिकानाम्, पवित्रकोपशोभि-ताङ्गुलीनां मूर्तिमतामिव ब्रह्मतेजसाम्, साकाराणामिव तपसाम्, शरीर-धारिणामिव ब्रह्मचर्याणाम्, जटिलानां साधूनाञ्च दर्शनं कुर्वन्ति। सिन्दूरोर्ध्व-पुण्ड्रमण्डितललाटम्, रामचरणचिह्नमुद्रामुद्रितबाहुदण्डवक्षःस्थलम्, हनु-मन्मन्दिरदेवपूजकम् अध्यक्षं च आनमन्ति।

अस्या वैचित्र्यपूर्णायाः शतशः सुन्दरातिसुन्दरैः दिव्यैः देव कुलैरलंकृतायाः निरन्तरं कौशल्यानन्दवर्धनस्य दाशरथेः पापविनाशकस्य भगवतो मर्यादापुरुषोत्तमस्य रामचन्द्रस्य गुणनाम्नोः कीर्तनैरापूरिताशादिग्-विभागायाः निरीहैर्निस्पृहैरात्मारामैः अनेकैः राममन्त्रजपतत्परैः महात्म-भिरुपशोभितायाः विभिन्नदेशीयैर्गृहीतमुनिव्रतैः यतिसमूहैर्युक्तप्रदेशायाः धार्मिकदृष्ट्या महन्महत्त्वमस्ति। अद्यापि अस्यां नगर्यां सर्वत्र पाठशाला, धर्मशाला, यज्ञशाला, अतिथिशाला, गोशालाश्च विराजन्ते। सवत्र पाठशा-लायां पटवः बटवः अद्यापि गुरुसन्निधौ शास्त्रचिन्तनतत्पराः दरीदृश्यन्ते। भारतीयपरम्परागतसंस्कृतरक्षणबुद्ध्या विद्यादानार्थं संस्थापिताभिः पाठशाला-भिः विराजितायाः अस्याः विशिष्टस्थानमस्ति। बहुः अनुभवः प्राप्यते तीर्थयात्रया, बहु च दृष्टं श्रुतञ्च अतः बहुलाभकरी तीर्थयात्रा नात्र काचिद् विचिकित्सा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विद्यालयोत्सवः

सर्वसाधारणोऽयं नियमो यत् सर्वस्मिन्नपि विद्यालये विश्वविद्यालये च प्रतिवर्षं तदीयां संस्थापनतिथिं महता संरम्भेणोत्साहेन समारोहेण च स्मारयन्ति जनाः। तत्र पूर्ववर्षेषु कृतकर्मणां घटितघटनानामायव्ययानां परीक्षाफलानां च विवरणं प्रस्तुवन्ति। सर्वेऽध्यापकाः प्रधानाध्यापकाः सदस्याः व्यवस्थापकमहोदयाश्च प्रसन्नाः दरीदृश्यन्ते। गतदिवसेऽस्माकं विद्यालयस्य वार्षिकोत्सवः समाप्तः। सप्ताहं यावत् उत्सवः प्राचलत। तत्र खलु वार्षिकोत्सवमुपलक्ष्य प्रधानातिथेरनुरोधेन प्रधानाचार्यमहोदयो दिनद्वयस्यावकाशं प्रदत्तवान् छात्रेभ्यः।

अस्मिनुत्सवे क्षेत्रीयाः विंशतिविद्यालयाः सम्मिलिताः। तत्र बह्वयः प्रतियोगिताः यथा—क्रीडा-वादविवाद-अन्त्याक्षरी-कवितापाठादिप्रतियोगिताः तथा नाटक-कविसम्मेलन-प्रवचन-पुरस्कारवितरणादीनि कार्यजातान्यभवन्। इत्यासामायोजनानां कृते सभामण्डपमंचदर्शकस्थानादीनां प्रबन्धोऽस्माकमुत्तरदायित्वे आसीत्। अस्माकं क्रीडाध्यापकः, हिन्दीशिक्षकः, कलाशिक्षकश्च निर्देशाय नियोजिताः आसन्।

विद्यालयस्य सम्मुखे क्रीडाक्षेत्रस्यैकभागे विशालकायमण्डपस्थानं निर्मितम्। तत्र नाटकस्य कृते वर्गाकारं रंगमंचं निश्चित्य द्विहस्तपरिमितमुच्चधरातलं निर्माय चतुर्दिक्ष्वावरणपटमावृत्य मञ्चस्य निर्माणं कृतम्। पश्चाद् भागे तदाकारे निम्नप्रदेशे नेपथ्यरचनाभूमिः कृता। तत्र परितोऽप्यावरणं कृतम्। मञ्चस्याग्रभागे सुललितं सुविस्तृतं प्रेक्षकस्थानमासीत्। सर्वत्र पंक्तयः सुशोभिताः आसन्। तत्रैव महिलानां पुरुषाणाञ्च कृते पृथक् पृथक् प्रबन्धः आसीत्। मण्डपोऽशोकपत्रैः चित्रविचित्राकारैः चमत्कृतः कर्गदपत्रनिर्मितगोलकैः अलंकृतः आसीत।

सप्ताहस्य प्रथमे दिवसे क्रीडाप्रतियोगिता विविधविद्यालयात् समागतानां निमन्त्रितप्रतियोगिनां छात्राणां मध्येऽभूत्। द्वितीये दिवसेऽन्त्याक्षरीवादविवादादिप्रतियोगिताऽभूत्। अस्माकं विद्यालयस्य छात्राः अपि तासु तासु प्रतियोगितासु उत्साहेन सम्मिलिताः। एवं कविसम्मेलनं नाटक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यातीव समीचीनमभूत् । तत्र कविसम्मेलने एतद्देशीयाः अन्यप्रान्त-नगर-वासिनश्चः कवयः समागत्य स्वकीयकवितापाठमकुर्वन् ।

विद्यालयस्यान्तिमेऽहनि व्यस्तकार्यक्रमे सत्यपि प्रधानतिथिरूपेण समागताऽस्माकं देशस्य शिक्षामंत्रिमहोदयो विद्यालयस्य विविधानि कार्याणि संश्रुत्य विलोक्य चातीव प्रसन्नोऽभवत् । माननीयो मंत्रिमहोदयः यथासमयं आगत्योत्साहवर्धकं रुचिकरं भाषणमकरोत् । स्वविस्तृतभाषणे सः समस्तविद्यार्थिनाम् कर्त्तव्याणाम् निर्देशनमप्यकरोत् । तेन कथितम् यद्-विद्यार्थिनः वर्तमानस्य समाजस्यार्धविकसितपुष्पाणि सन्ति । ते विकासं प्राप्य समाजस्य देशस्य च भारं स्वस्कन्धेषूद्वहन्तो भारतमातुः स्वतंत्रतां रक्षिष्यन्ति । विद्यालयेष्वागत्य तेषामिदं तु सर्वप्रथमं कर्त्तव्यमस्ति यत ते स्वाध्यापकान् गुरुजनान प्रति श्रद्धां धारयन्तः विद्याध्ययनं कुर्युः । एषु विद्यार्थिजीवनेषु मानवः प्रत्येकप्रकारस्य विकासं कर्तुं समर्थः भवति । अतएव इदं कदापि नष्टं न करणीयम् । तत्पश्चात् तेनैव स्वकरकमलेन पारितोषिकवितरणम् कृतम् । छात्राः अतीव प्रसन्नाः आसन् । समाप्ते च मन्त्रिमहोदयस्य भाषणे तस्मिन्नेव रंगमञ्चेऽध्यापकैः प्रस्तुतं प्रहसनमतीवानन्ददायकं दृष्टम् । अयं तु परमोत्कृष्टः कार्यक्रमः आसीत् । पश्चादस्माकं विद्यालयस्य विद्वद्वर्येण प्रधानाचार्यमहोदयेन सर्वेभ्यः आगतेभ्यः दर्शकेभ्यः अतिथिमहोदयेभ्यः कार्यकर्तृभ्यः सहयोगिभ्यश्च बहुशः धन्यवादाः प्रदत्ताः । तत्पश्चात् जलपानस्यायोजनमभवन । सर्वे प्रसन्नतापूर्वकं जलपानमकुर्वन् । अनेन प्रकारेण वार्षिकोत्सवः समाप्तः ।

वस्तुतः विद्यालयस्येतिहासे तस्य वार्षिकोत्सवस्य महत्त्वपूर्णं स्थानमस्ति । अनेन छात्राणामभिभावकाः अध्यापकानां समीपमायान्ति । तेषु विद्यालयं प्रति सहयोगस्य भावना उदेति । अस्मिन् समये विद्यार्थिनः शिष्टाचारस्य लोकरीत्याश्च ज्ञानम् प्राप्नुवन्ति । तेषु पारस्परिकसहयोगप्रेमसहानुभूतिभावनायाः विकासो भवति । ते भाषणैः चरित्रनिर्माणस्य शिक्षां प्राप्नुवन्ति । अयमुत्सवः तान् जीवनस्य लक्ष्यं प्रत्यग्रेसारयति । अनेन प्रकारेण इदं दृश्यते यत् अयमुत्सवः अतीवपुण्यतमः, यः छात्रेषु नवीनप्रेरणास्फूर्तिं जागृतिञ्च करोति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

चलचित्रम्

आधुनिके वैज्ञानिके युगे ये खलु नवीनाः नवीनाः आविष्काराः भवन्ति तेष्वाविष्कारेषु 'सिनेमे'ति नाम्ना प्रसिद्धस्य चलचित्रस्य महत्त्वपूर्णं स्थानं वर्तते। अनेनाविष्कारेण जगति जनजीवने च महती क्रान्तिः समुपस्थिता। इदं चलचित्रमस्मिन्युगे जनजीवनस्याभिन्नांगं जातम्। नास्ति कोप्येतादृशः पुरुषः सम्प्रति यस्य समक्षं चलचित्रं नागतं भवेत्। इदानीं चलचित्रस्य प्रभावः आबालवृद्धनरनारीसमेतानाम् समस्तानाम् मानवानामुपरि विराजते। सर्वत्रैवास्य चर्चा, अस्यैव गीतानां ध्वनिः श्रूयते। अन्यानि प्राचीनानि सर्वाणि मनोरंजनसाधनानि चलचित्रस्य समक्षे विलुप्तानि। सर्वत्रास्यैव गीतानि गीयन्ते। सर्वं वातावरणं चलचित्रमयमिव प्रतिभाति। चलचित्रदर्शनं विना निरर्थकं जीवनम्। सर्वधर्मान् परित्यज्य सर्वकर्माणि विहाय च चलचित्रपटस्य विलोकनाय सर्वे जनाः गच्छन्त्यहर्निशम्। निर्वाक्-सवाग्भेदात् द्विविधे चलचित्रपटे सम्प्रति द्वितीयस्यैव प्राधान्यम्। इदमेव रुचिकरं मनोहारि च।

चलचित्रं नाम्न्याभिनययुक्तं लघुद्रव्यव्ययसाध्यं सर्वप्रथमं मनोरञ्जनस्य साधनमस्ति। एतादृशं मनोरंजनं केनाप्यन्येन साधनेन भवितुं नार्हति। तत्र गत्वा त्रिघटिकाभ्यन्तरे नयनाभिरामं रमणीयं दृश्यं विलोक्य, निशम्यश्रोत्राभिरामं गीतमानन्दस्य यां परां कोटिं प्राप्नोति मानवः सा त्वन्यत्र दुर्लभा। इदमेव कारणं यत् अनेके पुरुषाः परिश्रमेणाप्युपार्जितं धनं दत्त्वा मुहुर्मुहुः चित्रपटस्य दर्शनाय गच्छन्ति। परन्तु यत्र बहवो गुणाः सन्ति तत्रैव तेषां मध्ये दुर्गुणा अपि तिष्ठन्ति। यथेदं चित्रपटदर्शनं अश्लीलात्मकवर्णनकथानकदृश्यैः बालान् युवकांश्च वासनावासितान्तःकरणान् करोति। तत्र गत्वा अधिकांशतः युवक-युवतयश्च विशेषतः दुर्गुणमेव गृह्णन्ति। इदमपि दृश्यते यत् कामभोगप्रधानाः सर्वाः कथाः अत्र सन्ति। कामप्रधानचित्रपटदर्शनेन कामवासना जागर्ति। अनया सदाचारस्य हानिः संजायते। बालक-बालिकाश्च कुपथगामिनो भवन्ति। वस्तुतः चलचित्रमाध्यमेनाधुना लाभापेक्षया हानिरधिकतरा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदि चलचित्रस्य प्रयोगः शिक्षाविस्तारप्रसारणे प्रशिक्षणे च क्रियेत तर्हि महान् लाभः भवितुं शक्नोति। अशिक्षितानां ग्रामीणानां स्त्रीणां पुरुषाणां च कृतेऽस्य प्रयोगः महतीं सफलतां प्राप्तुं शक्नोति। विविधैः लाभपूर्णैः चलचित्रपटैः एतेषां मानसिकी शारीरिकी आर्थिकी चोन्नतिः भवितव्या। अनेन अशिक्षायाः दोषान् शिक्षायाश्च गुणान दर्शयितुं पार्यते। श्रवणापेक्षया प्रत्यक्षदर्शनेन मानवानां हृत्पटलेऽधिकः प्रभावः भवति। अनेन प्रकारेण दर्शं दर्शं चलचित्रपटमल्पज्ञाः ग्रामीणा अपि विशेषज्ञाः भवितुं शक्नुवन्ति। बालानां शिक्षणेऽपि अस्य महानुपयोगः। तान् शिक्षासम्बन्धीनि दृश्यानि दर्शयित्वा पठनविषये तेषां रुचिमधिकां कर्तुं शक्यते।

चलचित्राधारेण यत् द्रव्यार्जनं भवति तस्य विपुलतमो राशिः। बहूनि एतादृशानि चलचित्राणि सन्ति यान्यभिनेत्रीणां हावभाववेषवार्तासु आदर्शरूपाणि संजातानि अभिनेतॄणां पुरुषाणाञ्चापि। सामान्यज्ञानेषु युवकानां मध्ये चलचित्रसम्बन्धिज्ञानमेवाधिकं दृश्यते। किमधिकं वस्त्राण्यपि अभिनेतॄणां नामभिः चित्रैश्चाङ्कितानि भवन्ति। विज्ञापनानि तेषामेव माध्यमेन सफलानि भवन्ति। पत्र-पत्रिकादयोऽपि चलचित्रसन्देशं चित्रपटं च समाश्रित्य स्वकीयमाकर्षणं च वर्धयन्ति।

चलचित्रभवनानां संख्या तीव्रवेगेन वर्धते। भारतेऽपि तेषामधिका संख्या वर्तते। तथा सहस्रसंख्यकानि चलचित्राणि भारते निर्मितानि। अनेके पुरुषाः चलचित्रेषु कार्यं कुर्वन्ति। चलचित्रमिदानीं जनानां मनांसि निर्जित्य तिष्ठति। अस्य चलचित्रपटस्योन्नतिः द्रुतगत्या भवति भविष्यति च। सम्प्रति राजकीयशिक्षाविभागेन एकः शिक्षाप्रसारविभागः निर्धारितः। अयं विभागः ग्रामेषु चलचित्रपटप्रदर्शनेन प्रौढशिक्षायाः प्रचारं करोति। अस्मिन् समये विद्यालयेषु सूचनाविभागेषु स्वास्थ्यविभागेषु च चलचित्रस्योपदेशात्मकं प्रदर्शनं प्रारब्धम्। चलचित्रैः जनाः प्रसन्नताम् ज्ञानञ्चाप्नुवन्ति। यदि सुचारुरूपेणेयं योजना प्रचलेत् तर्हि जनानां छात्राणां च बहुलाभः स्यात्।

इदं सर्वं सदपि चलचित्रे महान्ति दूषणानि अपि सन्ति, किन्तु यदि शासनाधिकारिणः पुरुषाः एतद्विषये ध्यानं दास्यन्ति तदा महान् लाभः भवि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्यति। चलचित्रपटेषु अश्लीलचित्रप्रदर्शने प्रतिबन्धः स्यात् तथोपदेशात्मकानि सच्चरित्रवर्धकानि चित्राण्येवानुमोदितानि भवन्तु, तर्हि देशस्य जनानां राष्ट्रस्य च कल्याणं भवेत्। चलचित्रं प्रचारस्य शिक्षायाश्च सुलभमुत्तमं साधनमस्ति। अतएव चलचित्रपटस्योपयोगिता समधिका नास्त्यत्र कस्यापि सन्देहलेशः।

यत्र चलचित्रपटाद् बहवो लाभाः सन्ति तत्रैव दोषस्यापि अधिकता वर्तते। सम्प्रति भारतीयसभ्यंमन्येषु परिवारेषु दृश्यते यद् अन्यां चर्चां विहाय प्रायः चलचित्रपटानामेव सुन्दरा चर्चा चलति। एभिः कुलीनाः सहस्रशः लक्षशः बालाः बालिकाश्च न केवलं निर्लज्जताम् अपितु सर्वथा चरित्रहीनतां नीताः, अश्लीलतायाः प्रचारे चलचित्रैः सर्वतोऽधिकोन्नतिः जाता। अनेन जनानां पतनोन्मुखी प्रवृत्तिरपि जायते। नास्तीदं मनोरञ्जनस्थानमपि तु इदं वध्यस्थानं शीलतायाः, निवासभूमिः लुण्ठकानां, मन्दिरं मद्यपानस्येति। आधुनिकानि निर्मितानि चित्राणि मानवचरित्रनिर्माणार्थम् त्वभिशापरूपाण्येवेति।

पाश्चात्यसंसारेण सह स्पर्धमानः भारतदेशोऽधिकं चलचित्रनिर्माणे लग्नः। परन्तु प्रतिशतं नवतिः चित्राणि सर्वथा हेयानि सम्प्रति चलचित्रनिर्मातारः विश्वस्य चरित्रनाशायैव बद्धपरिकराः दृश्यन्ते, चित्रालये दर्शितानि नग्नचित्राणि चतुष्पथादिषु मार्गेषु भित्तिकादिषु च स्थाप्यन्ते। यद् दृष्ट्वा भीष्मस्यापि मनसि कदाचिद् विकाराः समुद्भवेयुः। सन्ति अनेकाः बह्व्यः हानयः चित्रपटात परन्तु सत्स्वपि अनेकेषु दोषेषु, बहूनां गुणानां मध्ये उक्ता दोषाः बाधकाः न भवन्ति। यतो हि उक्तं महाकविना कालिदासेन—

अनन्तरत्नप्रभवस्य यस्य, हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते, निमज्जतीन्दोः किरणेष्विवाङ्कः॥

गणतन्त्रशासनम्

तन्त्रं शासनस्यैव नामास्ति। तथापि तन्त्रशब्दः बहुष्वर्थेषु प्रयुज्यते। अतः राजनीतिक्षेत्रे 'शासनम्' इति प्रसिद्धम्। गणशब्दः समूहवाचकः अस्ति। 'सामूहिकविधिना शासनम्' इति गणतन्त्रशासनस्य भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
भारतवर्षे प्राचीनकालादेव गणतन्त्रस्य व्यवस्था प्रचलिता अस्ति। अद्य तस्यैव परिवर्द्धितं रूपं प्रचलति।

पुराऽपि विवादास्पदविषयाः राजनिर्धारितगणपरिषदा निर्णीताः भवन्ति स्म। मल्ल-शाक्य-लिच्छवि-मालव-कुलिन्दादि-जातीनां स्वस्वराज्य-शासनं मन्त्रिणां समूहैः, 'संसद्'-सभासदैः संचालितमासीत्। मौर्यगुप्तादि-साम्राज्ये तु विविधसमितिभिः सुघटितसुचारुरूपेण शासनं प्राचलत्। तेषु तेषु कालेषु कृतानां तन्त्राणां व्यवस्थायां—"राज्यपरिषद्, लोकसमितिः, गणतन्त्रसंघः, सभासमितिः, ग्रामसभा" इत्यादयः शासनपद्धतेः विभागरूपेण आसन्। वेदेष्वपि 'सभा' 'समिति' इत्यादिशब्दानां प्रयोगः प्राप्यते। इमे द्वे प्रजापतेः ब्रह्मणः द्वे कन्ये कथ्येते स्म। इमे द्वे अतीवलोकप्रिये आस्ताम्। राजाऽपि अस्यां परिषदि गच्छति स्म। इयं न्यायालयस्य कार्याणि करोति स्म। सर्वे जनाः तत्र गत्वा स्वमतं प्रकाशयन्ति स्म। 'न सा सभा यत्र न सन्ति वृद्धाः' इति मतानुसारेण सभा वृद्धजनानां परिषदासीत्। वृद्धानां परिषद् अथर्ववेदे 'वरिष्ठ' शब्देन व्यवहृता अस्ति, यस्याः निर्णयः अन्तिमः आसीत्। 'विशः' इति विशिष्टः शब्दः प्राचीनकाल-स्यास्ति। विशां समितिः प्रजानां प्रतिनिधिस्वरूपा राजसभया सम्बद्धा आसीत्। क्षुद्रक-त्रिगर्त-अन्धक-वृष्णिप्रभृतीनां गणतन्त्रवर्णनं प्राप्यते। समानाधिकारेण युक्ता भेदरहिता जनसभा धर्मसभास्वरूपा 'निकाय' इति नाम्ना प्रसिद्धा आसीत्। कौटिल्यस्यार्थशास्त्रे महाभारते राज्यशासनविभा-गानामधिकारिणां च यथा वर्णनमस्ति तदनुसारं तत्र गणतन्त्रव्यवस्थायाः रूपं ज्ञायते। अतएव गणतन्त्रात्मिकी व्यवस्था न तु नवीना।

इत्थं गणतन्त्रव्यवस्था पुरातनी अस्ति अद्य तथैव केन्द्रीय-प्रान्तीय-शासनविभागः कृतः। तत्र लोकसभा-राज्यसभा इति नामद्वयं भवति। विधानसभा कार्यकारिणी च भवतः। मन्त्रिणां विविधाः विभागाः शासनस्य विषयानुसारेण भवति। प्रजानां मण्डलस्य प्रतिनिधयः राज्यसभायां लोक-सभायां चापि गच्छन्ति। इत्थं समस्तप्रजानां सम्बन्धेनैव संघटितं शासनं भवति। इति गणतन्त्रशासनस्य व्यवस्था प्रजायाः विवेकेषु आधारिता अस्ति। यथा ग्रामनगरवासिनां जनानां प्रतिनिधिवर्गः भविष्यति तथैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
मन्त्रि-मुख्यमन्त्रि-राष्ट्रपतिप्रभृतीनां निर्वाचनं भविष्यति। सामान्यनिर्वाचनेन निर्वाचिता एव सदस्याः पुनः विशिष्टनिर्वाचनं कुर्वन्ति। ग्रामशासनेऽपि पञ्चसभापत्यादीनामपि तथैव स्थितिः।

गणतन्त्रात्मके शासने व्यक्तिस्वातन्त्र्यस्य महत्त्वमस्ति। इदं शासनं जनतया निर्मितं भवति। अतएव जनतायै भवति। अस्मिन् शासने स्त्रीणां स्थितिं साधयितुं, निम्नजातीनां मध्ये अस्पृश्यतां निवारयितुमनेकशः प्रयत्नाः कृताः। परन्तु इदानीं समये भारतस्य स्थितिः गणतन्त्रस्यानुकूला नास्ति। अधुनाऽपि जनाः अधिकांशतः जातेः संकीर्णतायाम् निमग्नाः सन्ति अतएव निर्वाचनसमये तेऽन्योन्यं प्रतिस्पर्धां कुर्वन्ति।

अद्य नास्त्यनुकूलाः अस्माकं समाजस्य संस्काराः। भारतवर्षस्य प्रथमस्वतन्त्रतासंग्रामस्यासफलतायाः कारणं केवलमेव राज्ञां विलासप्रियता आसीत्। इयं तु भारतवर्षस्य राष्ट्रीयदुर्बलता इति कथ्यते। सम्प्रति एतन्निवारणाय प्रयत्नाः भवन्ति। वर्तमानकालिकी जनता देशस्योन्नतिं प्रति विशिष्टं ध्यानं ददाति। इदं गणतन्त्रशासनं जनतायाः शासनं भवति। अतएव सर्वे जनाः स्वस्वप्रतिनिधिस्वरूपेण प्रत्येककार्ये हस्तक्षेपं कर्तुं समर्थाः भवन्ति। देशस्योन्नत्यर्थं तेषां मनस्सु उत्साहाः सन्ति। ते सर्वे सदैव देशस्य हिताय चिन्तयन्ति। इदं तु तेषां परमं कर्त्तव्यं परिलक्ष्यते।

एवं रीत्या यदा गणतन्त्रशासनं प्रजानां हृदि विवेकस्थितिं कुर्यात्। तदा जनतायां चेतना, विचारशक्तिः, शिक्षा, पक्षपातराहित्यं, द्वेषभावनात्यागश्च स्यात्। तदैव सुप्रबन्धः सुशासनं च भवेत। अन्यथा गणतन्त्रोऽपि राजतन्त्र एव प्रत्युत तस्मादपि कष्टकरः। अविवेकेन, द्वेषेण, पक्षपातेन वा निर्वाचिता एव जनाः शासनव्यवस्थायां गत्वा स्वार्थसाधनं कुर्वन्ति। आत्मानं शासकमनुभवन्ति। सामान्यजनैः सह वार्तामपि न कुर्वन्ति। किमिदं गणतन्त्रशासनम्। अतः प्रजासु जागृतिः अपेक्षिता अस्ति। सुष्ठुरीत्या संघटिता प्रजातन्त्रव्यवस्था राष्ट्रे सुखसमृद्धिवर्पणं कर्तुं शक्नुयादिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संयुक्तराष्ट्रसंघः

मनुष्याणां शक्तिः बुद्धिश्चापरिमिता अस्ति। सृष्टिमध्ये मनुष्य एव सर्वाधिकशक्तिमान प्राणी अस्ति। निजबुद्धिबलप्रभावेण प्रकृतिं जेतुं शक्नोति जयति च। तस्य प्रवृत्तिः द्विरूपा भवति–सृजनात्मिका ध्वंसात्मिका च। अद्य विज्ञानबलेन मानवः परमाणुशक्तिं प्राप्य संहारकः संजातः। क्षणेनैव सृष्टिः विकलांगा भवितुं शक्नोति। यदि मानवस्य ध्वंसात्मिका प्रवृत्तिः पूर्णतया जागृता स्यात तर्हि अद्य विश्वस्य विनाशः निश्चित एव। अतएव अणुयुद्धं न स्यादित्येव विश्वरक्षायाः उपायः अस्ति। अस्यैव सुरक्षा–प्रयासस्य फलं खलु 'संयुक्तराष्ट्रसंघः' अस्ति। द्वितीये विश्वयुद्धे विज्ञानस्य विनाशकारिणीं क्रीडां समालोक्याश्चर्यचकिता अभूवन् सर्वाणि राष्ट्राणि। सर्वेषां राष्ट्राणामन्तःकरणेषु विनाशस्य विभीषिकायाः चपल-चित्रम् अङ्कितमभून। अतः मानवतायाः संरक्षणाय विश्वशान्तिसंस्थापनाय च सर्वैः राष्ट्रैः ईदृशीमेकां संस्थां निर्मातुं विचारितं या सर्वानेवान्ताराष्ट्रीय-विवादान् शान्तिपूर्वकं दूरीकारयेत्।

गत १९१४ तमे ईशवीये वत्सरे सर्वप्रथमं विश्वयुद्धं संजातम्। अस्मात प्राक् कदापि एतादृशं महद् युद्धं नाभून। अस्य युद्धस्य संहारक-शक्तिं दृष्ट्वा सर्वे भयभीताः जाताः। अतएव विश्वस्य सर्वे राष्ट्रनायकाः युद्धनिरोधं प्रति सप्रयत्नाः अभूवन्। उक्तप्रथममहायुद्धस्य पश्चात् अमेरि-कायाः राष्ट्रपतिः 'विल्सन' महोदयः राष्ट्रसंघस्य स्थापनां कृतवान्। संसारस्य रूस, फ्रान्सादिप्रमुखाः राष्ट्राख्याः देशाः अस्य सदस्याः जाताः तथा विश्वशान्तेः प्रयत्ने संलग्नाः अभूवन्। किन्तु संघे शक्तिः एकता च नासीत। अतः स विफलः अभूत। विज्ञानस्य शक्तिः निरन्तरं वृद्धिं गता। पुनः द्वितीयं विश्वयुद्धं १९४२ तमे वत्सरे संजातः। अत्र 'अणुबमस्य' प्रयोगः अभूत्, यस्य शक्तिः प्रथमयुद्धस्य शस्त्राणामपेक्षया शतसहस्रगुणिता आसीत्। तेनैव जापानस्य 'नागासाकी' हिरोशिमा' चेति नगरद्वयं श्मशानं संजातम। अनेन संहारकमहास्त्रेण अस्त्रप्रयोगकर्तापि विस्मयं प्रापितः। संसारविनाशस्य भयात् सर्वे संत्रस्ताः अभवन्। तस्मिन्नेव वर्षे संयुक्तराष्ट्रस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
शान्तिपत्रे षड्विंशतिराष्ट्राणां हस्ताक्षराणि जातानि। १९४५ तमे वर्षे 'सेनफ्रान्सिस्को' नाम्नि नगरे एकं सम्मेलनं जातम्। तत्र षट्चत्वारिंशद् राष्ट्राणां प्रतिनिधयः सम्मिलिताः आसन्। एकपञ्चाशद् राष्ट्राणां च हस्ताक्षराणि तत्र संयुक्तराष्ट्रसंघस्य निश्चिते प्रस्तावे अभूवन्। अन्ताराष्ट्रीयसुरक्षाशान्तिश्च संघस्योद्देश्यमस्ति। राष्ट्राणां मध्ये मैत्रीभावनयाः, परस्परं राष्ट्राणामार्थिकसामाजिकसांस्कृतिकोन्नतेश्च सहयोगेन सम्पादनं च तस्य द्वितीयमुद्देश्यमस्ति।

संयुक्तराष्ट्रसंघस्य प्रमुखाः विभागाः— (१) सामान्यसभा (२) सुरक्षापरिषद् (३) संयुक्तराष्ट्रीयार्थिकसामाजिकसांस्कृतिकसंघटना (४) अन्ताराष्ट्रीयसंघटना पुनर्निर्माणं विकासकोशः कृषिसंघटना च (५) अन्ताराष्ट्रीयन्यायसभा (६) सचिवालयः इति सन्ति। सामान्यसभायाः कार्यं महत्त्वपूर्णं भवति। सुरक्षां प्रति जागरूकता समस्तसमस्यानां समाधानस्य प्रयासः, अन्ताराष्ट्रीयसम्बन्धनिर्वाहः, स्वातन्त्र्यरक्षा चास्यैव कार्यमस्ति। सुरक्षापरिषद् सुरक्षायाः दायित्वं धारयति। आर्थिकादिसंघटनेन मानवप्रवृत्तीनां निरीक्षण संचालनं च क्रियते। पुनर्निर्माणसमितिः सामान्यसभाद्वारा निर्दिष्टप्रदेशानां निरीक्षणं प्रबन्धं च करोति।

संयुक्तराष्ट्रीया सेना अपि अस्ति। या आवश्यकतायाः काले नियन्त्रणं करोति। रूसदेशः-अमेरिकेति द्वे राष्ट्रे विशेषाधिकारं (वीटो) धारयतः। अतः अनेनाधिकारेण संघस्य स्वाभाविकी व्यवस्था अवरुध्यते तथापि आभ्याम् बहूनि श्लाघ्यानि कार्याणि कृतानि।

संयुक्तराष्ट्रसंघस्य रचनायाः महद् उद्देश्यं सम्पूर्णे विश्वस्मिन् मानवतायाः संरक्षणमेवं विश्वशान्तिस्थापना च प्रधानरूपेण वर्तते। विश्वशान्तेः मार्गे समुपस्थितानां पारस्परिकविवादानां कलहानां च शान्त्या प्रशमनमेवोद्देश्यं विद्यते एकमात्रम्। 'वसुधैव कुटुम्बकमि'ति भावनायाः विस्तारं प्रचारं च पारस्परिकसहयोगेन विकासस्य प्रेरणामपि विदधाति संस्थेयम्।

विश्वशान्तिसंस्थापनायाः कार्ये संस्थेयं पूर्णप्रयत्नशीला दृश्यते। शीघ्रमेव इंगलैण्डदेशस्य एवं मिश्रदेशस्य च मध्ये स्वेजनहरस्य विषये समुपस्थितानां भयंकरकलहानां शान्तिमयी मधुरसमाप्तिः कृताऽनया। कोरियायाः विवादस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सफलनिर्णयः, एते संयुक्तराष्ट्रसंघस्य पूर्णसफलतायाः विषयाः विद्यन्ते। भारतवर्षस्य एवं पाकिस्तानदेशस्य काश्मीरसमस्यायाः समाधानेऽपि संस्थेयं पूर्णतत्परा वर्तते। वर्तमानकाले भारत-चीनसीमाविवादस्य भीषणदशायाः शान्त्यर्थं सर्वाणि राष्ट्राणि चिन्तानिमग्नानि वर्तन्ते।

संयुक्तराष्ट्रसंघः केवलमेव विश्वशान्तिस्थापनायाः कार्ये एव न क्रियाशीलः वर्तते, अपितु विश्वस्य दरिद्रतायाः विनाशाय, रोगाणां शमनाय, सर्वेषां राष्ट्राणां विकासकार्येषु अपि दत्तचित्तः विद्यते। परन्तु विश्वस्य बहवः राष्ट्रालोचकाः अस्य क्रियाकौशलेन नैव सन्तुष्टाः वर्तन्ते। तेषां विचारेऽस्यां संस्थायामपि विश्वस्य प्रभुराष्ट्राणां पूर्णप्रभुतायाः प्रभावः विद्यते। अस्य स्थायिसदस्यानां हस्तेषु वीटोऽधिकारः भवति। यस्य परिणामस्वरूपा यथार्थनिर्णयस्य शीघ्रकल्पना न संभाव्यते। यदा यथार्थनिर्णयाय एवं राष्ट्रसंघीयबलप्रयोगस्यावश्यकता प्रतिभाति तदा एते स्थायिनः सदस्याः स्वकीय 'वीटो' अधिकारस्य प्रयोगं कुर्वन्ति। एतादृशी स्वार्थपरतैव सम्पूर्णविश्वमध्ये अशान्तेः कारणमेवला वर्तते। वास्तवरूपेण संयुक्तराष्ट्रसंघस्य कल्याणमार्गे महद् उद्देश्यं वर्तते परन्तु स्वार्थपरायणानि विशालराष्ट्राणि महान्ति बाधकानि वर्तन्ते।

इदानीं भारत-चीनसीमाविवादावसरे भारतवर्षस्य प्रधानमन्त्रिणा 'श्रीपण्डितजवाहरलालनेहरू'महोदयेन संयुक्तराष्ट्रसंघस्य चित्ताकर्षणाय प्रचलितविवादस्य शान्तिपूर्णसमाधाने पूर्णः प्रयासः कृतः। यद्यपि भारत-चीनविवादस्य निर्णयः स्पष्टतरं विद्यते। सर्वाणि राष्ट्राणि यथार्थरूपेण वास्तविकीं स्थितिमनुभवन्ति परन्तु चीनदेशः संयुक्तराष्ट्रसंघस्य स्थायिसदस्यः वर्तते। फलतः संयुक्तराष्ट्रसंघस्यान्ये स्थायिनः मान्याः सदस्याः परोक्षरूपेण किं वा भारतवर्षस्य प्रधानमंत्रिमहोदयस्य समक्षे भारतीयपक्षस्य वार्तां कुर्वन्ति, परन्तु राष्ट्रसंघे निर्णयस्यावसरे मूकाः भवन्ति। स्पष्टरूपेण विद्यमानस्यात्याचारस्योपरि किमपि न कथयन्ति। इयमेव धारणा विश्वशान्तिमार्गे पूर्णरूपेण बाधिका वर्तते।

संयुक्तराष्ट्रसंघस्य महती नन्वावश्यकता प्रतिभाति अस्मिन् विश्वस्याशान्तिपूर्णे युगे। इदानीं मानवताविनाशः चरमसीमायां विद्यते। विज्ञानस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विनाशकारिणां अस्त्राणां निर्माणम् संयुक्तराष्ट्रसंघस्य विशिष्टावश्यकतां द्योतयति। परन्तु यावत सर्वाणि राष्ट्राणि संयुक्तराष्ट्रसंघस्य नियमानां हृदयेन परिपालनं नैव करिष्यन्ति तावत् कथमपि न संभाव्यते विश्वशान्तेः कल्पना।

एतत्कृते सर्वैः राष्ट्रोन्नायकैः पारस्परिकभेदभावं, शोषणस्य निकृष्ट-प्रवृत्तिं च निष्कास्य मानवतायाः कल्याणायैव शान्तिसंस्थापनाय च महान् त्यागः करणीयः, इदं तु निश्चितं स्यात् यत् वर्तमानवैज्ञानिके युगे विज्ञानस्य विनाशकारिप्रवाहस्य निवारणाय संयुक्तराष्ट्रसंघः एव समर्थः विद्यते। यदि वयं शान्तिपूर्वकं संयुक्तराष्ट्रसंघस्य नियमानपालयिष्याम तर्हि विश्वशान्तेः साकारकल्पना निश्चितमेव सफला अभविष्यत्। अनेन प्रकारेण कृते सत्येव संभाव्यते मानवतायाः संरक्षणस्य कल्पना। अधुना विश्वस्मिन् युद्धस्य निरोधेऽस्य संयुक्तराष्ट्रसंघस्य प्रयत्नः उचितः समयानु-कूलश्च विद्यते। राष्ट्रसंघस्य सम्यक्तया समुचितसंचालनेन विश्वशान्तिः निश्चिता अस्ति।

समयस्य सदुपयोगः

"समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्" इत्युक्त्य-नुसारेण समय एव मानवं सबलं निर्बलं च करोति। समयः यथा निरन्तरं गच्छति च, सः कदापि विश्रामं न करोति, तथैव मनुष्यैः निरन्तरं कार्यं कर्त्त-व्यम् अन्यथा समयः अग्रे गमिष्यति, मानवाश्च पश्चाद्गामिनः भविष्यन्ति। मृत्युः समयस्य एव नामान्तरमस्ति। अतएव कालः अपि मृत्युबोधकः भवति। अर्थात् समये आगते मृत्युः भवति। प्रत्येकवस्तुनः जीवनस्य अवधिः निश्चित-समयेन भवति। किन्तु यदि जीवनस्यावधिमुचितेन कार्यकलापेन निरन्तरं कश्चिन्नरः यापयति तदा निश्चितकाले तस्य मृत्युः भवति। सहसैव कार्यक्रमः अपि सुचारुरूपेण समाप्यते। किन्त्वसावधानतया, अनुचितरूपेण, मण्डूक-प्लुतिन्यायेन कार्यं क्रियते तदा समयः शीघ्रतया आगच्छति। अतः कार्यक्रमसमाप्तेः प्रागेव मृत्युः भवति। तस्य जीवनमपि विषमं दुःखपूर्णं च भवति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

जगति एतादृशाः अपि मनुष्याः सन्ति, ये सततं कार्यं कुर्वन्तः कदापि विश्रामं न कुर्वन्ति। ते तावता एव समयेन विपुलं कार्यं कुर्वन्ति यावता समयेन अलसाः मनुष्याः एकमपि कार्यं कर्तुं न पारयन्ति। समयः तान् अकर्मण्यान् नाशयति। तेषां नामान्यपि नाशयति। अत एवालस्यं मानवस्य महान् शत्रुः अस्ति। सत्यमप्युक्तं केनचित् कविना—

'आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥' इति।

कार्यं स्वकीयं भवेत परकीयं वा किन्तूत्साहेन विना सदैव अपूर्णमेव भवति। स्वजीवने मनुष्यः सफलतायाः प्राप्त्यर्थमुत्साहसम्पन्नः स्यादित्येव सुलक्षणम्। उद्यमसाहसधैर्यबुद्धिशक्तिपराक्रमसम्पन्नस्य पुरुषस्य देवोऽपि सदैव सहायतां करोति। एतैः षड्गुणैः पूर्णः मानवः जीवने सफलः भवति। उक्तञ्च--

'उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत॥' इति।

सद्-विचारेण, सत्पुरुषाणां संगत्या, सत्पुरुषाणां जीवनस्य मननेन च उत्साहः प्राप्यते। संसारस्यान्वेषणकर्तारः समुद्रं गाहित्वा प्राणान् संकटे-पातयित्वा च उत्साहेन विजयं प्राप्तवन्तः। हिमालयारोहिणः कियता उत्साहेन युक्ता आसन्। उपग्रहारोही वीरः 'गागरिन' नामा विचित्रः उत्साहयुक्तः अस्ति। उत्साहेन विना श्रेष्ठं कर्म कदापि न भवति। उद्योगिनं पुरुषसिंहं प्रति लक्ष्मीः स्वयम् आगच्छति। कापुरुषाः दैवस्योपरि निर्भराः सन्तः तिष्ठन्ति। ते किमपि कार्यं कर्तुं न उत्सहन्ते, अतएवोत्साह एव समस्त-सफलतायाः रहस्यमस्ति।

मानवस्य सर्वाण्यपि कार्याणि समयस्य सदुपयोगेनैव भवितुमर्हन्ति। अस्मिन् वारितरंगचञ्चलतरे जीवनेऽनन्ताः कार्यकलापाः बहवश्च विघ्नाः सन्ति। अतएव समयस्य कदापि अपव्ययः न कर्त्तव्यः। यदि कोऽपि स्वजीवने समयस्य दुरुपयोगं कुर्यात् तर्हि सः किमपि कार्यं कर्तुं समर्थः न भवेत्। मानवः नष्टान् धनादिपदार्थान् पुनः प्राप्तुं शक्नोति किन्तु नष्टः समयस्तु सर्वथा नष्ट एव। कथमपि तस्य पुनरवाप्तिः नहि संभवति।

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तथापि सर्वत्रेदं दृश्यते यत् धनस्यार्जनसमदे केनापि समयस्य सदुपयोगो न चिन्त्यते। नीतिशतके इदं कथितं यत् समयच्युतिः एव जीवनस्य महती हानिः। अतएव यावदिदं शरीरं स्वस्थमस्ति, वृद्धावस्था नायाति, इन्द्रियस्य शक्तिः न प्रतिहता तावदेव महान् प्रयत्नः करणीयः। कथितमपि केनचित् कविना—

'यावत्स्वस्थमिदं शरीरमरुजं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने न कूपखननं प्रत्युद्यमः कीदृशः ॥' इति।

विनष्टेऽपि समये कृतभूरिपरिश्रमाः अपि नराः तं प्राप्तुं न समर्थाः भवन्ति।

मन्दबुद्धयः पामरजनाः जीविकोपार्जनार्थं व्ययीकृतं समयमपि 'समयस्य सदुपयोगः' इति मन्यन्ते। अतिरिक्तसमयं प्रति ते उपेक्षावन्तः दृश्यन्ते। ते मूढजनाः इदं न जानन्ति यत् जीवनस्य प्रत्येकक्षणः जीवनयात्रायाः सफलतायै अत्यधिकावश्यकः। मनुष्येणावकाशसमयस्यापि कदापि दुरुपयोगो न करणीयः। अतिरिक्तसमयस्य सदुपयोगरूपेणैव अनेकेषां ग्रन्थरत्नानां निर्माणं विद्भिः संपादितम्। अतएव विश्वस्मिन् समयसमं किमपि अन्यद्वस्तु नास्ति। समयस्य सदुपयोगस्य विषये इदं कथितं यत् निषंगाद्विनिःसृतो बाणः मुखात् निःसृतं वचनं च यथा पुनः परावृत्य नायाति तथैव हस्तात् निर्गतस्य समयस्य येन केनापि प्रकारेण कथमपि उपलब्धिः न भवति। समयस्य प्रभावेण रङ्कः धनिकः, धनिकः दरिद्रश्च भवति। समय एव मानवं प्रत्येकावस्थायाः दर्शनं कारयति। समयस्य प्रभावात् संसारे कोऽपि न मुक्तः। अतएव यदि मानवः समयस्य सदुपयोगं कृत्वा समयानुसारेण स्वजीवनं यापयेत् तर्हि सः किञ्चिदपि कष्टं नानुभवेत्। सर्वत्र समयस्यैव गतिः परिलक्ष्यते। समयस्यायमवर्णनीयो महान् महिमा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर्मतत्त्वम्

'धर्म' शब्दमाश्रित्य विद्वद्भिः धर्मतत्त्वज्ञैः मनीषिभिः अनेकाः व्याख्याः कृताः। ध्रियते अर्थात् धारणं क्रियते स धर्मः। मनुष्यः यां धारणां विश्वासं वा कृत्वा कर्मणि प्रवृत्तः भवति साधारणरूपेण सः विश्वासः एव धर्मः कथ्यते। धर्मस्य सीमितं तात्पर्यं ज्ञात्वा प्रायेण मनुष्याः दानपूजनादिकस्यैव धर्मपदेन ग्रहणं कुर्वन्ति किन्तु तत् धर्मस्य स्थूलरूपमस्ति। वास्तविकरूपेण सत्कर्म; अथवा सदाचारस्य मूलाधारः एव धर्मः। मानवस्य जीवनं व्यवहारपूर्णमस्ति। अतः मनुष्याणां व्यवहारेषु यः उत्तमः भावः भवति तत् सर्वं धर्मस्याङ्गम्। सदसद्-विचारः एव धर्मः। अतएव स्मृतिकारैः धर्मस्य लक्षणम् एवं कृतम् —

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या बुद्धिरक्रोधो दशकं धर्मलक्षणम्॥" इति।

एते अहिंसादयः भावाः यदा मानवस्य हृदि तिष्ठन्ति तदा सः सत्कार्यं करोति। अन्यथा सः स्वार्थेन प्रेरितः अनेकान् अधर्मान् करोति। अस्मिन् भौतिकयुगे मानवाः भौतिकीमुन्नतिं कर्तुमुद्यताः सन्ति। विज्ञानबलेन ते ईश्वरमपि जेतुमिच्छन्ति। किन्तु तथापि नास्ति शान्तिः क्वचित्। एकः एकस्य स्वार्थहननं करोति। एकस्योन्नतिमन्यः न सहते। सर्वत्र चिन्ताविपन्नता, कलहश्च लक्ष्यते। धर्ममूलकभावनाया अभावः एवास्य मूलकारणम्। अस्मिन् युगे परलोकस्य चर्चा अपि मूर्खता कथ्यते। मा भवतु परलोकः। परलोकः नास्ति कश्चित् लोकः किन्तु मनुष्यजीवनस्य यत् कीर्तिक्षेत्रम् तदेव परलोकः। तस्य मरणानन्तरं तस्य सत्कार्यदुष्कार्याणां ध्यानं कृत्वा जगत् तस्य स्तुतिं निन्दां यत् करोति तदेव, परलोकः। तस्य नाम चिरस्मरणीयं विस्मृतं वा भवति तदेव परलोकः तस्मात् कारणात् सद्भावना सत्कर्म च अपेक्ष्यते। तदेव धर्मः।

मुख्यतः मनुष्याणां प्रधानं स्वार्थरूपं धर्म एव। यतः सः तस्य अन्ततः सहायतां करोति। नरस्य मनः परिष्कृतं करोति। स्त्री-पुत्रादि, धनं, शरीरं मित्राणि अत्रैव तिष्ठन्ति। यशःशरीरेण सह, धर्म एव गच्छति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतएव 'धर्मानुगो गच्छति जीव एकः' इति विचारं कृत्वा राजा दिलीपः सिंहं प्रति कथयति—

यद्यप्यहिंस्यस्तव चेन्मतोऽहं
यशःशरीरे भव मे दयालुः।
एकान्तविध्वंसिषु मद्विधानां
पिण्डेष्वनास्था खलु भौतिकेषु॥

यदि धर्मस्य रक्षा क्रियेत तर्हि धर्मोऽपि सदैव तस्य रक्षां कुर्यात् अन्यथा सः विनाशं कुर्यात्। धर्मयुद्धस्यैवान्ततः विजयो भवति। अतः "यतो धर्मस्ततो जयः" इदं सत्यम्।

प्राचीने काले यदा कोऽपि राजा नासीत्। तस्मिन् समये मानवाः स्वयं धर्मस्याचरणं तथा धर्मानुसारेण परस्परं स्वरक्षां कुर्वन्ति स्म। अस्याः अवस्थायाः वर्णनम् निम्नश्लोके द्रष्टव्यम्—

न वै राज्यं न राजासीद् न च दण्डो न दाण्डिकः।
धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम्॥

उक्तञ्च यत् "धर्मस्य त्वरिता गतिः" अर्थात् धमस्य कालः अल्पः भवति। धर्मसाधनं धर्मस्य साधना वा क्षणात् न भवति। जीवनस्य प्रारम्भात् मरणपर्यन्तं सद्भावनया यत्क्रियते तदेव धर्मरूपेण गण्यते। यतः तदेव धारणारूपेण भवति। यावज्जीवनं पापानि कृत्वा मरणकाले दाने कृते सति धर्माचरणं न भवति न वा तेन उद्धारः भवति। जीवनपर्यन्तं अहर्निशं प्रतिक्षणं यत्सद्विचारः सत्कर्म वा भवति तदेव धर्मनाम्ना कथ्यते।

धनार्जनं, सन्तानपालनं, शस्त्रशास्त्राणां अभ्यासः, पदोन्नतिः, विजयः इत्यादि तु जीवनकालस्य अंशमात्रेणापि साध्यते। किन्तु धर्मस्तु आद्यन्त-व्यापी भवति। अतएव केनचित् कथितम्—

"अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्॥"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अर्थात्–विद्योपार्जनं अर्थोपार्जनं च जीवने कदाचिदपि कुर्यात् तस्य कृते शीघ्रता नास्ति किन्तु धर्मपालनं तु आकस्मिकरूपेण क्षणाद् न भवति। अतः अल्पजीवनं ज्ञात्वा प्रारंभादेव धर्माचरणं कर्तव्यम्।

यद्यपि अस्मिन् युगे अथवा सर्वस्मिन् युगे इदं दृष्टम्, यत् रावण-कंसादयः येऽपि अधर्माचारिणः आसन् ते महाप्रबलाः धनिनः जयनशीलाश्च आसन्। अतः इति न चिन्तनीयं यत् धर्मः व्यर्थः अस्ति। रावणादीनां अन्तिमा दशा द्रष्टव्या। तया च अद्य लोकः तेषां केन रूपेण स्मरति। ते मनुष्याः, सद्वंश्याः, साक्षराः आसन्, किन्तु तेषां गणना राक्षसानां मध्ये भवति। अतएव तात्कालिकीं उन्नतिं दृष्ट्वा धर्मविरतो न भवेत्। अत्र युक्तमिदम् वचनम्—

"अधर्मेणैधते तावत ततः पापानि कुर्वते।
ततः सपत्नाञ्जयति समूलस्तु विनश्यति॥"

धर्मराजस्य विजयः विना शस्त्रग्रहणेनापि भवतिस्म, दुर्योधनस्य तु महासेनास्त्रबलसंचयेऽपि पराजयः अभवत। धर्मः अजेयः। धर्मात्मा अजेयः अमृतः च भवति धर्मपालकानां निन्दा अस्मिन् युगे भवत्येव। तान् दृष्ट्वा जनाः हसन्ति। तान् आडम्बर-विशिष्टं मूर्खं च वदन्ति। धर्मनिरपेक्ष-तन्त्रस्य घोषणा शासनेऽपि अस्ति, किन्तु तत्र धर्मनिरपेक्षस्य तात्पर्यमन्य-दस्ति। कस्यचिदपि धर्मस्य अनुगामी कोऽपि भवेत, शासने सर्वः जनः तुल्यः, इति धर्मनिरपेक्षस्य तात्पर्यमस्ति।

स्वतन्त्रे भारते जनाः यदि स्वधर्मं आश्रित्य तत्र तत्पराः स्युः तर्हि इदानीं समुचितोन्नतेः अवकाशः स्यात्।

जननी जन्मभूमिश्च

अस्मिन् जगति बहूनि बहुमूल्यानि वस्तूनि सन्ति। अन्यान्यपि सर्वोत्तमानि वस्तूनि सन्ति। परन्तु सर्वेषां बहुमूल्यवस्तूनां मध्ये माता मातृभूमिश्चैव एते द्वे श्रेष्ठे। अतः सत्यमेवोक्तम्—'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।' इति। बालकान् प्रति मातृणाम् सहजः सरलः स्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाविकश्च स्नेहः भवति। एतादृशः स्नेहः कुत्रापि नावलोक्यतेऽस्माभिः। जननी पुत्राणां कृते स्वकीयं सर्वस्वमपि त्यक्तुं शक्नोति। जनन्याः सर्वदा एव इयमिच्छा भवति यन्मम पुत्रः सुखी, गुणवान्, विद्वान् एव भवतु। तथा सर्वेषां जनानां मध्ये अग्रगण्यो भवतु। माता महत्कष्टमविगणय्य बालकस्य सुखं चिन्तयति। अतः पुत्रस्यापि कृते मातुरधिकं न किमपि वस्तु पूजनीयं वर्तते। माता एव श्रेष्ठानामपि श्रेष्ठा, पूज्यानामपि पूज्यतमा। अतएवोक्तं उपनिषदि—'मातृदेवो भव' इति। मानवः कदाचिदपि मातुरनृणतां दूरीकर्तुं न शक्नोति। अतएवोक्तं—

'यं मातापितरौ क्लेशं सहेते संभवे नृणाम्।
न तस्य निष्कृतिः कर्तुं शक्या वर्षशतैरपि॥' इति।

असारे संसारे सर्वे अलभ्या अपि पदार्थाः परिश्रमेण लब्धुं पार्यते। परन्तु जननी, जन्मभूमिः, जनकः, सहोदरभ्राता च अतीव दुर्लभः। धनं विनष्टमपि प्रयत्नेन प्राप्येत। गतं यौवनमपि ओषधिप्रयोगेण प्राप्तुं शक्यते। परन्तु माता, पिता, जन्मभूमिश्च न केनाऽपि प्राप्यते। अतएवोक्तं केनचित्कविना—

'जननी जन्मभूमिश्च जाह्नवी च जनार्दनः।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः॥' इति।

कदाचित पुत्रोऽपि कुपुत्रो भवेत परन्तु माता कुमाता कदापि न भवेत्। सर्वे महामान्याः पुरुषाः मातृभक्ताः आसन्। मातुः आशिषं प्राप्य श्रवणकुमार–नेपोलियननामकवीर–गुरुदास–शंकराचार्यप्रभृतयः महत्कार्यं कृतवन्तः। एते परममातृभक्ताः आसन्।

जननीवत् जन्मभूमिरपि प्राणेभ्योऽपि प्रियतमा तथा स्वर्गादपि गरीयसी। यो मानवः यत्र जन्म लभते सैव तस्य जन्मभूः कथ्यते। यत्र कुत्राऽपि गतो मानवः स्वकीयायाः प्राणेभ्योऽप्यधिकप्रियतमायाः जन्मभूमेः सर्वदैव स्मरेच्चेत तर्हि तत्र विदेशे सुखादप्यधिकं सुखमादरं यशश्च प्राप्नुयात्। तत्रत्याः सर्वे मानवाः तस्यादरमपि कुर्वन्ति। परन्तु तस्य हृदये मातृभूमिदर्शनस्याभिकांक्षा सर्वदा जागर्त्येव। सः सदा चिन्तयत्येव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

"कदाहं स्वदेशं गत्वा स्वकीयां सस्यश्यामलां पवित्रां मातृभूमिं द्रक्ष्यामि।" इति। अतिसुन्दरा कस्यचित् देशभक्तस्य उक्तिरियम्—

"अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम्।
रमते न मरालस्य मानसं मानसं विना॥" इति।

यद्यपि स्वर्गे सर्वाणि सुखसाधनानि विद्यन्ते तथापि तत्र स्थिताः देवाः अपि पुनः स्वजन्मभूमौ भारते जन्म प्राप्तुमिच्छन्ति। स्वमातृभूमेः यशोगानं देवाः अपि कुर्वन्ति। यथा—

"गायन्ति देवाः किल गीतकानि,
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते,
भवन्ति भूयः पुरुषाः सुरत्वात्॥" इति।

भारतवर्षम् अस्माकं जन्मभूमिः। अयमेवास्माकं देशः। अस्य कृते सर्वेषां हृदये सम्मानः आदरश्च भवति। भगवान् विष्णुरपि अवताररूपेणात्र पुनः पुनः आगच्छति। मातृभूमेः महिम्नः वर्णनं कर्तुं न केनाऽपि शक्यते। क्षुद्राणां महतां वा हृदये स्वमातृभूमेः प्रेम समानरूपेण वर्तते। भारतीयेषु स्वदेशाभिमानः आसीदस्ति च। अस्माभिरपि देशभक्तैः भाव्यम्। देशस्य चोन्नतिः करणीयेति उद्देश्यं च करणीयम्। अपि चेदं ध्येयम्—

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥" इति।

बुद्धिर्यस्य बलं तस्य

अस्मिन् संसारे ईश्वरः सर्वान् मनुष्यान् उत्पाद्य तेषां शरीरेषु बलं बुद्धिश्चेति शक्तिद्वयं दत्तवान्। इदं शक्तिद्वयं सर्वेषु प्राणिषु समानं न भवति। मनुष्याणामपेक्षया अल्पप्राणिनां बुद्धिः क्षीणा, हीना, निकृष्टा च भवति। शारीरिकं बलं तु मनुष्यापेक्षया केषाञ्चिद् जन्तूनामधिकं भवति, यथा गज-सिंह-महिष-वृषभादिषु। मनुष्याणामपि मध्ये केचन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बलशालिनः किन्तु मन्दबुद्धयः, केचन निर्बलाः किन्तु कुशाग्रबुद्धयः भवन्ति। परन्तु अस्मिन् संसारे बुद्धिमन्तो नराः एव महान्ति कार्याणि कर्तुं प्रभवन्ति। आप्राचीनकालात् यानि महत्त्वपूर्णानि कार्याणि अभूवन् तानि सर्वाण्यपि पण्डितैः सम्पादितानि विद्यन्ते। अतः बुद्धिबलयोः तुलनायां बलापेक्षया बुद्धिः विशिष्टास्ति। अस्या एव प्रतापेन मानवः सर्वेषां जन्तूनामुपरि शासनं करोति, कस्यापि कार्यस्य सम्पादने बुद्धिरेव प्रधानभूतं साधनम्। बुद्धिहीनः मनुष्यः किमपि कार्यं कर्तुं न समर्थः भवति। यस्यास्ति बुद्धिः तस्यैव बलमत्र सिंहशशकयोः कथा प्रसिद्धा एव। यत्र बुद्धिबलेन शशकः सबलं सिंहं कूपे पातयित्वा नाशितवान्। अतएवोच्यते—

'बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥' इति।

इयं तु पशुद्वयस्य तुलना। मनुष्यस्तु पशून् विनिर्जित्य मानवं जेतुं समर्थः बभूव। महाराजः शिववीरः बुद्धिबलेनैव अफजलखानं तस्य वक्षःस्थलं विदार्य मारितवान्—

अस्मिन युगे तु मानवः स्वबुद्धया प्रकृतिं वशीकर्तुं चेष्टते। अधिकांशतः वशेऽपि कृतवान्. अधुना यानि नूतनानि टेलीफोन-टेलीग्राम-रेडियो-विद्युत्-वायरलेस-एरोप्लेन-टैंक-टेलीविजनादीनि निर्माय परमाणुविस्फोटकं हाइड्रोजन बमं तदुपरि उपग्रहं, राकेटं च रचितवान्। स इदानीं चन्द्रमसि मंगलग्रहे च वासं कर्तुमिच्छति। श्रूयते यत् तत्र बहवो जनाः स्वनिवासाय भूमिं क्रीणन्ति। अस्माकं पूर्वजास्तु सर्वत्र गन्तुं समर्थाः आसन्। सूर्य-चन्द्र-मंगल-बुधादिभिः अखिलग्रहैः सह तेषां सम्बन्धः आसीत्। तिरस्करिणी अर्थात् अन्तर्धानकरी विद्या तथा अन्याश्च विविधा विद्याः तेषां करे आसन्। इदं सर्वं बुद्धिकौशलमेव यत् श्रीकृष्णः शस्त्रहीनः सन्नपि सर्वान् कौरवान विपक्षीयांश्च पराजितवान्। चाणक्य एकाकी रिक्त-हस्तः नवनन्दान् तथा महानन्दसचिववरं च विजितवान्। अस्थिमात्रावशेषः महात्मा गान्धिः गौराङ्गशासनं भारतभूमितः दूरीकृतवान्। किमेतत। इदं बलस्य समक्षे बुद्धेर्विजयः। यथा मनुष्यः बुद्धिबलेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बलिष्ठान् सिंहादीन् स्ववशे कृत्वा नर्तयति तथा मानवानपि नर्तयति। मेधावी पुरुषः शासकानपि शास्ति, क्रूरानपि वशीकरोति, विरुद्धानपि रञ्जयति, असम्भाव्यानपि सम्भाव्यान् करोति। अवर्णनीयोऽयं बुद्धिप्रभावः।

चाणक्यः मुद्राराक्षसे वदति यत् मम सर्वं विपरी भवतु किन्तु समस्त-साधनस्वरूपा कृत्येषु सदसद्विवेकिनी–नीरक्षीरविवेकिनी बुद्धिस्तु मा गात् मम पार्श्वतः। अर्थात् मदीया बुद्धिः यदि मम पार्श्वे भवेत् तदाऽहं सर्वं कर्तुं शक्नुयामिति तत्तु सत्यमेव तस्य प्रत्यक्षमुदाहरणं दरीदृश्यते। वस्तुतः बुद्धिरेव मानवं समुद्धरति। दुर्बुद्धियुक्तः मनुष्यः सदैव अन्धतमसे पतति। इह लोके तु बुद्धिः सर्वं साधयत्येव परलोकसाधनेऽपि सा सहयोगं ददाति। बुद्धेः परं परमात्मा एव नान्यत् किंचित्। अतएव श्रीमद्भगवद्गीतायां कथितं भगवता श्रीकृष्णेन—'यो बुद्धेः परतस्तु सः'। इति। अन्ततो गत्वा हि स्थिरधीः भूत्वा मानवः मोक्षं प्राप्नोति एवं सर्वं लौकिकं पारलौकिकं साफल्यं बुद्धिबलेनैव प्राप्यते नान्यथा। अतएव मनीषिणः महर्षयः श्रेष्ठां बुद्धिं भगवन्तं केवलं याचन्ते—'धियो यो नः प्रचोदयात्'; तथा यां मेधां देवगणाः पितरश्चोपासते तया मामद्य मेधया अग्ने मेधाविनं कुरु'। सद्भावना सद्बुद्धिः लोककल्याणं करोति। कुशाग्रबुद्धयः एव नेतारः राष्ट्रोन्नतिं कर्तुं शक्नुवन्ति विजयं च लभन्ते। अतः सत्यमेव 'निर्बुद्धिः क्षयमेति', 'बुद्धिर्यस्य बलं तस्य' इति।

सत्यान्न प्रमदितव्यम्

असारे मायाभ्रमभ्रमितेऽस्मिन् जगति बहूनि वस्तूनि सन्ति, बहवो जनाश्च सन्ति, ते सर्वे जनाः स्वस्मै सर्वं सुखमिच्छन्ति। परन्तु केनोपायेन सुखं प्राप्येत इत्यविचार्य एव इतस्ततः मृगमरीचिकायामेव जलमन्विष्यन्तः मृगा इव सांसारिके वञ्चनामये लोभमये वस्तुनि एव सुखं सारवस्तु च अन्विष्यन्ति। किन्तु अस्मिन् जगति परत्र च सुखकामेन सत्यमाश्रयणीयम्। सत्यमेवैकं साराख्यं वस्तु। सत्येन विना सर्वं शून्यम्। अस्मच्छास्त्र-पुराणेषु धर्मग्रन्थेषु वेदेषु च सत्यस्य एव माहात्म्यं सर्वत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गीयते। अतएव 'सत्यमेव जयते नानृतमि'ति उद्घोषयन्ति शास्त्राचार्याः धर्माचार्याश्च। सते हितं सत्यं भवति। यल्लोकहिताय भवति तत् सत्यम्। यद्वस्तु वर्तते तस्य तथैव कथनं, लेखनं, प्रकाशनं वा सत्यमित्युच्यते। जिह्वायाः सदुपयोगः सत्यभाषणेनैव भवति। सत्यं सर्ववचसां भूषणमत-एवोक्तम्—

'सूनृतं सर्वशास्त्रार्थ-निश्चित-ज्ञान-शोभितम्।
भूषणं सर्ववचसां लज्जेव कुलयोषिताम्॥' इति।

सत्यस्य माहात्म्यं नहि केवलमार्यधर्मे अस्ति अपितु अन्येष्वपि धर्मेषु वर्तते। अस्माकं शास्त्रपुराणानि तु उच्चस्वरेण कथयन्ति—"सत्यं वद"; "सत्येन पन्था विततो देवयानः", "समूलो वा एष परिशुष्यति योऽनृतमभिवदति" इति। यादृशं सत्यस्य माहात्म्यं न तादृशमस्ति अन्यस्य कस्यापि वस्तुनः। सत्येनैव अस्माकं समाजस्य, राष्ट्रस्य, देशस्य, संसारस्य च स्थितिः। सत्यभाषणेनैव बहवो राजानः अमराः बभूवुः। हरिश्चन्द्रो नाम भूपतिः सत्याय नहि केवलं स्वकीयं सर्वं धनं अपितु राज्यं च दत्तवान् अन्ते स्वां पत्नीं पुत्रं शरीरं च कस्यचन चाण्डालस्य हस्ते विक्रीतवान्। अनेकविपत्तिराशिमवलोकयन्नपि सः स्वप्नेऽपि सत्यं न विजहौ। अस्मादेव तस्य विपुला कीर्तिः अद्यापि विद्योतते। अस्मादेव सत्यस्य अश्वमेधसहस्रादपि अधिकं महत्त्वं वर्तते। यथोक्तं—

'अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥' इति।

प्राचीनकाले मौर्यवंशावतंसः अशोको नाम महान् चक्रवर्ती भूपतिरभूत्। सः स्वप्रजायाः भूत्यर्थं सत्यस्य प्रचारार्थं च प्रसिद्धेषु नगरेषु शिलास्तम्भा न्निर्माय तस्योपरि सत्यस्य महिमानं लेखयामास। सत्यवादिनः सर्वैः पूज्यन्ते। असत्यभाषणशीलस्य सर्वत्र निन्दा भवति। अतएवासत्यभाषणे पापं वर्तते। इदमेव कारण यत् सर्वेषु शास्त्रेषु असत्यभाषणं हेयं निन्दितं पापयुक्तं चास्ति। सत्यभाषणेन वयं निर्भीकाः भवामः। असत्यभाषणेन वयं निर्भीकाः भवामः। असत्यभाषणेन सर्वत्र नरस्य निन्दा भवति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अतः निश्चितं यत् असत्यभाषणात् कस्यापि प्रतिष्ठा गौरवं यशश्च न वर्धते। सत्यव्रतः कस्मिंश्चिदपि पापे न प्रवर्तते। स विचारयति यद्यहमसत्यं वदेयम् तदा सर्वेषामविश्वासपात्रं भवेयम्। ममोपरि कोऽपि विश्वासं न करिष्यति। यथा एकः बालकः कस्मिंश्चिद् वने गामजां च धारयति स्म। एकदा तस्य मनसि इदमायातं यत् किमेते पुरुषाः मद्वचनं श्रुत्वा इतः आगमिष्यन्ति न वेति विचार्य तारस्वरेण शब्दमकार्षीत्-'भो भो मानवाः वृकः आयातः, वृकः, आयातः मां रक्ष रक्ष' इति पुनः पुनः व्याजहार। तद्वचनं श्रुत्वा बहवो मनुष्याः स्वकीयानि सर्वाणि कार्याणि विहाय तत्रागतवन्तः। परन्तु तत्र न कञ्चिद्वृकमवालोकयन्, उक्तञ्च 'कुतो वृकः कुतो वृकः' इति श्रुत्वा तेनोक्तम्—परीक्षणाय एव मया शब्दः कृतः। अनया रीत्या द्विवारं त्रिवारं तेन शब्दः कृतः। एवं व्यतीते काले सत्यमेव एकस्मिन् दिने वृक आयातः एव। तं दृष्ट्वा सः शब्दं कृतवान्। परन्तु कोऽपि नायातः। पश्चात् सः तेन वृकेण भक्षितः। इदमेवासत्यभाषणस्य फलम्।

सत्यभाषणेन महाराजो दशरथः अमरत्वं प्राप्तवान्। सत्यस्य पालनाय एव प्राणेभ्योऽपि प्रियं पुत्रं वनं प्रेषयामास, स्वप्राणानत्यजत परन्तु सत्यं न तत्याज। युधिष्ठिरः सत्यभाषणबलेनैव विजयं लेभे। महात्मा गान्धिः ईसामसीह प्रभृतयः सत्यस्य पालनार्थमेव स्वप्राणानत्यजन्। एतेषां महाभागानां सिद्धान्तः आसीत 'नहि सत्यातः परो धर्मो नानृतात् पातकं महत्।' ते विश्वसन्ति सत्यमेवेश्वरः। सत्यभाषणेन भगवतः प्राप्तिः भवितुमर्हति। सत्यस्य महिमा न केनापि गातुं शक्यते। सत्यस्य प्रतिष्ठया एव सर्वं भवितुं शक्यते। अतएवोच्यते—'सर्वं सत्ये प्रतिष्ठितम्।' सत्यमुक्तं महाकविना व्यासेन—

'सर्ववेदाधिगम्यं यत् सर्वतीर्थावगाहनम्।
सत्यं च वचनं राजन् समं वा स्यान्न वा समम्॥
नहि सत्यसमो धर्मो न सत्याद् विद्यते परम्।
नहि तीव्रतरं किञ्चिदनृतादिह विद्यते॥ इति।

अतः उपनिषदामयमुद्घोषः मां जनान् च मुहुर्मुहुः प्रेरयतु 'सत्यान्न प्रमदितव्यम्।' इति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

संस्कृतभाषाया रक्षा वृद्धिश्च आवश्यकी

इयं मदीया संस्कृतभाषा अस्माकमतीतेन सह सम्बन्धं द्रढयति। प्राचीनकाले अस्माकं देशे संस्कृतभाषा लोकभाषा आसीत्। इयं नहि केवलं भारतस्यैवापि तु अन्येषां देशानामपि मातृभाषा आसीत्। अद्यापि विदेशस्य विभिन्नदेशेषु संस्कृतस्य बहवः शब्दाः प्रचलिताः, सर्वे विदेशीयाः अस्याः भाषायाः सम्मानं कुर्वन्ति। गुप्तकाले अस्याः समृद्धिः आसीत्। संस्कृतभाषायाः सर्वे कालिदास-भारवि-माघादयः कवयः अस्मिन्नेव काले स्वस्वमहाकाव्यान्यरचयन्। गौराङ्गशासकानामागमनात्पूर्वं संस्कृतभाषायाः पठनं पाठनं समस्ते देशे आसीत। लक्षाधिकाश्च छात्राः संस्कृतस्याध्ययनं कुर्वन्ति स्म। इदमेव कारणं यत् संस्कृतभाषा स्वयमेव सरला सुमधुरा सुललिता च वर्तते। अस्यां सर्वेषां कृते सर्वा सामग्री उपलभ्यते। वयं चतुर्विधपुरुषार्थानां ज्ञानं संस्कृतेनैव प्राप्तवन्तः। संस्कृतभाषायां मानवजीवनस्य सर्वेषामंगानामादर्शाः नवीना नवीना विद्यन्ते। सकलशास्त्राणां राजनीति-दण्डनीति-साहित्या-र्थनीतिशास्त्राणां मौलिकानि तत्त्वानि संस्कृतभाषायां सन्ति। संस्कृतवाङ्मयं विलोक्य प्रतीयते यत् प्राचीनकालेऽस्माकं संस्कृतिः अतिसमृद्धिशक्तिपरिपूर्णा आसीत्। ज्ञानवन्तः सन्तोऽपि जनाः शान्तिप्रियाः आसन्। ते मनुष्याः नहि केवलं स्वदेशे अपितु निखिलस्य विश्वस्य कृते शान्तिसंदेशं प्रापयन्त आसन।

यद्यपि सम्प्रति विदेशेषु विज्ञानस्योन्नतिः सर्वत्रावलोक्यते। परन्तु कुत्रापि शान्तिर्नास्ति। पुरा सर्वासु कलासु दक्षाः अपि जनाः शान्तिप्रियाः आसन्। अस्यां संकीर्णता नासीत्। अत्र तु नास्तिकेभ्योऽपि स्थानमासीत्। इयमेवास्त्यस्माकं निधिः। इयं चास्माकीनायाः सभ्यतायाः संस्कृतेश्च प्रतीकमस्ति। अस्य निधेः सुरक्षा कर्त्तव्या। इयं भाषा सर्वविधदोषशून्या। संस्कृतसाहित्यं भारतस्य गौरवमुद्घोषयति। तत् समस्तं देशं चैकस्मिन् सूत्रे एव बध्नाति। अतः नहि केवलमद्य संस्कृतस्य रक्षणमेवास्माकं कार्यमपि तु अस्य दृढीकरणमप्यावश्यकम्। इदानीं स्वतन्त्रो भारतदेशः वयं स्वतन्त्राः। भारतीयानामेव शासनमस्ति। भारतीयसंस्कृतेः आधारः संस्कृतमेव। अतः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

संस्कृतस्य रक्षणार्थं वृद्ध्यर्थं चोपायाः कर्त्तव्याः। ते च कतिचिद्धोलिखिताः।

संस्कृतज्ञाः मिलित्वा स्थाने स्थाने परिषद्-सभा-गोष्ठी-भाषणसम्मेलनानां चायोजनं कुर्युः। तत्र विचारविमर्शं कृत्वा योजनां योजयेयुः। ये च नवीनाः लेखकाः वक्तारः भवेयुस्तेषां कृते पुरस्काराणां प्रबन्धः भवेत, उत्साहवर्धनं च तेषां कर्त्तव्यम्। संस्कृते सरलानां नाटकानां निर्माणं कृत्वा समाजे समाजे तस्य प्रदर्शनं कार्यम्। पाठशालासु विद्यालयेषु च पाठ्यपुस्तकानां नवीनदिशा चयनं निर्माणं च भवेत्। प्रारम्भिककक्षाणां कृते सरलगद्यपद्यानां रचना भवेत्। भाषायाः व्याकरणदृष्ट्या शब्दसमूहदृष्ट्या च सरलीकरणं कुर्यात्। सरलीकरणे सति मानवाः तस्याः भाषायाः सरलरूपमेवाध्ययनं करिष्यन्ति। यद्वस्तु सुकरोपायेन साध्यं भवति तत्र सर्वेषां प्रवृत्तिः भवति। सरलीकरणे संस्कृतस्य व्यापकः प्रचारः भविष्यति। तस्य कृते समाचारपत्रेषु मासिक-साप्ताहिकपत्रिकासु संस्कृताय स्थानं दातव्यम्। शासनसूत्रेण संस्कृतस्य रक्षा वृद्धिश्चाधिकारिकरूपेण यदि स्यात्तर्हि लघुप्रयासेनैव सर्वं सिद्ध्येत्। जीर्णशीर्णपाठशालानां समुद्धारं कृत्वा तासां व्यवस्था सुघटिता कर्त्तव्या। अध्यापकानां वेतनवृद्धिश्चांशतोऽवश्यं करणीया। वेतनस्य न्यूनतावशात् पूर्णमनोयोगेन पाठनं न भवति। संस्कृतस्याध्ययनमुच्चतरमाध्यमिककक्षासु आवश्यकमनिवार्यरूपेण तथैव सर्वमहाविद्यालयविश्वविद्यालयेषु तस्य अनिवार्यता आवश्यकी। विभिन्नस्थानेषु प्रतियोगितापरीक्षास्वपि संस्कृतस्य महती आवश्यकता। राष्ट्रसत्तायाः सहयोगः अत्र नितरामपेक्ष्यः। शिक्षाविभागेऽन्यराजकीयसेवाविभागे च संस्कृतच्छात्राणां प्रवेशः भवेत्। अनेन प्रकारेण संस्कृतस्य रक्षा वृद्धिश्च सरलया रीत्या भविष्यति। अस्मिन् युगे यदि अस्याः भाषायाः उन्नतिः न स्यात् तर्हि अस्माकमादर्शः भारतीयानामुज्ज्वलचरित्रं पतनान्धकारस्य गर्त्ते पतिष्यति।

राष्ट्रभाषासंस्कृतम्

अस्मिन् स्वतन्त्रे भारते बहवः समस्याः सन्ति। अन्नस्य समस्या, उद्योगस्य समस्या, आर्थिकी समस्या, तथैव आसां समस्यानां मध्ये

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकताविधायिन्याः भाषायाः अपि समस्या स्वतन्त्राणामार्याणां सम्मुखेऽधुना जटिलत्वेनैव वर्तते। 'अस्य देशस्य का भाषा राष्ट्रभाषा भवितुमर्हति' इति विवादास्पदमयं विषयः। यद्यपि हिन्दीभाषा राष्ट्रभाषात्वेन समुद्घोषिता तथापि एतादृशाः बहवः प्रान्ताः सन्ति। यत्रत्याः जनाः हिन्दीं राष्ट्रभाषात्वेन न स्वीकुर्वन्ति, किन्तु संस्कृतस्य राष्ट्रभाषात्वे ते प्रसन्नाः। ते कथयन्ति यत् भारते बह्व्यो भाषाः सन्ति, यथा तामिल-तेलगु-कन्नड-मलयालम्-बंगलाप्रभृतिभाषाणां साहित्यं हिन्दीसाहित्यापेक्षया समृद्धम् तथा एताः भाषा ज्ञानविज्ञानविषयेषु अपि समृद्धाः। अतः 'एतासु भाषासु मध्ये का राष्ट्रभाषायै योग्ये'ति विचारास्पदम्। सम्प्रति बहुवादविवादानन्तरमिदमेव समीचीनं प्रतिभाति यत् हिन्दीं संस्कृतञ्च विहाय नास्ति काचिदन्या भाषा या भारतस्य राष्ट्रभाषात्वप्राप्तये योग्या भवेत्। यतो हि अन्याः याः भाषाः सन्ति ताः सर्वाः अपूर्णाः एकदेशीयाः अल्पभाषीयाश्च सन्ति। सम्प्रति ये जनाः हिन्दीभाषां न जानन्ति अथवा वक्तुं न शक्नुवन्ति ते अहिन्दीभाषाभाषीयाः जनाः उत्कटरूपेण हिन्द्याः विरोधं कुर्वन्ति। एतादृशस्य बृहत्तरदेशस्य मध्ये यत्र अनेकभाषाभाषिणः निवसन्ति तत्र सैव राष्ट्रभाषा भवितुं योग्या यस्याः भाषायाः साहित्यं विशालं व्यापकञ्च स्यात्। तथा या संस्कृता परिमार्जिता महत्त्वशालिनी नानालंकारविभूषिता सरला रम्याऽभिरामा च स्यात्। साहित्यमेव भाषायाः गुणदोषान् परिचाययति। उपयुक्तैः एभिः गुणैः अलंकृता भाषा संस्कृतं विहाय नान्या काचित्। अभिरामत्वं तु अस्याः प्रसिद्धमेव। संस्कृतभाषायाः काव्यानां ललितकोमलकान्तपदावली सहसैव इषुरिव विदग्धजनेषु सहृदयहृदयेषु प्रविश्य ब्रह्मानन्दसहोदरमानन्दं समुत्पादयति। भारतीया समस्ता, सामाजिकी, आर्थिकी, राजनीतिशास्त्रसम्बन्धिनी व्यवस्था आसु भाषासु रचितेषु ग्रन्थेषु उपलभ्यते। सम्यक्तया अस्याः ज्ञानेन विना अस्मदीयाः पूर्वजाः कीदृशाः आसन्, कीदृशी अस्माकं संस्कृतिः आसीत्, का शासनप्रणाली पुरा भारते चासीदिति न ज्ञातुं शक्यते। विश्वस्य सकलासु भाषासु प्राचीनतमेयं संस्कृतभाषा। विश्वस्य सकलाः भाषाः अस्या एवोत्पन्नाः। इयं तु सर्वासां भाषाणामुत्पादयित्री जननीव। अस्या उपेक्षणादेव सम्प्रति देशे उच्छृङ्खलता, अनुशासनहीनता,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भ्रष्टता चोपस्थिताः। पाश्चात्त्यवासनावासिताः केचन भारतीयाः जनाः अपि संस्कृतभाषा 'मृतभाषा' इति कथयन्ति। ते न विचारयन्ति यदीयममरभाषा देववाणी सा कथं मृतभाषा भवितुमर्हति। वस्तुतः—

न वेत्ति यो यस्य गुणप्रकर्षं
स तं सदा निन्दति नात्र चित्रम्।
यथा किराती करिकुम्भजातां
मुक्तां परित्यज्य बिभर्ति गुञ्जाम्॥

यथा किराती अज्ञानवशात् गजकुम्भसमुत्पन्नाममूल्यमुक्तां विहाय गुञ्जाफलं चिनोति तथैव तेऽपि जनाः संस्कृतभाषायाः महत्त्वम् अविचार्य तां भाषां 'मृतभाषा' इति कथयन्ति। ते इदं न जानन्ति यत् इयं संस्कृतभाषैव तेषां गौरवमस्ति।

संस्कृतभाषा व्यवहारे सरला सर्वसाधारणगम्या। एतादृशाः बहवः शब्दाः व्यावहारिकभाषायां प्रचलिताः। येनावगम्यते यत् प्राचीनकाले इयं व्यावहारिकी भाषा आसीत्। सर्वे जनाः संस्कृतं वदन्ति स्म। यथा अशुद्धप्रयोगं श्रुत्वा कथयति भारवाहकः—

"स्कन्धं न बाधते राजन् यथा बाधति बाधते" इति। अतः इत्थं प्रतीयते यत् अन्यबहुभाषाविज्ञोऽपि यदि संस्कृतविहीनः आसीत् तदा तस्य गणना मूर्खेष्वेव भवति स्म। यथा कथितं केनचित् कविना—

अंगीकृताः कोटिमिताश्च भाषा
नांगीकृता देवगिरा च येन।
न शोभते तस्य मुखारविन्दं
सिन्दूरबिन्दुर्विधवाललाटे॥

संसारेऽस्मिन् सर्वमपि प्राचीनं साहित्यं संस्कृतभाषायामेव प्राप्यते। सर्वप्राचीनाः अस्मद्-भारतीयानां गौरवस्वरूपाश्चत्वारो वेदाः। सर्वे प्राचीनग्रन्थाश्चास्यामेव सन्ति। भारतीयदर्शनानां रचनाः संस्कृतभाषायामेव विद्यते। भारतवर्षस्यान्यभाषाणां लिपिरपि संस्कृतलिपितुल्या। बह्वयो भाषाः सन्ति यासां लिपिः नागरीतुल्या। एभिः कारणैः यदि संस्कृतभाषा देशस्यास्य राष्ट्रभाषा समुद्घोषिता चेत् तर्हि महाँल्लाभः संजायेत। यदि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
अस्य भारतस्य प्राचीनसंस्कृतेः, धर्मस्य, आर्याणां पूर्वजानां च गौरवस्य रक्षा आवश्यकी तर्हि संस्कृतस्य प्रचारः आवश्यकः। अधुना केवलमेव इयं संस्कृतभाषैव भारतस्योन्नतिं कर्तुं समर्था दृश्यते।

विद्या

'विद्या' शब्दस्य 'ज्ञानम्' अर्थः। 'विद्' ज्ञाने इति धातोः रूपमेतत्। ज्ञानं च लौकिकमलौकिकं चेति द्विविधं भवति। तयोरेव पराविद्या अपराविद्या इति नाम्नी स्तः। सम्पूर्णं वेदसाहित्यं 'पराविद्या' इति नाम्ना कथ्यते। अन्यत सर्वं ज्ञानं पराविद्यायाः विपरीता 'अपरा विद्या' भवति। लौकिकी विद्या यथा-भूगोल-खगोल-विज्ञान-साहित्य-राजनीति-शिल्प-वाणिज्य-शस्त्रादीनां विद्या 'अपरा विद्या' अस्ति। कोऽपि मानवः निरन्तरमभ्यासात द्वयोः विद्ययोः लोकद्वये साफल्यं प्राप्नोति। अपराविद्यायाः 'अविद्या' इत्यपि नाम अस्ति। विविधशास्त्राणां विद्या 'अविद्या' इति नाम्ना कथ्यते। एवं रीत्या अविद्या विद्या चेति भेदज्ञानस्य इदं मूलस्रोतः साधनञ्च। एकेन सत्यासत्यस्य ज्ञानं भवति, द्वितीयेनापवर्गः प्राप्यते। अतएवोक्तम्—

"अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते"

संसारे एव मानवः स्व जन्म गृह्णाति। अतएव तस्य कृते सांसारिकं ज्ञानञ्चावश्यकम्। अस्मिन् लोकेऽपरां विद्यां पठित्वा नरः सृष्टेः कलायाः विज्ञानस्य च सम्पूर्णं रहस्यं जानाति। तद् ज्ञानं प्राप्य सः जीवने पूर्णतां प्राप्नोति। अक्षररूपिणी विद्या हस्तकार्याभ्यासयुक्ता विद्या वा भवेत्। सर्वा एव विद्या जीवनस्य कृते साफल्यं ददाति। विद्याया व्यापकरूपस्य दृष्ट्या सर्वे किञ्चित् तु जानन्त्येव। किन्तु यः नरः कस्मिंश्चित् शास्त्रे पारंगतः भवेत् स एव विद्यावान विद्वान् वा कथ्यते। सकलविद्यायाः प्रभावेण तस्य मस्तिष्कं पूर्णं परिष्कृतञ्च संजायते। अनेनैव विचारेण कथितम्—

"स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।" इति।

राजा सर्वथा मूर्खो न भवति किन्तु सः राज्यसम्बन्धेन राजा अस्ति। तेन रूपेण तस्य सम्मानं केवलमेव तस्य राज्ये एव भवति। सर्वे राज्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निवासिनः एव तस्य सम्मानं कुर्वन्ति। किन्तु यदि स विद्वान् अस्ति तदा राज्यात् बहिः विद्याबलेन तस्य सम्मानं भवति न तु राज्यबलेन।

विद्यया हृदये मनसि मस्तिष्के वचसि च प्रकाशः भवति। ज्ञानं नास्ति स्थूलं वस्तु। यथा स्वर्ण–वस्त्र–भूमि–गृह–द्रव्यादयः प्रत्यक्षमादानप्रदानयोः विषयाः, न तथा विद्या। ज्ञानस्य आदानप्रदानं कोऽपि मनुष्यः द्रष्टुं समर्थः न भवति। अतएव विद्यां न चौराः हर्तुं शक्नुवन्ति, न राजा ग्रहीतुं शक्नोति, न बान्धवाः विभक्तुं शक्नुवन्ति, न सा व्ययेन नश्यति, किन्तु वर्धते एव। अतः "विद्याधनं सर्वधनप्रधानम्" इति कथ्यते। इदममूल्यं धनं नीचादपि ग्राह्यम्।

यथा धनात् मनुष्याः स्वजीवने विविधान् भोगान् सुखानि च प्राप्नुवन्ति तथैव विद्याधनादपि। विद्या मनुष्याय विनयं ददाति। विद्याधनं विशिष्टमस्ति। एतद् धनं गुप्तं भवति। कश्चिद् द्रष्टुं न शक्नोति। कुरूपोऽपि विद्वान् सुन्दरपुरुष इव आदरं प्राप्नोति। विद्याधनेन धनस्यार्जनमपि भवति। राजानः श्रेष्ठिनः विद्वांसं पूजयन्ति धनेन तं तोषयन्ति च। विद्वान् पुरुषः कस्यापि राज्ञः राज्ये सम्मानं यशः धनञ्च प्राप्नोति। अनेन प्रकारेण विद्वान् पुरुषः सर्वान् भोगान् सुखानि च सरलतया प्राप्नोति। विद्यया यशः प्राप्यते, विद्या सर्वेषां गुरुः अस्ति। यदि कश्चित् जनः एकां विद्यां जानाति, पुनश्च कश्चित ततोऽधिकां विद्यां जानाति तदा द्वितीयः प्रथमस्य गुरुः भवति। इत्थं यदि तृतीयः द्वितीयपुरुषात अधिकां विद्यां जानाति, ततः सः गुरोरपि गुरुः भवति। विदेशे अपरिचिते प्रदेशे मनुष्यः विद्यया जनान् परिचितानिव निर्माति। सर्वे विदेशीयाः पुरुषाः तस्य बान्धवाः सहायकाश्च भवन्ति। विद्या मानवस्य भाग्यमपि विदधाति। सा देवतारूपिणी स्वयं प्रसन्ना सती मनुष्यं सफलं करोति। राज्ञां समक्षे धनस्य को महिमा। ते तु स्वयमेव धनिनः भवन्ति, किन्तु विद्वान् तत्रापि पूज्यते। एतत् सर्वं विद्यायाः चमत्कारः। विद्यया मानवस्योत्कृष्टतमं रूपं विद्योतते। सत्यं कथितम् केनचित् कविना—

'विद्याविहीनः पशुः।' इति।

विद्यया विना मनुष्यः हीनः भवति, अपमानितः भवति, कष्टेन जीवति,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जीविकां च न प्राप्नोति, समाजस्य कलङ्करूपो भवति। कोऽपि तस्मै सम्मानपूर्णं स्थानं न ददाति। यद्यपि सर्वे कांचित् विद्यामवश्यं जानन्ति तथा जीविकामपि केनचित् प्रकारेण चालयन्ति। यथा—चौराः, लुण्ठकाः, भिक्षुकाश्च। किन्तु तेषां जीविका निकृष्टा निन्दिता चास्ति। एवं चौरविद्या, लुण्ठकविद्या, भिक्षुकविद्या चापि निकृष्टा निन्दिता। अतएव समाजे चौरशास्त्रम्, लुण्ठकशास्त्रम्, भिक्षुकशास्त्रम्, च न प्रतिपादितम्। इत्थमेव सैव विद्या या सभ्यसमाजे प्रशस्ता विहिता शास्त्रनिर्दिष्टा च भवति।

अस्तु सुविद्या युक्ता न तु कुविद्या। कुविद्या सदैव मानवमन्धकारस्याज्ञानस्य पतनस्य गर्त्ते पातयति। अतएवोक्तं केनचित् विद्वद्वरेण—'सुकविता सुविद्या वा यद्यस्ति तर्हि राज्येन किम्।' इति। इदमावश्यकं नास्ति यद् धनमेव जीवने सुखस्य मूलकारणम्। विद्यापि मानवं हिताय योजयति। विद्यायुक्तो नरः निर्धनः सधनः वा भवेत् किन्तु सः सदसद्विवेकी सन्तुष्टः सदाचारी कर्त्तव्यनिष्ठश्च तदैव भवति, यदा सुविद्यावान् भवेत्। विद्यार्थिनामिदं कर्त्तव्यमस्ति यत् ते न केवलं प्रमाणपत्रघोषितां विद्यां विद्यारूपेण जानन्तु। तया विद्यया तु केवलं जीविका प्राप्यते, जीवनं पाल्यते किन्तु आत्मा हीयते। आचारः न शुद्ध्यति। विवेकः न आयाति। अनेन प्रकारेण यत्र तत्र भ्रमन्नपि नरः कमपि निश्चयं कर्तुं न शक्नोति। तस्याध्यात्मिकी उन्नतिः न भवति।

विद्या 'ज्ञानम्'। ज्ञानञ्चात्मशोधकं भवति। छल-प्रपञ्च-लिप्सा-गर्व-प्रमाद-विलासादिनाशकं ज्ञानं विद्या। अनयैव विद्यया स्वात्मपरिष्कारः लोककल्याणं मोक्षप्राप्तिश्च भवति।

प्रो० बी०एन० पुरी संग्रह
7620

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिवर्धित संस्करण **संस्कृत व्याकरणम्** प्रकाशित हो गया

((१) रचनानुवाद खण्ड (२) निबन्ध खण्ड सहित)

(पूर्व मध्यमा प्रथम खण्ड में अनुवाद के लिए स्वीकृत पाठ्यग्रंथ)

प्रा० ले० आचार्य बदरीनाथ शुक्ल प्राध्यापक, संस्कृत वि० वि० वाराणसी।

अनुवाद तथा निबन्ध के लिए यह सर्वोपरि पुस्तक है। इसमें मनोवैज्ञानिक दृष्टिकोण से रखा गया एक-एक शब्द बालकों के बौद्धिक स्तर के सर्वथा अनुकूल है। प्रसङ्गानुसार विमर्श, टिप्पणी, उदाहरणमाला, अभ्यासार्थ प्रश्न, कारिकाबद्ध कारकादि प्रकरण एवं परिशिष्ट आदि सामग्री उपादेय एवं द्रष्टव्य है। संस्कृत व्याकरण के सर्वांश का सार इसमें इस कौशल से उपनिबद्ध है कि केवल इस पुस्तक के ही अभ्यास से संस्कृतव्याकरण के सब अङ्गों तथा परीक्षोपयोगी संस्कृत निबन्धों का यथेष्ट ज्ञान प्राप्त हो जाता है। २—५०

प्रस्तावतरङ्गिणी

श्री चारुदेव शास्त्री

(उत्तरमध्यमा द्वितीय खण्ड परीक्षा पाठ्य स्वीकृत)

अपने ढङ्ग का यह सर्वोच्च निबन्ध ग्रन्थ है। इस ग्रन्थ के अध्ययन से प्राचीन आचार-विचार के निरूपण के साथ-साथ आधुनिक विचारधाराओं के सारगर्भित विषयस्वरूप, प्रबन्ध—रचना—चातुरी तथा विचार—वैशारदी सहज ही प्राप्त हो जाती है। द्वितीय परिष्कृत संस्करण। ३—००

निबन्धप्रकाशः

ले० कृष्णकुमार अवस्थी

वाराणसेय संस्कृत विश्वविद्यालय के १९६५ की पूर्वमध्यमा द्वितीय खण्ड के अनिवार्य प्रथम पत्र में संस्कृत निबन्ध के लिए पाठ्य स्वीकृत २—००

प्रबन्ध-पारिजातः

आचार्य रामचन्द्र मिश्र

(उत्तरमध्यमा प्रथम खण्ड परीक्षा पाठ्य स्वीकृत)

संस्कृत-प्रबन्ध के नियम इस पुस्तक में अत्यन्त सरल रूप से समझाये गये हैं और तदनुसार परीक्षोपयोगी 'प्रबन्धलेखनप्रकार' (परीक्षा में आने योग्य निबन्धों के उत्तर) इस तरह संक्षिप्त रूप में लिखे गये हैं कि अभ्यास कर लेने पर विद्यार्थी परीक्षा में सफलता प्राप्त कर सकते हैं। १—५०

प्राप्तिस्थानम्—चौखम्बा विद्याभवन, पो० बा० ६९, वाराणसी-१